SAHITYA

ACHARYA IInd YEAR
PAPER -VII

# KAVYAPRAKASA

## ( 7 To 10 VULLASA )

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha
Accredited at A level by NAAC
Tirupati - 517 507 (A.P.)

अयि प्रियान्तेवासिनः,

शुभाभिनन्दनानि,

स्वागतं भवतां राष्ट्रिय-संस्कृत-विद्यापीठान्तर्गते आराद्विद्या-निदेशक-निकेते। विद्यापीठमिदं राष्ट्रिय- मूल्याङ्कनपरिषदा(NAAC) ए * इति, विश्वविद्यालयानुदानायोगेन (UGC) पारम्परिक -शास्त्रीय -समुत्कर्ष केन्द्रमिति चोद्घोषितम् ।

निकेतोऽयं मातुः सरस्वत्याः आवासस्थानत्वेनाभिमतः यस्मिन् भवतामपि विद्यानन्दाह्लादः लभ्यते तराम् । संस्कृतवाङ्मयपाटवमभिलषतां भवताम् आधारशिला भवति भवतां श्रद्धैव। श्रद्धायाः प्रोत्साहनार्थम् अध्ययने रुचिमुत्पादयितुञ्च,इयं स्वाध्ययनसामग्री निर्मिता, याञ्च भवन्तः स्वयम् अधिगन्तुं शक्नुवन्ति।

श्रद्धावतः शिष्यस्य एकलव्यस्येव गुरूपदेशः 'आराद्' मनसि प्रविशति येन च शिष्यः सत्यकामो भवति। आचार्योऽपि श्रद्धावतः शिष्यान् आरादपि दृग्दीक्षाख्योपदेशेन समेधयति कूर्मः स्वापत्यानीव -

**स्वापत्यानि यथा कूर्मो वीक्षणेनैव पोषयेत् ।**
**दृग्दीक्षाख्योपदेशस्तु तादृशः कथितः प्रिये।। इति**

कुलार्णवागमाम्नातेन दृग्दीक्षाख्योपदेशोपायानुसारिणाचार्येण श्रद्धावान् शिष्यः सत्यकामं जाबालं गौतमः हारिद्रुमतः इव उद्धरिष्यति।

सत्यकामो जाबालः जबालां मातरमामन्त्रयामास। 'मातः ब्रह्मचर्यं गुरौ वत्स्यामि किं गोत्रोऽहमि' ति। सा चैनमुवाच। सा'हमेतन्नवेद यद्गोत्रस्त्वमसि। गुरुसमीपे सत्यकामो जाबालोऽहमस्मि भोः इति ब्रुवीथाः' इति। एवमेव जाबालः हारिद्रुमतं गौतमं गत्वा 'भवत्सु ब्रह्मचर्यं वत्स्यामी'ति प्रार्थयामास। तेन च गोत्रे पृष्टे मात्रा यदुक्तं तदेव प्रोवाच।

गौतमस्तुष्टः सत्यकामं सत्यवादिनमुपनीय चतुश्शतं गावः यूथात् पृथक्कृत्य शिष्याय दत्त्वोवाच -'यदा एताः चतुश्शतं गावः सहस्रं भवन्ति तदा भवान् गुरुकुलं प्रतिनिवर्तस्व'।

अधुना चतुश्शतं गाः नीत्वा अरण्ये चारयतात् इति।

स एवमुक्तः सत्यकामः तृणोदकबहुलम् अरण्यं गाः प्रवेश्य बहुकालं पोषयामास। सम्यग्गावो रक्षिताः यदा सहस्रं सम्पन्ना बभूवुः तदा यूथस्थः कश्चन ऋषभः सत्यकाममाहूय 'सोम्य! वयमधुना सहस्रं सम्पन्नाः अस्मानाचार्यकुलं प्रापय' इत्यादिश्य 'ब्रह्मणश्च ते पादं

ब्रवाणी' ति स्वयमेव ब्रह्मज्ञानमुपदिशति।

एवम् अग्निः हंसः मद्गुः च सत्यकाममुपदिशन्ति इति आख्यायिका छान्दोग्योपनिषदि चतुर्थाध्याये आम्नाता वर्तते। इयमौपनिषदाख्यायिका आराद्विद्यया केन सादृश्येन सङ्गच्छत इति चेत् उच्यते -

अस्ति तावत् सत्यकामविद्याप्राप्तेः आराद्विद्या निकेततो विद्याप्राप्तेश्च महत् सादृश्यम् । तथाहि - सत्यकामः - गुरुकुलात् बहिरेव ब्रह्मविद्यामध्यगीष्ट अधिगमोऽपि मानवेतरमाध्यमेन। यतोऽहि ऋषभाग्निमद्गुवादयः उपदेशकर्तारः । अन्ते गुरूपदेशः इति।

आराद्विद्याबोधनमपि विश्वविद्यालयात् दूरे बहिरेव भवति। बोधनसामग्र्यपि प्रवाचकभिन्नमेव मुद्रितपुस्तकसान्द्रमुद्रिकादीति, अन्ते किञ्चित्कालं साक्षादुपदेशः (Contact Programme) इति च।

अतस्सत्यकामवद्विद्यकामा भूत्वा कृतार्था भूयासुरिति धिया पृष्ठपत्रं जाबालोपाख्यानेन सचित्रितम् । अतोऽस्माकमवगत्यान्तरङ्गं श्रद्धया पाठ्यांशानामध्ययने रता भवन्तु।

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**

निदेशकः

# सप्तमः उल्लासः

## प्रथमखण्डः

### १.प्रस्तावना-

आचार्यः मम्मटः काव्यप्रकाशे काव्यसामग्रीविषये बहु चर्चितवान् । स च वागदेवतावतारः। तेन शास्त्रान्तरैः सह साहित्यशास्त्रस्य सम्बन्धं स्थापयामास। तस्य प्रतिपादनसरणिः अतीव हृदयङ्गमा भवति। तेन काव्यलक्षणे एव समस्तोऽपि काव्यप्रकाशसारः संगृहीतः। तथाहि - तददोषौ शब्दार्थौ सगुणावनलंकृती क्वापि इति। प्रथमे उल्लासे काव्यकारणं, काव्यप्रयोजनं, काव्यभेदाः सोदाहरणं निरूपिताः। तदनुसारं शब्दार्थविवेचनं, अभिधामूलव्यञ्जना लक्षणामूलव्यञ्जना च द्वितीये उल्लासे, आर्थीव्यञ्जना तृतीय उल्लासे ध्वनिप्रभेदाः उत्तमकाव्यस्य अङ्गत्वेन चतुर्थे उल्लासे मध्यमकाव्यं गुणीभूतव्यङ्ग्यं व्यञ्जना स्थापना च पञ्चमोल्लासे, अधमकाव्यं शब्दार्थचित्रभ्दौ च षष्ठउल्लासे निरूपिताः।

तदनु काव्यलक्षणे दोषनिरूपणं षष्ठे उल्लासे निरूपयांचक्रे। दोषाणां निरूपणं भरतस्य नाट्यशास्त्रेऽपि कृतम् । तदनु दण्डी अपि दोषाणां सूचनं चकार। तद्नु महिमभट्टः व्यक्तिविवेकस्य द्वितीयविमेशे दोषाणां विशदतया निरूपण चकार। उपमादोषाः अलंकारदोषाः रसदोषाः तत्तदर्थनिरूपणावसरे शास्त्रकारैः सम्यक् निरूपिताः। तेषां सर्वेषां काव्ये कदापि न भवेयुः इति धिया मम्मटः काव्यलक्षणे अदोषौ इति पद विनिवेश्य सूचितवान् ।

काव्यप्रकाशे दशमोल्लासः आकारेण अधिकः। ततः परं सप्तमोल्लासः किञ्चित् न्यूणः। अस्मिन्नुल्लासे पददोषाः, पदसजातीयवाक्यदोषाः, वाक्यमात्रदोषाः, अर्थदोषाः रसदोषाश्च सोदाहरणं प्रपञ्चिताः। प्रसक्तानुप्रसक्ततया यच्छब्दतच्छब्दप्रयोगविषये विस्तरेण चर्चा विहिता। अस्य दोषप्रकरणस्य अध्ययनानन्तरं कस्यापि काव्यलेखने साहसं न भवति। येनकेनापि स्वरचितलेखने दोषाः दृश्यन्ते एव। कस्यपि लेखने दोषः दृश्यते एव।

सप्तमे उल्लासे दोषाणां सामान्यलक्षणं, दोषाणां विशेषलक्षणं, पददोषाणां वाक्यपदैकदेशेषु अतिदेशः, वाक्यमात्रगतदोषाः, अर्थदोषाः, क्वचित् निर्हेतोः अदुष्टता, अनुकरणस्थले श्रुतिकट्वादीनां दोषराहित्यनिरूपणम्, वक्त्रादिवैशिष्ट्येन दोषाणामपि गुणत्वनिरूपणम्, साक्षात् रसविरोधिनां दोषाणां प्रतिपादनम्, दोषाणामदोषत्वनिरूपणम्, दोषाणामपि क्वचित् गुणत्वमित्यपि, रसविरोधि परिहारोपायाः विरोधपरिहारे कारणान्तरनिरूपणम् इत्यादयः बहवः विषयाः अत्र दर्शिताः।

अत्र मम्मटस्य नैकग्रन्थपरिशीलनम् परिलक्ष्यते। काव्ये मुख्यः रसः। रसशब्देन भावादीनाम्पि ग्रहणम् भवति। अतः रसभावादयः काव्यस्य मुख्याः विषयाः। एते च वाच्यार्थानाश्रित्य समुल्लसन्ति। तः वाच्यतार्थः मुख्यः इति कथ्यते। शब्द-वर्ण-रचनाः रसादीनुपकुर्वन्ति। एवमेव वाच्यार्थमपि उपकुर्वन्ति। अतः एव दोषः तेष्वपि भवन्ति। अर्थात् दोषः काव्येषु वर्णिताः भवेयुः। एकस्य अपि दोषस्य सद्भावे काव्यसौन्दर्यं कुण्ठितं भवति। दोषभूयिष्ठं कवित्वं कुकवित्वमिति कथ्यते।
अतएव-

**तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन।**
**स्याद्वपुः सुन्दरमपि श्वित्रणैकेन दुर्भगम् ।।** इति दण्डी अभिप्रैति।

अत्यल्पदोषः अपि कव्ये न प्रविशेत् ,। सुनदरेऽपि शरीरे क्वचिदपि यदि श्वित्रं भवति चेत् सौन्दर्यविहीनं भवतीति लोके अनुभूतविषय एव। तथा च काव्यालंकारे भामहः-

**नाकवित्वमधर्माय व्याधये दण्डनाय वा।**
**कुकवित्वं पुनस्साक्षात् मृतिमाहुर्मनीषिणः।।**

कवित्वस्य अकरणे अधर्मः न भवति। व्याधिरपि नायाति। राजापि न दण्डयति। कुकवित्वं तु साक्षात् मरणमेव इति। ततः दोषाः काव्ये सर्वथा वर्जनीयाः। तस्मादेव कारणत् दोषाः काव्ये हेयतया दर्शयितुं मम्मटेन अस्मिन् उल्लासे दर्शिताः।

सप्तमे उल्लासे षोडशकारिकासु दोषलाक्षणानि तत्परिह्नोपायाः दर्शिताः। प्रायः अत्र उदाहरणतया द्विशतं श्लोकाः दर्शिताः। एतदुदाहरणमाध्यमेन दोषाणां प्रदर्शनं तेषां निवारणोपायाः पाठपरिवर्तने दोषाः कथं गुणसहिताः भवेयुरिति सम्यक् निरूपितम् ।

## २.उद्देश्यम्

मम्मटः काव्ये शब्दार्थयोः रसस्य च दोषाः परिहरणिया इति दर्शयन् दोषाणां निरूपणाय सप्तमः उल्लासः आरब्धः इति पूर्वमुक्तमेव। दोषसामान्यलक्षणं प्रथमतः निरूपयितुं तस्य मुख्यार्थहतिर्दोषः इति लक्षणमाह। हतिरपकर्षः। शब्दार्थयोः रसस्य च अपकर्षत्वमनेन सूचितं भवति। किञ्चिद्दोषितत्वम् हतिरित्यर्थः। शब्दाद्याः अपि दूषिता भवन्ति। तदनु दोषविशेषलक्षणानि अपि प्रदर्शितानि। यथा पदगतदोषाः,पदांषगतदोषः, वाक्यगतदोषाः, अर्थगतदोषाः रसगतदोषाः इति विभाजनं कृत्वा पुनः दोषाणां परिहारोपायाः, दोषाणमपि क्वचित् गुणत्वं इत्यादि निरूपितम् ।

एतस्य उल्लासस्य अध्यनेन भवन्तः अधोनिर्दिष्टान् अंशान् जनयति।

- काव्ये दोषाः हेयाः इति
- हेयतया निर्दिष्टानां दोषाणाम् सामान्यलक्षणं किम्?
- दोषविशेषाः के इति
- पदगतदोषाविशेषाः के?
- पदांशगतदोषाः के?
- पदसजातीयदोषाः के?
- वाक्यमात्रदोषाणां स्वरूपम्
- अर्थगतदोषाणां परिज्ञानम्
- रसदोषविवेचनम्
- रसदोषपरिहारोपायः
- वक्त्रादिवैशिष्ट्येन दोषाणामपि गुणत्वप्रकलपनम्
- दोषाः कुत्र गुणाः भवन्ति
- दोषाः कुत्र दोषाः भवन्ति इति विवेकः
- दोषाः कुत्र दोषा एव भवन्ति?
- दोषाः कुत्र

**दोषसामान्यलक्षणम् - हतिशब्दार्थस्य विवेचनम् तद्भेदाश्च —**

**मुख्यर्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः।**
**उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः।।**

**मुख्यार्थस्य हतिः** - अपकर्षो यस्मात् स दोषः। अत्र हतिरिति भावसाधनो निर्देशः। अन्ये तु - मुख्यार्थो हन्यतेऽपकृष्यतेऽनेनेति करणसाधनो हति- शब्द इत्याहुः। एवं च 'मुख्यर्थापकर्षकत्वम् ' इति दोषसामान्यलक्षणम् । अत्र अर्थस्य मुख्यत्वं न शक्यत्वरूपम्, येन रसादिदोषाव्यापकत्वात् लक्षणस्यामङ्गतिः स्यात् । किन्तु इतरेच्छानधीनेच्छाविषयत्वम्। तच्च स्वतः पुरुषार्थे सुखरूपे रसेऽक्षतम् । अत एवाह- 'रसश्च मुख्यः' । अत्र रसशब्देन 'रसस्यते आस्वाद्यत्र' इति व्युत्पत्या भावादिरपि सङ्गृह्यते।

नन्वेवं नीरसेषु न कश्चिद दोषः यस्याद् विघात्यस्य - अपकर्षणीयस्य रसस्य, अभावादिति चेत्स? न। तदाश्रयाद् वाच्यः। तथा च तेन रसेन, आश्रयणात्-

उपकारकतयाऽपेक्षणाद् वाच्यः शब्दबोध्यः, वाच्यलक्ष्यव्यङ्ग्यरूप इत्यर्थः, मुख्य इति सम्बन्धः।

न चैवं मुख्यशब्दार्थस्य नानात्वेनाऽननुगम इति वाच्यम् । काव्ये प्राधान्येनोद्देश्यप्रतीतिविषयत्वेन अनुगतमात् । तदेवं रसवति वर्व एव दोषाः। नीरसे तु अविलम्बितचमत्कारवाक्यार्थप्रतीतिविघातका एव हेय इति मन्तव्यम् ।

नन्वेवं रसवाच्ययोरेव दोषाधारत्वमुचितम्, न तु शब्दादीनामिति चेत्? न। शब्दाद्या हि उभयोः रसवाच्ययोः उपयोगिनः व्यञ्जकवाचकादिगत्वम्, तेन रसोपयत्वेन हेतुना तेषु अर्थशब्दादिष्वपि स दोषः न,तु केवलं रसे। अत्र सूत्रे शब्दपदं शब्द्यते बोध्यतेऽनेनेति व्युत्पर्त्या प्रतिपादनात्मकशब्देनाऽव्यापरवतोः पदवाक्ययोःवर्तते । तेन 'आद्यग्रहणाद् वर्णरचने सङ्गृहीते' इति वृत्तिस्वरसः। अन्यथा वर्णस्य शब्दरूपत्वाद् आद्य प्रदग्राह्यता वृत्त्युक्ता असङ्गता स्यात् । न च तत्र बीजभावः। अन्यथा शब्दपदेनैव वर्णस्यापि प्राप्तौ 'शब्दाद्याः' इति बहुवचनासङ्गतेरेव बीजत्वात् ।

एवं चोद्देश्यप्रतीतिविघातकत्वं दोषत्वम्, इति दोषसामान्यलक्षणम् । स च अनित्यानित्यरूपेण द्विविधः। तत्र सर्वदैव हेयो नित्यः, यथा च्युतसंस्कृत्यादिः। तदन्यस्य अनित्यः, शृङ्गारादौ हेयमपि श्रुतेकटुरौद्रादावुपादेयमेव । नित्या नित्यरूपेण द्विघो/अप्ययं दोषः त्रिविधः, शब्ददोषोऽर्थदोषो रसदोषश्चेति।

**२.प्रश्नः** -शब्ददोषान् तत्र श्रुतिकटुत्वम्, च्युतसंकृतिबम्, अप्रयुक्तत्वम्, असमर्थत्वम् निहतार्थत्वम्, अनुचितार्थत्वम् अप्रतीतत्वम्, नेयार्थत्वम्,क्लिष्टत्वम्, दोषाणां लक्षणानिप्रदर्श्य, उदाहरणेषु मसमन्वयत?

**उत्तरम्- दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तमसमर्थम् ।**
**निहतार्थमनुचितार्थ निरर्थकमवाचकं त्रिविधाश्लीलम् ।।**

**सन्दिग्धमतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ।**
**अविमृष्टविधेयांशं विरुद्धमतिकृत्समसगतमेव।। इति।**

एते षोडशपददोषा इति भावः । अत्र-

**१. श्रुतिकटुत्वम्** - परुषवर्णतया श्रुतिदुःखावहत्वं श्रुतिकटुत्वम् । परुषवर्णत्वं च मुख्यार्था पकर्षकर्वे सति ओजोव्यञ्जकवर्णत्वम् । इदं तु मधुररसे एव इति । उदाहरणं यथा-

**अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।**
**आलिङ्गितः स तन्वङ्या कार्तार्थ्य लभते कदा।।**

अत्र कार्तार्थ्यम्' इति पदं कठोरवर्णघटितत्वात् श्रुतिकटुः। अतोऽत्र श्रुतिकटुत्वं दोषः। स्वायत्ते शब्दप्रयोगे कर्णोपतापकशब्दप्रयोगेण श्रोतुरुद्वेगो रसा पकर्षायेति स दूषकताबीजम्। अत एव प्रतिकूलवर्णादस्य भेदः, तस्य कत्णोपतापाहेतुत्वात् । अत एव चानुकरणे वैयाकरणादौ वक्तरि श्रोतरि वा रौद्रादौ रसे व्यङ्ग्ये नीरसे च काव्येऽस्य दोषत्वाभावः।

**२. च्युतसंस्कृतित्वम्** - च्युता स्खलिता, संस्कृतिः-संस्कारः, व्याकरणलक्षणाऽनुगमो यत्र, तस्य भावस्तत्त्वम्,। यद्भाषासंस्कारकव्याकरणलक्षणविरुद्धं यत् तत् तद्भाषायां च्युतसंस्कृतित्वमिति भावः। सर्वथा प्रतिप्रसवाऽभावेन सर्वदैव हेयत्वाद् अयं महादोष सर्वथा नित्य एवेति बोध्यम् । उदहरणं यथा-

**एतन्मन्दविपअक्वतिन्दुकफलश्यामोदरपाण्डुर-**
**प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते।**
**तत्पल्लीपतिपुत्रि कुञ्जरकुलं कुभाभयाभ्यर्थना,**
**दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः।।**

अत्र **अनुनाथते** इति पदं च्युतसंस्कृतिः। अत्र **क्रीडोऽनुसम्परिभ्यश्च** इति पाणिनिसूत्रस्थेन **आशिषि नाथः** इति दार्तिकेन आशिष्येवात्मनेपदमिति नियमात् । इह याच्ञार्थत्वादात्मनेपदप्रयोगो व्याकरणलक्षणहीन इति दोषः एव। अयं पदे एव न तु पदैकदेशेऽपीति ज्ञेयम् । तत्तद्व्याकरणसंस्कृत शब्दघटितपद्ये तदसंस्कृतपदोपादानस्य काव्यशक्त्युन्नायकतया सहृदयश्रोतुरुद्वेगो दूषकताबीजम् ।

**३. अप्रयुक्तत्वम् -** व्याकरणकोषादिशास्त्रप्रसिद्धमपि मविभिरनादृततत्वम् अप्रयुक्तत्वम् । यथा-

**यथाऽयं दारुणाचारः सर्वदैव विभाव्यते।**
**तथा मन्ये दैवतोऽस्य पिशाचो विभाव्यते।**
**तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा।।**

अत्र पुंलिङ्गो दैवतशब्दोऽमरकोशे'वृन्दारका दैवतानि पुंसि वा' इति आम्नातोऽपि पुंस कविभिः न क्वापि प्रयुक्त इति अप्रयुक्तत्वं दोषः। पदार्थो पस्थितिविलम्बो दूषकताबीजम्।

**४. असमर्थत्वम्** - यत्तदर्थ पठ्यते न तत्रास्य शक्तिः। प्रकृतस्थले विवक्षितार्थसामर्थ्यरहितमित्यर्थः उदाहरणं यथा-

**तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः।**
**सुरस्त्रोतस्विनीमेष हन्ति सम्प्रति सादरम् ।।**

अत्र 'हन्ति' इति धातुपाठे हन हिंसागत्योः इति गमनार्थे पठितमपि न तत्र समर्थमपि असमर्थत्वं दोषःऽप्रसिद्धपरित्यागेनेदृशप्रयोगे प्रयोजनाऽनुसन्धानव्यग्रत्वाद् विलम्ब एव दुष्टिबीजम् ।

**५. निहतार्थत्वम्** - उभयार्थस्य शब्दस्याप्रसिद्धेऽर्थे प्रयोगः निहतार्थत्वम् । यथा-

**यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन।**
**मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा।।**

अत्र नानार्थस्य शोणितपदस्य रुधिरे प्रसिद्धिः उज्ज्वलीकृतरूपे विवक्षितार्थे तु अप्रसिद्धिः, इति निहतार्थत्वं दोषः। अत्र प्रसिद्धस्यैव द्रागुपस्थित्या विवक्षितस्य विलम्बय उपस्थितिः दूषकताबीजम् ।

**६.अनुचितार्थत्वम्** - उपश्लोक्यमनतिरस्करव्यञ्जकर्थत्वम् अनिचितर्थत्वं दोषः। अयं न्नित्यो दोषः। यथा-

**तपस्विभिर्या सुचिरण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या।**
**प्रयान्ति तमाशु गरि यशस्विनो रणाश्वमेधे पशुतामुपागताः।।**

अत्र पशुपदं कातर्यमभिव्यनक्तीति वर्णनीयस्य शौर्यस्य तिरस्काराद्च अनुचितार्थत्वं दोषः। दूषकताबीजं च विवक्षितार्थतिरस्कारकार्थोपस्थितिः। अतोऽस्य नित्यदोषत्वम् ।

**७. अवाचकत्वम् -** विवक्षितधर्मविशिष्टस्य विविक्षितधर्मिणः क्वापि न वाचकम् यत्तत्तस्य भवः अवाचकत्वम्। अत एवासमर्थादस्य भेदः। तस्य क्वचिच्छक्तिस्वीकारात् । उदाहरणं यथा-

**अबन्ध्यकोपस्य विहन्तुरापदं भवन्ति वश्यः स्वयमेव देहिनः।**
**अमर्षशून्येन जन्स्य जन्तुना न जातहार्देन न विद्विषादरः।।**

अत्र जन्तुपदम् अदातरिअर्थे विवक्षितम् न च तस्य वाचकमिति अवाचकत्वं दोषः। दूषकताबीजं तु विवक्षितार्थाऽनुपस्थितिरिति नित्य एवायं प्रतीतम् सोषः।

**८. अप्रतीतत्वम्-** प्रति- प्रतिशास्त्रे, इतं - ज्ञातम् प्रतीतम्, न प्रतीतम् अप्रतीतम् । यअत्किञ्चिच्छात्रापरिभाषितमित्यर्थः। नञोऽल्पार्थकत्वात् शब्दानुशासनातिरिक्त-शास्त्रमात्रप्रसिद्धत्वम् अप्रतीतत्वं दोषः। यथा-

**सम्यग्ज्ञानमहज्योतिर्दलिताशयताजुषः।**
**विधीयमानमप्येतन्न भवेत् कर्मबन्धनम् ।।**

अत्र वसनार्थे आशयशब्दः योगशास्त्र एव प्रसिद्धः इति, एकशास्त्रप्रसिद्धत्वाद् अन्यत्र चाऽप्रयोगाद् अप्रतीतत्वम् दोषः। अत्र तच्छास्त्रानभिज्ञस्यार्थानुपस्थितिः दूषकताबीजम्।

**९. नेयार्थत्वम्** - रूढिपयोजनाभवादशक्तिकृतं लक्ष्यार्थप्रकाशनं नेयार्थत्वम् । उदाहरणं यथा-

**शरीरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम्।**
**करोतिते मुखं तन्वि चपेटपातनातिथिम् ।।**

अत्र चपेटापतनेन मुखार्थबाधाद् निर्जनत्वं लक्ष्यते। तच्च रूढ्रिप्रयोजनाभावाद् अशक्तिकृतमेवेति नेयार्थत्वं दोषः। लक्षणाजन्यबोधे रूढिप्रयोजनान्यतरज्ञानस्य हेतुर्वेन प्रकृते तदभावाद् वृत्त्यभावेनार्थानुपस्थितिः दूषकताबीजम् । अए एव नित्योऽयं दोषः।

**१०. विलष्टत्वम् -** अर्थप्रतीतौ व्यवहितत्वं क्लिष्टत्वम् । उदाहरणं यथा-

**अत्रिलोचनसम्भूतज्योतिरुद्‌गमभासिभिः।**
**सदृशं शोभतेऽत्यर्थं भूपाल अव चेष्टितम् ।।**

अत्र अत्रिलोचनम्भूतेत्यनेन विवक्षितविशेषस्य चन्द्रस्य न द्रागुपस्थितिः, चक्षुर्ज्योतिषोऽपि तथात्वात्, नियमकस्य प्रकरणादेरभावाच्च । एवं चन्द्रोद्गमभसित्वेन कुमुदस्यापि न द्रागुपस्थितिः च्न्द्रविकस्यकुसुमान्तरसाधरण्यात् । अतः कुमुदैः इत्यस्य व्यवधानेन (यशःशुक्लह्व कुमुदे तात्पर्यग्रहोत्तरमेवेत्यर्थः) उपस्थिरिः। तस्मात् क्लिष्टत्वं दोषः। यमकरहेलिकादौ नायं दोषः, तत्र विलम्बस्येष्टत्वात् । तस्माद् अनित्योऽयं दोषः। दूषकताबीजं च विवक्षितार्थप्रतीतिविलम्बः।

**३.प्रश्नः -** अविमृष्टविधेयांशभावस्य दोषत्वं प्रतिपाद्य उदाहरणे च सङ्गम्य क्यत्तत् - शब्दस्थले अविमृष्टविधेयांशभावव्यवस्थां वर्णयत?

**उत्तरम्** - प्रधान्येनानिर्दिष्टो विधेयांशो यत्र सः अविमृष्ट विधेयांशः। अर्थाद् विधेयस्य प्राधान्ये-नाऽनिर्दिष्टतया गुणीभूतत्वम् अविमृष्टविधेयांशत्वम् । अस्यैव विधेयाविमर्श इति नामान्तरम् । अतो विधेयस्य वाक्ये प्रधान्येन निर्देश एवोचितः। प्रधान्यं च पदार्थानां मध्ये विधेयांशस्योपादेयत्वेन ग्राह्यम् । विधेयाशप्राधान्यस्य विपर्ययः(गुणीभूतत्वम्) च क्वचित्समासेन क्वचिदुद्देध्यविधेयवाचकपदयोः पार्वापर्यविपर्ययेण। तत्रापि यत्र समासेन प्राधान्यविपर्ययः। तत्र पददोषः। यत्र चोद्देश्यविधेययोः पौर्वापर्यविपर्ययः तत्र वाक्यदोषाः। उक्तं च-

**उद्देश्यस्य वचः पूर्वं विधेयं तदनन्तरम् । इति ।**
**अनुवाद्यमनुकत्वैव न विधेयमुदीरयेत् ।**
**न ह्यलब्धास्पदं किञ्चित्कुत्रचित् प्रतितिष्ठति ।। इति च ।**

अनुवाद्यम् उद्देश्यम् । तत्र पदगतो विधेयाविमर्शो यथा-

**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः।।**

अत्र वृथात्वं विधेयम् । तच्च समासे गुणीभावाद् अनुवद्यत्वप्रतीतिकृत् ।अर्थादत्र उच्छूनत्वमुद्दिश्य वृथात्वस्य विधेयता उचिता, किन्तु तत्पुरषसमासे बुधात्वमुच्छूनत्वे विधेषणीभूतमिति गुणीभूतं सद् विधेयतया न प्रतीयते, इति दोष एव ।

वाक्यगतो यथा- 'न्यक्कारो ह्यमेव मे यदरय................' इत्याहुः

अत्र '**अयमेव मे न्यक्कारः**' इति न्यक्कारस्य विधेयत्वं विवक्षितम्, तच्च शब्दरचनावैरीत्येन गुणीभूतम्, रचना च पदद्वयस्य विपरीतेति वायदोषः। उद्देश्यविधेयभावनवगमे सहृदयोद्वेग एव दूषकताबीजम् ।

क्वचिद् विधेयस्याऽनुपस्थितावपि अयं दोषः। यथा-

**अपाङ्‌गसंसर्गितरङ्‌गितं दृशोर्भ्रुवोररालान्तविलासि वेल्लितम् ।**
**विसारि रोमाञ्चनकञ्चुकं तनोस्तनोते योऽसौ सुभगे समागतः।।**

अत्र **यतदर्थयोर्नित्योऽभिसम्बन्धः** इतिनियमेन पूर्वनिर्दिष्टोद्देद्श्यवक्यगतो यच्छब्दो नियतमेव विधेयवाक्यगतं तच्छब्दं तच्छब्दसमानर्थकं वा, अदःशब्दादिकमपेक्षते । तत्र च विधेयवाक्ये तच्छब्दो नोपात्तः । यश्च 'असौ' इत्युक्तः सोऽपि उच्छब्दसान्निध्याद् यदर्थ्विशेषणतया प्रिसद्धार्थमभिदधद् उद्देश्यवाक्ये एवान्तर्भवति न तु विधेयवाक्ये, इति विधेयवाक्यस्यासम्पूर्णतया उद्देश्यविधेयभावानवगमः।

**यत्तदोर्नित्यमभिसम्बन्धः** इति यत्तदोः परस्परार्थापेक्षात्मकत्वं नियतमेव। सचाभिसम्बन्धः शाब्दः, आर्थो वा। अत्र द्वयोरूपादाने शाब्दः। यथा- **स दुर्मतिः श्रेयसि यस्य नादारः।** इति।

एकस्य द्वयोर्वाऽनुपादाने आर्थः। अनुपात्तस्यापि सामर्थादेवाक्षेपात् । तथाहि- प्रक्रान्तप्रसिद्धानुभूतार्थकः तच्छब्दो यच्छब्दोपादानं नापेक्षते। तस्य सामर्थ्यादेवाक्षेपः। तत्र प्रकान्तः(पूर्वप्रतीतिविषयः) तच्छब्दो यथा-

**कातर्य केवला नीतिः शौरुं श्वापदचेष्टितम् ।**
**अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः।।**

अत्र **सः** इति प्रक्रान्तम् अतिथिसंज्ञं राजानमाह । तथा चात्र **सः** इति तच्छब्दः प्रक्रान्तार्थकत्वाद यच्छब्दोपदानं नापेक्षते। तस्याक्षेपादेव लाभात् । प्रसिद्धार्थकतच्छब्दो यथा-

**द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।**
**कला च सा कान्तिमती कलावतः त्वमस्य लिकस्य च नेत्रकौमुदी।।**

अत्र **स**ः इति तच्छब्दः प्रसिद्धार्थकत्वाद् यच्छब्दोपादानं नापेक्षते, तस्याक्षेपादेव बोधात्। अनुभूतार्थकतच्छब्दो यथा-

**उत्कम्पिनी भयपरिस्खलितांशुकान्ता सा लोचने प्रतिदिशं विधुरे क्षिपन्ती।**
**क्रूरेण दारुणतया सहसैव दग्धा धूमान्धितेन दहनेन न वीक्षितासि।।**

अत्र **ते** इति तच्छब्दोऽनुभूतार्थकत्वात् न यच्छब्दोपादानमपेक्षते। किन्तुसामर्थादेव यदर्थलाभः। एवं च त्रिष्वपि एषूदाहरणेषु यच्छब्दोपादानं नावश्यमपेक्षणीयम् ।अत एव एषु यत्तदोः आर्थः सम्बन्धः।

इत्थं च यथा क्वचित् तच्छब्दस्य यच्छब्दोपादानानपेक्षत्वं तथा क्वचिद्यच्छब्दस्यापि तच्छब्दोपादानानपेक्षत्वम् । तथाहि -उत्तरवाक्येगतो यच्छब्दः पूर्ववाक्ये तच्छब्दोपादानां नापेक्षते। यथा-

**साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके।**
**उद्यता जयिनिकामिनीमुखे तेन साहसमनुष्ठितं पुनः।।**

यत्र 'उन्मीलितम् इति उत्तरवाक्यगतो यच्छब्दः पूर्ववाक्ये' तत्साधु कृतम् इति तच्छब्दोपादानं तापेक्षते, आक्षेपादेव तस्य लाभात् । एवं तदनुपादानेऽपि न दोषः। पूर्ववाक्यगरस्तु यच्छब्दः तच्छब्दोपादानमपेक्षत एव। यथा अत्रैव पद्ये अद्यपादयोः व्यत्यासे सति तद्ध्हब्दोपादानमावश्यकमेव, अन्यथा दोष एव स्यत् । द्व्योरूपादाने तु निराकाङ्क्षता प्रसिद्धैव।

क्वचिद् द्वयोरपि अनुपादने सामर्थ्यादेव तत्प्रतीतिः। यथा-

**ये नाम केचिदिहनः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः।**
**उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा कालोह्यं निरवधिर्विपुला च पृथ्वी।।**

अत्र पूर्वार्द्धे **ये ते** इति यत्तच्छब्दयोः द्व्योरूपादानात् निराकाङ्क्षत्वं प्रसिद्दमेव। उत्तरार्द्धे तु य उत्पत्स्यतेऽस्ति वा मम समानधर्मा तं प्रति यत्ः'। इति स्फुटमेव यत्तच्छब्दाक्षेपादवगम्यते, इति न दोषः।

यो.ऽसौ सुभगे तवागतः इत्यत्र यच्छब्दनिकटस्थया अदःशब्दः अनुवाद्यत्वप्रतीतिकृत इति अविमृष्टविधेयांशदोषोऽस्त्येव। यतो हि यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये

तच्छब्दसमानार्थका इदमेतदद:शब्दा विधेया एव भवितुं युक्ताः। किं च तच्छब्दसमानार्थका इदमेतदद:शब्दा उच्छब्दव्यवधानेन स्थितास्तु निराकाङ्क्षित्वमेवावगमयन्ति। एवं सति यच्छब्दनिकटस्थितस्तच्छब्दोऽपि प्रसिद्धिपरामर्शक एव । एवं 'योऽसौ' इत्यत्रपि अदः शब्दः प्रसिद्धिपरामर्शक एव, न तु तेन विधेयतायाः प्रतीतिरिति दोष एव ।

न च कल्याणायाः त्वमसि महसां भाजनं विश्वमूर्ते इत्यादिपद्ये यद्यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे इत्यत्र एकेन तत्पदेन, एकस्य यच्छब्दस्य निराकान्क्षत्वेऽपि द्वितीयस्य यच्छब्दस्य साकाङ्क्षतैवेति वाच्यम् । अत्र हि यद्यत् इत्यनेन ज्ञातत्वाज्ञातत्वादिरूपेण, यद्वा- उपपातकत्वमहापातकत्वादिना सर्वात्मकं(सकलम्) पापरूपं वस्तु विवक्षितम् तथाभूतमेव तच्छब्देन परा मृश्यते, इति न दोषः। बुद्धिविष्यावच्छेदकावच्छिन्ने तदादीनां शक्तेरिति भावः।

**४. प्रश्नः**- यत्तदोः सम्बन्धस्य नित्यत्वं व्यवस्थाप्य 'अपाङ्गसंसर्गि ' इत्यादिपद्ये 'योऽसौ' इति
पदद्वयमनुवाद्यमत्रप्रतीतिकृत् इति सत्युक्तिकं लिखत ?

उत्तरम् - प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते। 'कातर्यं केवलानीति' द्वयं गतं सम्प्रति शोचनीययाम्, उत्कम्पनीभय परिस्खलितांशुकांता इत्यदीन्युदाहरणानि। एवमुत्तरवाक्ये गृहीतो यच्छब्दः पूर्ववक्यनुगत्स्य तच्छब्दस्योपादानं नापेक्षते। यथा 'साध्य चन्द्रमसि पुष्करैः इत्यादौ। पूर्वं पठितसु यच्छब्दः तच्छब्दोपादानभपेक्षत एव । क्वचिदनुपादनेऽपि साममर्थाद् द्वयमपि प्रतीयते। यथा- ये नम केचिदिह प्रथमन्त्यवज्ञाम्' इत्यादौ य उत्पत्स्यते तं प्रति, इति गम्यते। एवश्च 'अपाङ्गससर्गि' इतादिपद्ये यच्छब्दः तच्छब्दानुपादानात् साकाङ्क्षः। न चादःशब्दोऽपि तच्छव्दार्थ प्रतिपदयतीति वाच्यम् । 'असौ मरुच्चुम्बितचारुकेषरः' इत्यादौ तच्छब्दार्थप्रतीत्य भावाट्, इतरथा 'करवालकरालदाआह्न :सहायः ' इत्यादौ 'स' इत्यस्य आनर्थक्यं स्यात् ।

ननु 'योऽविकल्पभिदमर्थमण्ड्लम्' इत्यत्र यथा इदं शब्दः तच्छब्दार्थमह तथा अदश्शब्दोऽपि कथयितुमर्हतीति चेत्? न । अत्रैव वाक्यान्तरे अदोग्रहणं कार्यम् न तु तत्रैव(एकस्मिन् वाक्येएव)। यच्छब्दस्य समीपे स्थितसु तच्छब्दः प्रसिद्धिं परामृशति(बोधयति)। यथा-

**यत्तदूर्जितमत्युग्रं क्षात्रं तजोऽस्य भूपतेः इत्यादिपद्ये।**

न च 'कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते' इत्यादिपद्ये अविमृष्टविधेयांशोऽपरिहार्यो यच्छब्दस्यैकस्य निराकाङ्क्षत्वेऽपि द्वितीयस्य साकाङ्क्षत्वादिति वाच्यम्। यद्यदित्यनेनज्ञातत्वाज्ञातत्वादिरूपेण, उपपातकत्वमहापतकत्वादिना व पपरूपं सर्वात्मकं वस्तु आक्षिप्तम् तथाभूतमेव(पापरूपं सकलमेव वस्तु) एकेनैव तच्छब्देन पराम्श्यते इति न दोषः। सर्वमवदारम्।

**५.प्रश्नः -** वाक्यदोषान् परिगण्यय्य, प्रतिकूलवन्त्र्वम्, हतवृत्तत्वम्, समाप्तपुनरात्तत्वम् अभवन्मतयोगत्वम्, गर्भितत्वम् प्रसिद्धिहतत्वम्, भग्नप्रक्रमत्वम्, इत्येतेषां लक्षणानि निर्दिश्य लक्षेषु सङ्गमयत।?

**उत्तरम्- प्रतिकूलवर्णमुपहतलुप्तविसर्ग विसन्धि हतवृत्तम् ।**
**न्यूनाधिककथितपदं पतत्प्रकर्ष समाप्तपुनरात्तम् ।।**

**अर्थान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम्।**
**अपदस्थसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम्।**
**भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा।**

एवं विधिं वाक्यमेव तथा- दुष्टमित्यर्थः। इमे त्रयोविंशतिः दोषाः वाक्यगता एव न तु पदादिगता अपीति भावः। यथा-

**१. प्रतिकूलवर्णत्वम्** - वर्णानां रसानुगुण्यविपरीतत्वं प्रतिकूलवर्णत्वम् यथा-

**अकुण्ठोत्कण्थया पूर्णमकण्ठं कलकण्ठि मम्।**
**कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ।।**

अत्र शृङ्गारे रसे टवर्गः प्रतिकूलःअतः प्रतिकूलवर्णत्वं दोषः। उक्तं च सारबोधिन्याम्- अत्र शृङ्गारपरिपन्थिन ओजसो व्यञ्जकवर्णानां शृङ्गार व्यञ्जने प्रतिबन्धकता' इति।

**२. हतवृत्तत्वम् -** हतं - निन्दितम्, वृत्तं- च्छन्दः, यत्र वाक्ये तद् हत्वृत्तम् । तथाहि- लक्षणाऽनुसरेणेऽपि अश्रव्यम्, अप्राप्तगुरुभावान्तलघु, रसननुगुणं च वृत्तं यत्र तद् हतवृत्तं तस्य भावः हयवृत्तत्वम् । क्रमेणोदाहरणम्-

**वदतु यदिहाऽन्यत्साधु स्यात्प्रियादशनच्छदात्**

अत्र हरिणीछन्दसि प्रतिपादं षष्ठक्षरे यतिरुचिता, चतुर्थेऽस्मिन् पादे **हा** इति षष्ठाक्षरेपरदानुसन्धानापेक्षत्वेन यतिभङ्गाद् अश्रव्यत्वम् । 'वदतु मधुरं यत्स्यादन्यत्

प्रियादशतच्छदात्' इति युक्तः पाठः।

यस्मिन् पादे पादान्त्य लघोर्गुकार्याक्षमत्वं तद् अप्राप्तगुरुभावान्तलघु। यथा -

**विकसितसहकारतारहारिपरिमलगुञ्जतपुञ्जितद्विरेफः**

अत्र पुष्पिताग्रायां छन्दसि'वापादान्ते' इति छन्दः शास्त्रेण पादान्तस्य गुरुत्वाच्छन्दोभङ्गाभावेऽपि प्रथमपादान्तवर्तिनः हारि इत्यत्र इकारस्य लघो र्गुरुकार्यकरणाक्षमत्वं बन्धशैथिल्याद् बन्धशैथिल्यमेव दूषकताबीजम् । प्रकृतरसाऽननुगुणं वृत्तं यथा-

**हा नृप हा बुध हा कविबन्धो विप्रसहस्रसमाश्रय देव।**
**मुग्धविदग्ध्सभान्तररत्न क्वासि गतः क्व वयं च तवैते।।**

इदं दोधकं वृत्तं शोकाऽननुगुणम् तद्विरोधिहास्यव्यञ्जकत्वात् । अतो दोष एव । अत्रेदं बोध्यम्- करुणे मन्दाक्रान्तावियोगिनीपुष्पिताग्रादीनामेवानुगुणत्वम्, शृङ्गारादौ पृथ्वीस्रग्धरादीनाम् वीरादौ शिखरणीशार्दूलविक्रीडितानामानुगुण्यम् हास्ये च दोधकस्य पञ्झटिकादेश्च प्रतिपदविच्छेदित्वेनानुगुण्यमिति। प्रतिकूलवर्णत्वं दूशक्ताबीजम् । नीरसे च नास्यात्मलाभ इति नित्यदोषतास्य।

**३. समाप्तपुनरात्तत्वम्-** क्रियाकारकान्वयेन समाप्तेऽपि वाक्ये विषेषामिधित्सां विना पुनस्तद् वाक्यान्वयिपदाभिधानं यत्र वाक्ये तत्, तस्य भावः समाप्तपुनरात्तत्वम्।

**क्रेङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवः**
**झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः।**
**तन्व्या कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कणः**
**क्वाणः प्रेम तनोतु वो नवयोलास्याय वेणुस्वनः।।**

अत्र 'क्वाणः प्रेम तनोतु वः' इत्येन वाक्यसमप्तावपि पुनः तत्क्वाणस्य कुर्तुः नवेत्यादिवेशेषणाभिधानं कृतम्, न च तत्र विशेषणादन्यत्प्रयोजनमस्ति, इति समप्तपुनतात्तत्वं दोषः। अत्र निरकाङ्क्षित्वमेव दुष्टताबीजम् अभवन्मतयोगत्वं च क्वचिद् विभक्तिभेदनिबन्धनम् क्वचिन्न्यूनतादिनिबन्धनम् क्वचिदाकाङ्क्षाविरहनिहनिबन्धनम् क्वचिद् वक्यव्यङ्ग्ययोर्विवक्षितयोगाभावनिबन्धनम् क्वचित् समासच्छन्नतया मततोगाभावनिबन्धनम्, क्वचिद् व्युत्पत्तिविरोधनिबन्धनं च भवति। यथा-

**येद्षां तास्त्रेदशेभदानसरितः पीताः प्रतपोष्मभिः।**
**लीलपनभुवश्च नन्दनवनच्छायसु यैः कल्पिताः।।**

**येषां हुङ्कृतयः कृतामरपपतिक्षोभाः क्षपाचारिणां**
**किं तैस्त्व त्परितोषकारि विहितं किञ्चित्पवदोचितम्।।**

अत्र 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्' इत्युक्तनन्येन यच्छब्दनिर्देशयानाम् अर्थानां परस्परम् असमन्वयेन यैरित्यत्र विशेष्यस्याप्रतीतिरिति अभवन्मतयोत्वं दोषः। अयं भावः- गुणानाम् अप्रधनानां विशेषणानामित्यर्थः, परार्थत्वं-प्रधानान्वयापेक्षित्वात्, असम्बन्धः- परस्परम् अनन्वयः समन्वयात् परापेक्षक्षाया नियतर्वात्। यद्वा - परापेक्षित्वतौल्यादित्यर्थः (सभी विशेषण समानरूप से दूसरे अर्थात् प्रधान के सापेक्षी हेतो हैं, इत्यर्तः।) गुणानां परस्परम् अनाकाङ्क्षतया न परस्परम् अन्वयः, किन्तु प्रधानेनैव गुणानाम् अन्वय इति भावः। एवं च गुणप्रधन भावेनैव पदार्थानामन्वयो न गुणान न वा प्रधानानां परस्परम् अनाकाङ्क्षित्वादिति निष्कर्षः। प्रकृते तु यैरिति यदर्थस्य विशेष्यतया क्षपाचारिसम्बन्धो विवक्षितः स च न घटते, भिन्नविभक्ति कत्वात् । अतः अभवन्मतयोगत्वं दोषः स्पष्टमेव। क्षपाचारिभिरिति पाठे न दोषः।

**५. सङ्कीर्णत्वम्** - वक्यान्तरपदानां वाक्यान्तरेऽनुप्रवेशः सङ्कीर्णत्वम् यथ

**किमिति न पश्यसि कोण्ण पादगतं बहुगुणं जृहाणेमम् ।**
**ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम् ।।**

अत्र पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि, इमं कण्ठे गृहाणमनसस्तमोरूपं कोपं मुञ्चेति वाक्यत्रयम् । इदं वाक्यत्रयं परस्परपदसङ्कीर्णमिति सङ्कीर्णत्वं दोषः। अत्र वाक्यत्रयेऽन्यवाक्यस्थपदम् आदाय अनभिमतप्रतीयते, इदमेव ददुष्टिबीजं प्रतीतिविलम्बो वा।

**६. गर्भितत्वम्-** वाक्यान्तरे वक्यान्तरानुप्रवेशो गर्भितत्वम् । यथा

**परापकारनिततैर्दुर्जनैः सह सङ्गतिः।**
**वदामि भवतस्तत्त्वं न विधेया कदाचन।।**

अत्र **वदामि भवतस्तत्त्वम्** इति वाक्यान्तरं प्रथमवाक्यस्य मध्ये प्रविष्टमिति गर्भितत्वं दोषः। एवं च सङ्गतेः सदसत्त्वसंशयोऽन्त्यपादे कर्मसाकाङ्क्षत्वंचेति दूषकताबीजमिति प्रदीपोद्योतयोः स्पष्टम् । सङ्कीर्णे गर्भिते चानासत्तिरेवदूषकताबीजमिति सरबोधिनीकारः।

**७. प्रसिद्धिहतत्वम्-** प्रसिद्धिमतिक्रान्तमिति प्रसिद्धिहतम् । तस्य भावः प्रसिद्धिहतत्वम् । तत्र किं कुत्र प्रसिद्धिम् इत्युच्यते-

**मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृतिः**
**स्तनितमणितादि सुरते मेधादिषु गर्जितप्रमुखम् ।।**

मञ्जीकरादीति आदिपदेन रशनाघण्टाभ्रमरादिपरिग्रहः। स्तनितमणितादीति आदिपदेन भणितादिपरिग्रहः। सर्वत्र प्रसिद्धिमिति दोषः। उदाहरणं यथा-

**महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचण्डघनार्जितप्रतिरूतानुकारि मुहुः।**
**रवः श्रवणभैरवः स्थगितरोदसीकुन्दरः कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः।।**

**८. भ्नप्रक्रमत्वम्** - भग्नः- नष्टः, प्रक्रमः- प्रस्तावः, उपक्रमः, यत्र वाक्ये तद् भग्नप्रक्रमम्, तस्य भावः बग्नप्रक्रमत्वम् । भब्नप्रक्रमत्वं च प्रकृतिप्रत्ययसर्वनामपर्यायादिविषयत्वाद् अनेकधा व्यवस्थितम् । अत्र प्रकृतेर्भग्नप्रक्रमत्वं यथा-

**नाथ निशाया नियतेर्नियोगादस्तं गते हन्त निशापि याता।**
**कुलाङ्गच्चनां हि दशानुरूपं नाऽतः परं भद्रतरं समस्ति।।**

अत्र **अस्तं गते** इति गमिरूपायाः प्रकृतेः प्रस्तावे **याता** इति यारूपायाः प्रकृतेः प्रयोगः कृतः, इति प्रकृतिप्रकामभङ्गत्वं दोषः। 'गता निशापि' इति युक्तः पाठः। एवमन्यानि उदाहरणानि ज्ञेयानि।

**७. प्रश्नः** - **'**अत्राकर्णक्रियाकर्मत्वे कोदण्डं शरानित्यादि वाक्यार्थस्य कर्मत्वे कोदण्डः शरा इति प्राप्तम्। न च यच्छब्दार्थः तद्विशेषणं वा कोदण्डादि । न च केन केनेत्यादि प्रश्नः**'** अयं सन्दर्भः व्याख्यायताम् ।

**उत्तरम्-** अत्र अभवन्मतयोगस्य आकाङ्क्षावारहनिवन्धने, अस्मिन् उदाहरणे - **'**सङ्गामाङ्गणमागतेन**'** इत्यादिपद्ये यदि कोदण्डादयः आकर्णनक्रियायाः कर्मणि तदा कोदण्डं शरानिति द्वितीया क्प्राप्नोति, **'**कर्मणि द्वितीया**'** इत्यनुधासनात् । यदि कोदण्डादीनां वाक्यार्थविधयाऽन्वयस्तर्हि यो यो वीरः समायातस्तं तं शृणु महीपते। भीष्मो द्रोणः कृपः कर्णः सोमदत्तिर्धनञ्जयः।। इत्यादिवत् परस्परमनन्वितार्थकत्वात् कोदण्डादिशब्देभ्यः कोदण्डः, शराः' इति प्रथमा स्यात्, कर्मत्वाद्यभावात् शुद्धप्रातिपदिकर्थे प्रथमाविभक्तेरनुशासनात्।

ननु यच्छब्देन कोदण्डादिरेव प्रतीयते। ततश यथा यच्छब्दात् तृतीया तथा कोदण्डादितस्तृतीया युक्तेकेति चेत्? न । तथा सति कोदण्डादीनां पुन्रुपादानं **'**घटः**'** इतिवद् व्यर्थं स्यात्। न च कोदण्डादेर्यच्छब्दार्थो विशेषणम् अथवा यच्छब्दार्थस्य कोदण्डादिविशेषणमिति वाच्यम् । अद्ये येन कोदण्डेन यत् शराः समासादितं तद् आचर्णयेति

वक्यार्थ्पर्यवसानेन पूर्वोक्त एव दोषः।

ननु येन यदिति सामान्यतोऽवगमने ‘ केनकेन किं किम् ’ इति विशेषप्रश्ने सति तदुत्तरतया ‘कोदण्डेन शराः’ इत्याद्युक्तमिति चेत् ? न । केन केनेति प्रशनाभावात् । न च, न कथं प्रश्नः? प्रश्नवाचकपदाभावात् । येन यद् यत् समासादितं तद् आकर्णयेति प्रतिज्ञयैव कोदण्डादीनामुक्तत्वादिति भावः।

**८.प्रश्नः** - नैकं पदं द्विः प्रयोज्यं इत्यस्याशयं वर्ण्यत।

**उत्तरम्-** ननु भग्नप्रक्रमे एकस्य शब्दस्य द्विःप्रयोगो न कर्त्तव्यः, इति यदुक्तं तद् वदतो व्याघात एव । तादृशस्थले कथितपदत्वाङ्ग्ग्रीकारादिति चेत्? न । उद्देश्यप्रतिनिर्देश्याद् व्यतिरिक्तो हि एकपदस्य द्विः प्रयोगो निशेधस्य विषयः। उद्देश्यप्रतिनिर्देश्ये तु तस्य शब्दस्य सर्वनाम्नो वा प्रयोगः क्रियते। अन्यथा पदान्तरेण स एवार्थः प्रतिपाद्यमानः एक्यज्ञानं तिरोधत्ते, इति दोष एव । अत एव उद्देश्यप्रतिनिर्देश्यभावे कथपदस्यादोषत्वं द्विःप्रयोगौचित्यं च । तथाहि-

**उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।**
**सम्पत्तौ च विपत्तौ च महतामेकरुपता।।**

अत्र पद्ये उद्देश्यप्रतिनिर्देश्यभावसत्त्वात् ताम्रशब्दस्य पुनरुपादानं कृतम् । अत्र 'रक्त एवास्तमेति' इति यदि क्रियेत, तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयेव प्रतिभासमानः प्रतीतिं स्थगयेदिति दिक् ।

**९. प्रश्नः** - अर्थदोषान् परिगण्य्य, अपुस्स्टार्थत्वम् कष्टत्वम् व्याहतत्वम् निर्हेतुत्वम, प्रसिद्धिविरुद्दत्वम्, त्यक्तपुनःस्वीकृतत्वम् , इतीमान् दोषान् लक्ष्येषु समन्वयत।

**उत्तरम् - अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः।**
**सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च।।**

**अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः।**
**साकाङ्क्षेऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः।।**

विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः। दुष्ट इति लिङ्ग्विपरिणामेत सम्बध्यते इमे त्रयोविंशतिविधा अर्थदोषाः।

**१. अपुष्टार्थत्वम्** - प्रकृतप्रतिपद्यानुपयोगित्वम् अपुष्टार्थत्वम् । दूषकताबीजं तु मुख्यनुपयोगिनोर्थस्य संस्थितिहेतुत्वानुसन्धानविलम्बेन रसप्रतीति विलम्बः। यद्वा - दशक्त्युत्रयनेन श्रोतुर्वैमुख्यम् । उदहरणं यथा-

**अतिविततगगनसरणिप्रसरणपरिमुक्तविशमानन्दः।**
**मरुदुल्लासितसौरभकमलाकर्हासकृद्रविर्जयति।।**

अत्र अतिविततत्व सरणित्व-मरुदुक्कासितसौरभत्वरूपाणार्थानामनुपादानेऽपि प्रकृतार्थस्याक्षतेरपुष्टार्थत्वं दोष;।

**२. कष्टत्वम्-** प्रतीतिक्लेशवत्वम्, दुरुहत्वमित्वर्थः। उदाहरणं यथा-

**सदा मध्ये यासामियममृत्तनिःस्यन्दसुरसा,**
**सरस्वत्युद्दामा वहति बहुमार्गा परिमलम् ।**
**प्रसादम ता एता घनपरिचिताः केन महतां**
**महाकव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः।।**

अत्र प्रकृतपक्षे- यासां कविरुचीनां मध्ये सुकुमारविचित्रमध्यमात्मकत्रिमार्गा भारती चमत्कारं वहति, ता गम्भीरकाव्यपरिचिताः कथमितरकाव्यवत् प्रसन्नाः- सुबोधाः, भवन्तु न कथमपीत्यर्थः। अयं प्रकृतोऽर्थो दुर्बोधः।

अप्रकृतपक्षे च -यासामादित्यप्रभानणां मध्ये त्रिपथघामिनी गङ्गानाम नदी बहति, ता मेघपरिचिता वर्षाकलीनाः सत्यः केन प्रकारेण स्वच्छतां यान्तु, न कथमपीत्यर्थः। अयम् अप्रकृतोऽर्थशाऽत्यन्तमेव दुर्बोध इति कष्टत्वं दोषः। सम्यक्प्रतीतिविरहश्च दूषकताबीजम्। अयं नित्यो दोषः।

**३. व्याहतत्वम् -** कस्यचित्प्रागुत्कर्षम् अपकर्ष वाऽभिधाय पश्चात् तदन्यप्रतिपदनं व्याहतत्वम्। उक्तं च-

**उत्कर्षो वाऽपकर्षो वा प्राग्यस्यैव निगद्यते।**
**तस्यैवाथ तदन्यश्चेद् व्याहतोऽर्थस्तदा भवेत् ।।**

**उदाहरणं यथा-**

**जगति जयिन्स्ते ते भावा नवेन्दुकलादयः,**
**प्कृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।**
**मम तु यदियं यातालोके विलोचनचन्द्रिका**
**नयनविषयं जन्मन्येकः स एव महोत्सवः।।**

अत्रेन्दुकलादयो यं प्रतिपस्पशप्रायाः - तुच्छप्रायाः स एव माधवो मालत्याकुत्कर्षार्थं चन्द्रिकात्वमारोपयतीति व्यहतत्वम् दोषः। अत्राहुः कमलाकरभट्टाः 'अत्रहेयोपादेयत्वविरोधो दूषकताबीजम् इति। प्रदीपकारास्तु- वाक्यार्थाऽप्रतीतिर्दुषक्ताबीजम्, नित्योऽयं दोषः इत्याहुः।

**४. निर्हेतुत्वम्** - निष्क्रान्तो हेतुर्यस्माद् अनुपात्तहेतुकोर्थो निर्हेतुरिति यावत्, तस्य भावस्तत्त्वम् - निर्हेतुत्वम् । हेतोराकाङ्क्षासत्त्वेऽपि तदनुक्तत्वेन तदनुसन्धानविलम्बाद् रसप्रतीतिविलम्बो दूषकताबीजम् । प्रतिप्रसवाद् अनित्योऽयं दोषः। उदाहरणं यथा -

**गृहीतं येनासि परिभवभयान्नोचितमपि**
**प्रभवाद्यस्याभून्न खलु तव कश्चिन्न विषयः।**
**परित्यक्तं तेन त्वमसि सुतशोकान्त तु भया-**
**द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते।।**

अत्र यथा द्रोणाचार्यकर्तृकशस्त्रमोचने 'सुतशोकात्' इति हेतुरुक्तस्तथा अश्वत्थामाकर्तृकशस्त्रमोचने 'पितृशोकात्' इति हेतुर्वक्तव्यः, स च नोक्त इति निर्हेतुकत्वं दोषः।

**५. प्रसिद्धिद्विविरुद्धत्वम्** - यत्रार्थे न प्रसिद्धिः, स प्रसिद्धिविरुद्धः, तस्य भावस्तत्त्वं प्रसिद्धिविरुद्धत्वम् । विरोधादर्थातीतिरेव दूषकताबीजम् । प्रतिप्रसवस्य सम्भवाद् अनियोऽयं दोषः। स च द्विविधः - लोकप्रसिद्धिविरुद्धः कविप्रसोद्धिविरुद्धश्च । तत्र लोकप्रसिद्धिविरुद्धो यथा-

**इदं ते केनोक्तं कथय कमलातङ्कवदने,**
**यदेतस्मिन् हेम्नः कटकमिति धत्से खलुधियम् ।**
**इदं तद्दुःसाधाक्रमणरमास्त्रं स्मृतिभुवा**
**तव प्रीत्या चक् करकमलमूले विनिहितम् ।।**

अत्र कामत्य चक्रं लोके न प्रसिद्दमिति प्रसिद्धिविरुद्धार्थत्वात् प्रसिद्धिविरुद्दत्वं दोषः।

एवं कविप्रसिद्दिविरुद्दोऽपि ज्ञेयः। यथा - पादाघातेन अशोकस्य सुआह्पोद्गमः कविषु प्रसिद्दः, अङ्कुरोद्गमवर्णनं तु पुनर्दोष एव।

**६.त्यक्तपुनः स्वीकृतत्वम्** - क्रियाकारकाऽन्वयेन निराकाङ्क्षतया समाप्तेऽपि वाक्ये पुनः कारकान्तराभिधानं त्यक्तपुनःस्वीकृतत्वम् । क्प्रतिप्रसवाऽभावाद् नित्योऽयं दोषः। उदाहरणं यथा-

**लग्नं रागवृताङ्ग्यासुदृढमिह ययैवासिष्टयारिकण्ठे**
**मातङ्गानामपीहोपरि परपुरुषैर्या च दुष्टा पतन्ती।**
**तत्सक्तोऽयं न किञ्चिद् गणयति विदितं तेऽस्तु तेनास्मि दत्ता**
**भृत्येभ्यः श्रीनियोगाद् गदितुमिति गतेवाम्बुधि यस्य कीतिः।।**

अत्र **नकिञ्चिद् गनयति** इत्यन्तेन कर्मकारकेण विदिक्रियाऽन्वेये समाप्तेऽपि 'भृत्येभ्यः' इत्यादिना पुनः कर्मकारकाभिधानमिति त्यक्तपुनःस्वीकृतत्वं दोषः। समाप्तपुनरात्ते तु पूर्वोक्तस्यैव कारकस्य विशेषणदानमिति भेदः। अर्थाद् विशेषणमात्रेण पुनरुपादानं समाप्तपुनरात्तत्वम्, विशेष्यीभूतकान्तरेण पुन्रुपादानं तु त्यक्तपुनःस्वीकृतत्वमिति भेदः। दूषकताबीजं च अप्र्योजकत्वं शृदयवैरस्याधानं वा।

**१०. प्रश्नः**- निर्हेतुत्वम् श्रुतिकटुत्वम्, श्रुतिकटुत्वम् ,अप्र्युक्तत्वम्, निहनार्थत्वम्, अप्रतीतत्वम्, इत्येते कुत्र निर्दोषत्वं कुत्र च गुणत्वं भजन्ते? इति सोदाहरणं निर्दिश्यताम्?

**उत्तरम् - ख्यातेऽर्थे निर्हेतोरदृष्टता।**
**प्रसिद्धेऽर्थे निर्हेतुत्वं हेतुं नपेक्षते । यथा-**

अत्र रात्रौ चन्द्रगताया लक्ष्म्याः पद्मगुणाऽनुपभोगे पद्मसङ्कोचो हेतुः, दिवा च पद्मश्रितायाः चन्द्रगुणाऽनुपभोगे चन्द्रस्य निष्प्रभत्वं हेतुः। ते चातिप्रसिद्देरेवागम्येते, इति न तदुपादानापेक्षेति न निर्हेतुत्वं दोषः।

अत्र वक्ता श्रोता वावैयाकरणः तत्र कष्टत्वं (क्लिष्टत्वम्) न दोषः, प्रत्युतगुणः। एवमेव रौद्रादौ व्यङ्ग्येऽपि कष्टत्वं गुण एव । दिङ्मात्रमुदाह्रियते-

**दीधीङ्वेवीङ्समः कश्चिद् गुणवृद्ध्योरभाजनम् ।**
**क्वप्प्रयत्ययनिभः कश्चिद् यत्र सन्निहिते न ते।।**

अत्र विलम्बेनार्थप्रत्ययेऽपि वक्तुर्व्याकरणव्युत्पत्त्यतिशयप्रतीतेर्गुणत्वम् । एवं प्रतिपाद्येऽपि उदाहरणं ज्ञेयम्।

श्लेषयमकाराव अप्रयुक्तत्वनिहतार्थत्वे नदुष्टे। यथा

**येन ध्वस्तमनोभवेन बिलजित्कयः पुरा स्त्रीकृतो**
**उश्चोद्वृत्तभुजङ्गहारवलयो गङ्गाच योऽधारयत् ।**
**यत्याहुः शशिमच्छितोहर इति स्तुत्यं च नामामरः**
**पायात्स स्वयमन्धककाहयकरस्त्वां सर्वदो माधवः।।**

अत्र माधवपक्शे (विष्णुपक्षे) शशिमत्पदस्य रहो अप्रयुक्तत्वम् क्षयपदस्य गृहे निहतार्थत्वं च न दोषः, श्लेषनिर्वाहकत्वात् । वक्तृश्रोत्रोर्द्वयोरपि तच्छास्त्रपटुत्वे स्ति अप्रतीतत्वं गुणः। यथा-

**आत्मारामा विहितरतयो निर्विकल्पे समाधौ**
**ज्ञानोद्रेकाद् विघटितममोग्रन्थयः सत्त्वनिष्ठाः ।**
**यं वीक्षन्ते कमपि तमसा ज्योतिषां वा परस्तात्**
**तं मोहान्धः कथमयमयुं वेत्ति देवं पुराणम् ।।**

अत्र विर्विकल्पादिशब्दाआत्ममात्रावलम्बतत्वदावर्थे योगशास्त्रमात्रप्रसिद्वाः इत्यप्रतीताः, तथाऽप्यत्र प्रतिपाद्यप्रतिपादकौ सहदेवभीमसेनो, तौ च योगशास्त्रज्ञौ, इति प्रतीतिविलबाभावात् न दोषत्वमस्य। इतराज्ञातज्ञातृत्वेन स्वज्ञानद्बाता भावोत्कर्षकत्वाद् गुणत्वं चेति बोध्यम् ।

**११.प्रश्नः** - सोदाहरण रसदोषा लेख्याः?

**उत्तरम्** - ये साक्षाद्रसमपर्षयन्ति ते रसदोषाः। साक्षाद्रसापकर्षकत्वं रसदोषत्वमिति भावः। रसशब्दो.ऽत्र रसाभासादीनामपि उपलक्षणम् । ते च रसदोषाश्चतुर्दश भवन्ति-

**व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।**
**कष्टकल्पनाया व्यक्तिरनुभावविभावयोः।।**

**प्रतिकूलविभावादिग्रगो दीप्तिः पुनः पुनः।**
**अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिस्तृतिः।।**

**अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः।**
**अन्ङ्गस्याभिधानं च रसे दोषाः स्युरीद्दशाः।।**

क्रमेणोदाहरणादिकं प्रदश्यर्ते- १. व्यभिचारिभवस्य स्वशब्दवाच्यत्वम्। यथा -

**सव्रीडा द्यितानने समरुणा मातङ्गचर्माम्बरे,**
**सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि।**
**सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपाल्दरे,**
**पार्वत्या नवसङ्गमप्रणयिनी द्दष्टिः शिवायास्तु वः।।**

अत्र व्रीडादयो व्यभिचारिभावाः स्वशब्देनोपात्ताः न च स्वशब्दोपात्तेषु व्यभिचार्यादिषु आस्वादसम्भावोऽवुभूयते किन्तु अनुभावादिमुखेनैव व्यक्तेषु। तस्मादत्र व्यभिचारिभावस्य स्वशब्दवाच्यत्वं दोषः। आस्वादानुत्पत्तिः दोषत्वबीजम् । अत्रैव-

**व्यानम्रा दियतानने मुनुलिता मातङ्ग्चर्माम्बरे**
**सोत्कम्पा भुजगे निमेषरहिता च्न्द्रेऽमृतस्यन्दिनि।**
**मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे**
**पार्वत्या नवरङ्गमप्रणयिनी दृष्टिः शिवायाऽस्तु वः।।**

इति पाठे न दोषः। व्रीडादिनां व्यभिचारिणां नाऽत्र स्वशब्देनोपादानम् , किन्तु अनुभावैर्नम्रतादिभिरभिव्यक्तिरिति भावध्वनिरत्र भवति।

२. रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च- अत्र रसस्य सामान्यतो रसशब्देन वाच्यत्वं दोषो यथा-

**तामन्ङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम् ।**
**नेत्रयोःकृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः।।**

अत्र रसस्य सामान्तःरसवाच्यतादोषः। रसपदवाच्यत्वाद् आस्वादापकर्षः।

रसस्य विशेषतः शृङ्गारपदेन वाच्यत्वं दोषो यथा-

**आलोक्य कोमलकपोलतलाभिषित्कव्यत्तानुरागसुभगामभिराममूर्तिम् ।**
**पश्यैष बाल्यमतिवृत्त्य विवर्तमानः शृङ्गारसीमनि तरङ्तिमारनोति।।**

अत्र तसस्य विशेषतः शृङ्गारपदवाच्यत्वं दोषः। शृङ्गारपदवाच्यत्वाद् आस्वादापकर्षः।

३. स्थायिभावस्य विशेषत उत्साहपदेन वाच्यत्वं दोषो यथा-

**सम्प्रहारे प्रहर्णैः प्रहाराणां परस्परम् ।**
**ठणत्कारैः श्रुतिगतैसुत्साहस्तस्य कोप्यभूत्।।**

अर्तोत्साहस्य स्वशब्दवाच्यत्वं दोष;। अत्र ‘प्रमोदस्तस्य कोप्यभूत्’ इति चतुर्थचरणपाठे स्यात् स्थायिभावस्य सामान्यतः स्वशब्दवाच्यत्वं दोषः।

४. अनुभावविभावयोः कष्टकल्पनया व्यक्तिस्तु पृथक्श्लो काद्यनुसन्धेयप्रकरणादिपर्यालोचनया विलम्बेनाभिव्यक्तिः। तत्र अनुभावस्य कष्टकल्पनया व्यक्तिर्यथा-

**कर्पूरधूलिधवलद्युतिरधोतदिङ्मण्डले शिशिररोचिषि तस्य यूनः।**
**लीलाशिरोंशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नवयोवना सा।।**

अत्र स्तम्भादिरूपःकश्चन पुंनिष्टस्य शृङ्गाररसस्य अनुभावोऽभिमतः, स च प्रकरणाद्यनुसन्धाप्क्षतया विलम्बेन प्रतीयते, इति कष्टेन गम्यत्वाद सोषः।

५.विभावस्य कण्टकल्पनया व्यक्तिर्यथा-

**'परिहरति रतिं मती लुनीते स्खलतिभृशं परिवर्तते च भूयः।**
**इति बत विषमा दशाऽस्य देहं परिभवति प्रसभं किमत्र कुर्मः।।**

अत्र रतिपरिहारादीनाम् अनुभावानां करुणभ्यानकबिभस्तेष्वपि सम्भवेन कामिनीरूपो नायकनिष्ठस्य विप्रलम्भशृङ्गारस्यालम्बनविभावः प्रकरणवानुसन्धानेन विलम्बेनेति कष्टेन कल्पनीय इति दोषः।

**६.प्रतिकूलविभावादिग्रहः** - प्रकृतरसविरुद्धो यो रसादिः तद्विभाव अनुभवव्यभिचारिणाम् उपादानं दोषः। यथा -

**प्रसादे वर्तस्व प्रकटय मुदं सन्त्यज रूषं**
**प्रिये शुष्यन्त्यङ्गान्यामृतमिव ते विञ्चित्य वचः।**
**निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखम्**
**न मुग्धे प्रत्येतुं प्रभवति गतः कलहरिणः।।**

अत्र प्रकृते शृङ्गारे प्रतेकूलस्य शान्तरसस्य प्रकाश्यमानकालाऽनित्यतारूप उद्दीपनविभावः, एतत्प्रकाशितो निर्वेदरूप; शान्तस्थायिभावः स्फुटमेव गृह्यते, इति दोषः । विभावादिना प्रतिकूलरसस्याप्युपस्थित्या विरोधेन प्रकृतरसानास्वादप्रसङ्ग इति दूपपकताबीजम्।

**७.पुनः पुनः दीप्तिः** - दीपुतस्य स्वसामग्रीलब्धपरिपोषस्य अन्तरा विच्छिद्य विच्छिद्य ग्रहणम्। वेद्यान्तरसम्बन्धेन धाराया विच्छेदाद् विरसतापादनात्। पुनः पुनः दीप्तिस्तु अङ्गरसादीनामेव, न तु अङ्गिनो रसस्य। यथा कुमारसम्भवे रतिविलापे।

**८. अकाण्डे प्रथनम्** - अनवसरे एव रसस्य विस्तारः- वर्णनम्। यथा - वेणीसंहारे द्वितीयेऽङ्केऽनेकवीरक्षये प्रवृत्ते स्वपत्न्या भानुमत्याः सह दुर्योधनस्य शृङ्गारवर्णनम् । तदानीं करुणवीरादिरेवास्वाद्यते न तु शृङ्गारइति दोषः।

**९. अकाण्डे रसस्य छेदः** - यथा विरचरिते द्वितीयाङ्के राघवभार्गवयोः धाराधिरूढे वीररसे (युद्धोत्साहे ) कङ्गणमोचनाय गच्व्हामि' इति राघवस्योक्तौ अकाण्डे हि तथोक्तिर्व्याजेन निर्गमनं प्रतिपादयन्ती श्रीरामस्याऽवीरत्वे पर्यवस्यतीति नयके श्रीरामे वीररसो नास्वद्यते इति दोषः। तादृशे हि समाजे तथाऽऽचरनम् अशक्तिसन्देहापादकत्वाद् अकीर्तिपर्यवसायीति भावः।

**१०. अङ्गस्य** - अप्रधनस्य, अतिविस्तरेण वर्णनम् - यथा हयग्रीव वधे हयग्रीवस्य। तत्र हि विष्णुः प्रधानभूतो नायकः, तद्वर्णनं परित्यज्य हयग्रीवनाम्नो दैत्यस्य

जलकेलिवनविहाररतोत्सवादेर्नायकापेक्षया विस्तरेण वर्णनं हयग्रीवस्यैव नयकत्वं प्रत्यायति। तथा च तद्गत एव र्सः प्रधान्येनास्वाद्यते न तु नायकगतः प्रधानो र्सः, इति दोष एव।

**११. अङ्गिनोऽननुसन्धानम् -** अङगिनः प्रधानस्य, नायकस्य वाइकाया वा, अननुसन्धानम् - अपरामर्शः विस्मृतिरिर्यर्थः यथा - रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यनाम्नःसिंहलेश्वरकञ्चुकिन आगमनकाले सागरिकायारत्नावल्याख्याया मुख्यनायिकायाः विजयवर्मवृत्तान्तश्रवणासक्तेन राज्ञा वत्सराजेन (नायकेन) सागरिकाया नाममत्रस्याप्यग्रहणाद विस्मृतिः। तेन नाटिकाप्रतिपाद्यशृङ्गाररससो विच्छिन्नप्रायः, इति दोषः चमत्कारस्याऽप्रतीतेः।

**१२.प्रकृतीनां विपर्ययः** - यत्प्रकृतो यद्वर्णनम् अनुचितं तत्र तद्वर्णनं प्रकृतिविपर्ययः। प्रकृतयश्च दिव्याः, अदिव्याः, दिव्यादिव्याश्च, वीररौद्रशृङ्गारशान्तरसप्रधाना धीरोदात्त-धीरोद्दत धीरललित धीरप्रशाना उत्तममध्यमाधमाश्च । तत्र रतिहसशोकद्भुतानि वदिव्योत्तमप्रकृतिवद् दिव्येष्वपि। किन्तु रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया। तद्वर्णनं पित्रोः सम्भोगवर्णनमिव अत्यन्तमनुचितम् । यथा- कुमारसम्भवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोगशृङ्गारवर्णनम् अत्यन्तमनुचितमेव। एवम् अन्यदनौचित्यं देशकासादीनाम् अन्यथावद्वर्णनम्। तथा सति काव्यस्याऽसत्यताप्रतिभसेन धर्मादिजिज्ञासूनां काव्याध्ययनप्रवृत्त्यसम्भवः। एवं रस प्रतीतिरेव न स्यादिति भावः। सर्वेऽप्यमि दोषा अनौचित्यमूलविबन्धना एवे त्यवधेयम् ।

**१३. अनङ्गस्य** - रसानुपकारकस्य वर्णनम् - यथा कर्पूरमञ्जर्या राजनायिकयोः स्वयं कती वसन्तस्य वर्णनम् अनादृत्य वन्दिवर्णितस्य प्रशंसनम् । तच्च प्रकृतरसाऽनुपकरकमिति दोषः। एतदेव दूषकताबीजम् ।

**१४. ईदृशाः** - एवंविधाः अन्येऽपि अनौचित्यहेतवो रसदोषा भन्ति। यथा नायिकापादप्रहारादिना नायकस्य कोपदिवर्णनम् अनुचितमेव। अनौचित्यमेव रसविच्छेदहेतुः। उक्तं च ध्वनिकता-

**अनौचित्यादृते नाऽन्यद्रसभङ्गस्य कारणम् ।**
**औचित्योपनिबन्धस्तु रसस्योपनिषत्परा।। इति।**

१२. परस्पर विरुद्धयो रसयोः कथमेकत्र समावेशः पेत्

**आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः।**
**रसान्तरेणान्तरितो नैरन्तर्येण यो रसः।।**

अयं भावः - रसानं विरोधो द्विधा- दैशिकः कालिकश्च । अत्राद्ये यदि वीरभयानकयोरेकलम्बनत्वेन विरोधेस्तदा भयानको प्रतिनायकगतत्वेन वर्णनीयः। तदा भयानकस्य प्रतिपक्षगतत्वेनोपन्यास्व दूरे तस्य दोषत्वं प्रत्युत नयक- गतवीररसपरिपोषकत्वम्। द्वितीये नैरन्तर्येण - अव्यवधानेन, तु यो रसो विरुद्धः स रसान्तरेणाऽन्तरितः- व्यवहितः कार्यः। यथा शान्तशृङ्गारयोः नैरन्तर्येण विरोधोऽस्ति. अतो मध्येऽवीरोधिरसान्तरं निवेश्यम् यथा नागानन्दे नाटके जीमूतवाहनस्य नयकस्य शान्तो रसः मलयवतीनायिकाविषयकः शृङ्गारश्चेति विरुद्धौ, इति शङ्का, सा च 'अहो गीतम्, अहो वादित्रम्' इत्यनेन ग्रन्थेन अद्भुतरसस्य द्वयोर्मध्ये निवेशनात् परिहता। ध्वनिकृताऽप्युक्तम् -

**एकाशयत्वे निर्दोषो नैरन्तर्य विरोधवान् ।**
**रसान्तरव्यवधिना सों न्यस्यः सुमेधसा ।। इति ।**

अपि च - **समर्थमणो विरुद्धोऽपि साम्येनथ विवक्षितः।**
**अङ्गिन्यत्वमप्तौ यौ तौ न दुष्टौ परस्परम् ।। इति।**

अयं भावः विरुद्धोऽपि कश्चिद्रसः प्रधानरसेन स्मर्यमाणश्चेत् नदुष्टइति द्वितीयः प्रकारः इति अपि च विरुद्धावपि यो रसौ अङ्गिनि अर्थात् प्रधाने, अङ्गित्वम् अर्थाट् उपकरकत्वम्, प्राप्तौ चेत् तावपि मइथो न दुष्टौ, इति तृतीयः प्रकारः यथा -

**अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।**
**नाभ्यूरुजघनस्पर्शी नीवीविभ्रंसनःकरः।।**

अत्र करुणः प्रकृतत्वात् प्रधानम् शृङ्गारस्य अप्रकृतत्वाद् हीनबलत्वेनाङ्गत्वम्। एवं चात्र स्मर्यमाणशृङ्गारस्य करुणोद्दीपकतया तदङ्गत्वात् (तदुत्कर्षकत्वात्) न तयोः परस्परं विरोधः।

ननु वेद्यान्तरसम्पर्कशून्यं रसस्वरूपम् अत एकदा द्वितीयाभावात् कथं रसस्य रसान्तरेण विरोधः? कथं वा अङ्गाङ्गिभावः? इति समाधीयताम्?

ननु रस्यस्य विगलित्वेद्यान्तरत्वं ब्रह्मैव एकत्वं च पूर्वं निर्दिष्टम् स्थायिभावभेदात्। सअ नवधेत्यन्यदेतत्। तदत्र कथं रसस्य रसान्तरेण विरिधः कथं वा अयं स रस्नोत्कर्षी पीनस्तनविवर्धनः इत्यादौ अण्ग्लगाग्लिगभावो रसस्यैकत्वात् बहुत्वेऽपि प्रधानयोः द्वयोः परस्परं गुणप्रधानभावाभावाच्च इति न। अत्र प्रकरणे रस्यते आस्वाद्यते इति व्युत्पत्या रसपदेन स्थायी भावो गृह्यते।

तदुक्तं भरतेन -

बहूनां समवेतानां रूपं यस्य भवेत् बहु।
स मन्तव्यो रसस्थायी शेषाः सञ्चारिणो मताः।
रसान्तरेष्वपि रसाः बह्व्न्ति व्यभिचारिणः।
तहाहि ह्रासः शृङ्गारे रतिः शान्ते च दृश्यते।
क्रोधो वीरे भयं शोके जुगुप्साच भयानके।।
उत्साहविस्मयौ सर्वरसेषु व्यभिचारिणः।।

एवञ्च अयं स रसनोत्कर्षी इत्यादौ शृङ्गारपदेन रतिः, स्थायीभावःगृह्यते, किञ्चात्र रत्यादेः स्थायित्वमपि नास्ति, तहापि किंचित्प्रधानविवक्षया स्थायित्वव्यपदेशः इति पूर्वोक्तसन्देहलवस्यापि अवकाशः, इति सर्वमवदातम् ।

////// सप्तमः उल्लासः/////

## अष्टमः उल्लासः

## गुणविमर्शः

४.१.प्रस्तावना
४.२.उद्देश्यम्
४.३.काव्यशास्त्रे गुणस्वरूपम्
    ४.३.१.काव्यशास्त्रस्य संप्रदायानां संक्षिप्तः परिचयः
    ४.३.२.गुणसंप्रदायः - गुणानां काव्याङ्गत्वनिरूपणम्
    ४.३.३.गुणाः - तद्भेदाश्च
४.४ काव्यप्रकाशस्य अष्टमोल्लासस्य प्रतिपाद्यः विषयः
    ४.४.१. काव्यप्रकाशस्य स्वरूपम्
    ४.४.२. अष्टमोल्लासस्य स्वरूपम्
    ४.४.३. प्रतिपाद्याः गुणाः
४.५. प्राचीनानां मतानुसारं गुणविषये मतभेदाः- मम्मटस्य मतानुसारं गुणविषये मतभेदः
    ४.५.१.गुणानां वर्णधर्मत्वम् उत रसधर्मत्वम्
    ४.५.२.गुणालङ्कारयोर्भेदः
    ४.५.३.गुणाः- लाक्षणानि
    ४.५.४.प्राचीनोक्ताः गुणाः-तेषां गुणत्रये अन्तर्भावः
४.६.गुणाभिव्यञ्जकाः वर्णाः रचनाश्च
    ४.६.१.माधुर्याभिव्यञ्जकाः वर्णाः-रचना च
    ४.६.२.ओजोऽभिव्यञ्जका वर्णाः-रचना च
    ४.६.३.प्रसादाभिव्यञ्जका वर्णाः-रचना च
७. रचनावृत्तिवर्णानाम् गुणाश्रितानामपि अन्यथात्वं कथं भवतीति विचारः
    ४.७.१.रचना गुणाश्रितापि वाक्त्राद्यौचित्यभेदेन भिन्ना
    ४.७.२.वृत्तिः गुणाश्रितापि वाक्त्राद्यौचित्यभेदेन भिन्ना
    ४.७.३.वर्णाः गुणाश्रिता अपि वाक्त्राद्यौचित्यभेदेन भिन्नाः
४.८.सारांशः
४.९.बोधप्रश्नाः
४.१०. अभ्यासप्रश्नाः

### ४.१.प्रस्तावना-

साहित्याचार्यस्य द्वितीयवर्षस्य द्वितीयपत्रे काव्यप्रकाशस्य सप्तमः अष्टमः नवमः दशमश्च उल्लासाः पठनीयाः भवन्ति। काव्यप्रकाशः काव्यशास्त्रीयः ग्रन्थः। अस्य पूर्वभागः

प्रथमवर्षे भवद्भिः पठितः। ततः ज्ञायते यत् काव्यप्रकाशः समन्वयात्मकः ग्रन्थः इति। काव्यजीवितविषये काव्यात्मविषये काव्यलक्षणविषये च आचार्याणां मतैक्यं नास्ति। फलतः संस्कृतसाहित्यशास्त्रे षट् सम्प्रदायाः प्रादुरभूवन् । तेषु गुणसम्प्रदायः अन्यतमः। परं मम्मटः एतान् सम्प्रदायान् ध्वनिकारमतानुसारं रसस्य अङ्गतया व्याख्याय समन्वितान् चकार। तत्र काव्यं संलक्ष्य भेदनिरूपणावसरे ध्वनि-मध्यम-चित्र-काव्यरूपेण त्रिधा विभज्य हेयतया ज्ञतव्यान् दोषान् समग्रतया सप्तमे उल्लासे परिचाय्य अष्टमे उल्लासे आदेयतया गुणान् विशदयति। २६

**४.२.उद्देश्यम्-**

"तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि" इति काव्यस्य लक्षणे शब्दार्थयोः विशेषणतया सगुणौ इति पदं निवेशितम् । गुणैस्सह वर्तेते इति सगुणौ । अत्र गुणानां विमर्शनमेव प्रधानमुद्देश्यम्। अस्य पठनेन

- गुणस्वरूपम्
- गुणसामान्यलक्षणम्
- काव्यतत्त्वघटकतया गुणानां महत्त्वम्
- गुणानां काव्याङ्गता
- गुणाः - तद्भेदाश्च
- प्राचीनानां मतानुसारं गुणविषये मतभेदाः
- मम्मटस्य मतानुसारं गुणविषये मतभेदः
- गुणानां वर्णधर्मत्वम् उत रसधर्मत्वम् इति विमर्शः
- गुणालङ्कारभेदः
- गुणानां लाक्षणानि
- गुणानाम् उदाहरणानि
- प्राचीनोक्ताः गुणाः
- प्राचीनोक्तगुणानां लक्षणानि
- प्राचीनोक्तगुणानां मम्मटोक्तगुणत्रये अन्तर्भावः
- गुणाभिव्यञ्जकाः वर्णाः
- गुणाभिव्यञ्जिकाः रचनाश्च

इत्येते अंशाः सम्यग् ज्ञाताः भवन्ति।

## ४.३.काव्यशास्त्रे गुणस्वरूपम्

भामहादिमतानुसारं विकसितं काव्यशास्त्रं दण्डिना गुणसम्प्रदायमनुसृत्य परिवर्धितम्। तदनुसारम् अलंकाराणामपेक्षया गुणैरेव काव्यशोभा वर्धते इति अयमेव दण्डिनः वामनस्य च आशयः। अत एव - **काव्यशोभायाः कर्तारो धर्मा गुणाः, 'तदतिशयहेतवस्त्वलंकाराः'** इति काव्यशोभाकरान् धर्मान् अलंकारान् गुणांश्च प्रचक्षते । तदेवात्र सक्षेपतः विचार्यते।

**२ स्वावलोकनप्रश्नाः**

१.गुणाः नाम के?

२.गुणसामान्यलक्षणं किम्?

३.काव्यतत्त्वघटकतया तेषां कीदृशं महत्त्वम्?

४.गुणानां काव्याङ्गत्वनिरूपणं कथं भवति?

### ४.३.१.काव्यशास्त्रस्य संप्रदायानां संक्षिप्तः परिचयः-

साहित्यशास्त्रीयपरम्परायाः पर्यालोचनेन ज्ञायते यत् विचारभेदात् कतिपये वर्गाः सञ्जाताः। तेषां परिचयाय तन्मतानि विवेचनीयानि सन्ति। अलंकारसर्वस्वटीकाकर्त्रा समुद्रबन्धेनोक्तम् ।

इह विशिष्टौ शब्दार्थौ काव्यम्, तयोश्च वैशिष्ट्यं धर्ममूलेन, व्यापारमूलेन व्यङ्ग्यमुखेन वा इति त्रयः पक्षाः। आद्ये अलकारतो गुणतो वा इति द्वैविध्यम् । द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्।

इति पञ्चसु पक्षेषु आद्यः उद्भटादिभिरङ्गीकृतः। द्वितीयो दण्डिवामनाभ्याम्। तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन। पञ्चमः आनन्दवर्धनेन इति।

अयमाशयः- रमणीयौ शब्दार्थौ काव्यनाम्ना व्यपदिश्येते। शब्दर्थयोः रमणीयता च धर्ममुखेन यद्युच्यते तदा गुणः अलंकारश्च इति द्वौ तादृशौ धर्मौ सम्भवतः, तत्र गुणकृतवैशीष्ट्यवादिनौ काव्यस्य जीवनाधायकं गुणमाहतुः। अलंकारकृतं वैशिष्ट्यमाद्रियमाणा उद्भटादयश्चालङ्कारान् काव्यजीवनाधायकान् स्वीकुर्वन्ति। यदि शब्दार्थयोः रमणीयता

तद्व्यापारद्वारा मन्यते तदापि व्यापारो द्विविधः सम्भवति। भणीतिवैचित्र्यमूलः भोगकृत्त्वमूलश्च। तत्र भणितिवाग्चित्र्यकृतं वैशिष्ट्यमभ्युपगच्छन्तः कुन्तकादयः वक्रोक्तिः काव्यजीवितमिति मन्यन्ते, भोगकृत्त्वमूलकं मन्यमानाः भट्टनायकादयः भोजकत्वरूपं व्यापारान्तरं मन्यन्ते, तदेव तत्र वैशिष्ट्यमाहुर्ये ते ध्वनिप्रस्थानं स्वीकुर्वन्ति आनन्दवर्धनादयः।

एवमत्र शास्त्रे बहवः सम्प्रदायाः प्रादुर्भूताः। ते च अत्र एवं भवन्ति। रससम्प्रदायः भरतेन प्रपञ्चितः। अलंकारसम्प्रदायः भामहादिभिरादृतः। गुणरीतिसम्प्रदायः दण्डिवामनाभ्यां समादृतः। वक्रोक्तिसम्प्रदायः कुन्तकेन उद्भावितः। ध्वनिसम्प्रदायः आनन्दवर्धनेन प्रादुर्भावितः। औचित्यसम्प्रदायः क्षेमेन्द्रेण दर्शितः। एवमलंकारशस्त्रे षट् सम्प्रदायाः आविर्बभूवुः।

एतेषु संप्रदायेषु ध्वनिसंप्रदायः सर्वमान्यः । तत्रैव रसवादिनः अपि परिगण्यन्ते। वक्रोक्तिसंप्रदायस्य औचित्यसंपदायस्य च अनुयायिनः न सन्ति। अलंकारसंप्रदायस्य वर्धनम् अनेके आचार्याः अकार्षुः। तेषु भामहः आद्यः। ततः आरभ्य जयदेवपर्यन्तं नैके आचार्याः अलंकारसंख्यां संवर्धयामासुः। गुणानां विषयेऽपि ईदृशी एव स्थितिः। भरतेन उक्तान् गुणान् विभज्य शब्दार्थोभयगतत्वेन त्रिधा विभज्य मम्मटात्पूर्वं दण्डिवामनौ सम्यक्प्रपञ्चितवन्तौ । तेषु वामनस्य गुणविभागः सुनिशितः। तथापि गुणानामाश्रयविषये वामनस्य आशयः न स्पष्टः। आनन्दवर्धनः गुणानपि काव्यात्मतया स्थितस्य रसस्य अङ्गतया व्यवस्थापयामास। तन्मतं पुरस्कृत्य मम्मटोऽपि काव्यप्रकाशे अष्टमोल्लासे गुणचर्चां चकार। स एव अत्र विचारणीयः अंशः।

**स्वावलोकनप्रश्नाः**

१. साहित्यशास्त्रे कति सम्प्रदायाः भवन्ति?

२. साहित्यशास्त्रीयसम्प्रदायाः के?

३. तत्सम्प्रदायभेदे कायुक्तिः?

### ४.३.२.गुणसंप्रदायः - गुणानां काव्याङ्गत्वनिरूपणम् -

अस्य सम्प्रदायस्य प्रवर्तकः दण्डी। यद्यपि गुणानां विषये आचार्यः भरतोऽपि चर्चयति- तथापि काव्यसत्ता गुणैरेव सिद्ध्यतीति प्रतिपादयति दण्डी। तस्य समर्थकः आचार्यः वामनः। तन्मते रीतिरात्मा काव्यस्य। पदसङ्घटना रीतिः, सेयं पदसंघटना

गुणव्ष्वायत्ता इति रीतिसम्प्रदायः गुणसम्प्रदायात्मना परिणमते। रीतिभेदानां व्यवस्थितं वर्णनं दण्डिनापि कृतम्। गुणालङ्कारयोरसङ्कीर्णं रूपं प्रकाश्य गुणानां शब्दार्थगतत्वेन विंशतिप्रकारता वामनव्वैव प्रतिपादिता। वामनेन काव्यशोभायाः कर्तारो धर्मा गुणाः। तदतिशयहेतवः अलंकाराः स्वीकृताः। भामहादयः यत्र रसमलंकारं मन्यमानं तं काव्यस्य बहिरङ्गम् समर्थितवन्तः, वामनादयः तत्र रसं कान्तिगुणस्वरूपमाख्याय तस्यावश्यकताम् स्वीकृतवान् । मम्मटस्तु सर्वेषामेषां सम्प्रदायानां समन्वयं कृत्वा आनन्दवर्धनमतं समर्थयति। काव्यस्य आत्मा ध्वनिः इति, तत्रापि आत्मा रसः इति, रसधर्माः गुणाः इति, ते च माधुर्यम् ओजः प्रसादः इति त्रयः गुणाः इति स्पस्टं चकार।

**स्वावलोकनप्रश्नाः**

१. मम्मटेन कति गुणाः निरूपिताः?

२. के च ते?

३. गुणाःकाव्याङ्गानि कथं भवन्ति?

### ४.३.३.गुणाः -तद्भेदाश्च-

अलंकारशास्त्रे गुणाः शब्दगताः अर्थगताः द्विविधाः। केचन गुणाः उभयाश्रिता अपि कथयन्ति। परमिदमसारम् भोजादयः गुणानां संख्यां बहुधा संवर्धयामासुः। भोजः चतुर्विंशतिः शब्दगुणाः इति चतुर्विंशतिः अर्थगुणा इति प्राह। एतदतिरिच्य वैशेषिकगुणनाम्ना कांश्चन गुणान् अंगीचकार। विद्यानाथस्तु भोजमतानुयायी इति कुमारस्वामिना सूचितोऽपि चतुर्विंशतिशब्दगुणानेव स्वीचकार। गुणाः प्रधानतया पदसंघटनाधर्माः। अत एव शब्दगुणा एव अङ्गीकर्तव्याः परम् अर्थगुणाः नांगीकर्तव्याः इति गुणप्रकरणान्ते विद्यानाथः व्यक्तीचकार।

गुणानां विषये वामनस्य वचनेषु किंचत् पौर्वापौर्व्यविरोधः दृश्यते। रीतिः काव्यस्य आत्मा इति कथयित्वा रीतिः नाम विशिष्टपदरचना रीतिः इति लक्षयामास। पदरचनायां विशेषोनाम कः इति आकाङ्क्षायां गुणावत्ता एव इति विशेषो गुणात्मा इति विवृतवान् । एतेन गुणाः पदरचनासम्बद्धाः इति ज्ञायते। परं तदनु अर्थगुणानपि स्वीकृतवान् । एतेन अर्थगुणानां विषये गुणत्वं गौणमिति समर्थनीयमिति प्रतिभाति।

गुणानाम् अलंकाराणां च मध्ये विद्यमानं भेदं वामनदर्शितविधया विद्यानाथः नाङ्गीचकार। गुणाः शब्दसङ्घट्नाश्रिताः इति अलङ्काराः (शब्दालङ्काराः) शब्दानाश्रित्य तिष्ठन्तीति विद्यानाथः प्राचीनमतानि अनुसृत्य गुणालंकारभेदं प्रतिपादयामास। स च अर्थगुणान् नाङीचकार अर्थगुणान् न प्रतिपादयामास। अत एव अर्थगुणाः अर्थसङ्घटनाश्रिताः इति नोवाच।

एवं सति अभिनवगुप्तः लोचने प्राचीनानानमभिप्रायमेवं शब्दगुणानामाश्रयः शब्दसंघ्टना इति अर्थगुणानामश्रयः अर्थसंघटना इति च  विशदीचकार। एवं रसस्य श्रव्यकाव्येष्वपि प्राधान्यं समस्तीति सिद्धान्तात्पूर्वमेव प्राचीनालंकारिकाः गुणानङ्गीकृत्य ते च शब्दार्थौ अथवा संघटनामाश्रित्य तिष्ठन्तीति प्रतिपादितवान् ।

एवं सति ध्वनेः तत्रापि रसध्वनेः प्राधान्यमङ्गीकुर्वतां ध्वनिकारादयः गुणान् रसधर्मानङ्गीकृतवन्तः। तान् त्रीनेव प्रतिपादितवन्तः। ते च माधुर्यम्, ओजः, प्रसादः इति त्रयः एव। आनन्दवर्धनः गुणान् रसभावरसाभासादिधर्मत्वेन सूचितवन्तः , परं मम्मटस्तु रसमात्रधर्मत्वेन व्यवस्थापयामास। तेन च गुणाः भावदिधर्मा न भवन्तिति फलितरूपेण आगतम् । ते च ध्वनिवादिनां मतानुसारं त्रयः माधुर्यम्, ओजः,प्रसादः इति। माधुर्यम्, ओजः,प्रसादः सहृदयचित्तेषु क्रमेण दृतिं विस्तारं, व्याप्तिं च तन्वन्ति।

ते ते रसाः सहृदयस्य मनसि विकास-विस्तार-क्षोभ-विक्षेपान् कुर्वन्तीति धनञ्जयः दशरूपके निरूपितवान्। तस्य अभिप्रायः एवं भवति- भरतस्य नाट्यशास्त्रे शृङ्गारवीरबीभत्सरौद्ररसाः हास्याद्भुतभयानककरुणानां जनकरसाः इति  प्रतिपादिताः। बहुशः प्रकृतिरसाः इति अङ्गीकृतेभ्यः चतुर्भ्यः जायमानाः विकाराः एव धनञ्जयमतेन विकासाद्याः इतिसुचायतीति अभ्युपगन्तव्यम् । गुणरसधर्मत्ववादिनोऽपि रसानां त्रयाणां त्रयः गुणाः भवन्तीति ते एव द्रुत्यादीन् जनयन्तीति प्रत्यपापदत् ।

एवं प्राचीनानां मतानुसारं दश शब्दगुणाः इति दश  अर्थगुणा इति च उररीचक्रुः। मम्मटस्तु त्रीनेव गुणान् स्वीचकार।

**स्वावलोकनप्रश्नाः**

१. गुणानां भेदाः के?

२. प्राचीनानां मतानुसारं गुणविषये मतभेदाः कथं भवन्ति?

३.मम्मटस्य मतानुसारं गुणविषये मतभेदः कीदृशः ?

## ४.४ काव्यप्रकाशस्य अष्टमोल्लासस्य प्रतिपाद्यः विषयः

### ४.४.१. काव्यप्रकाशस्य स्वरूपम्

काव्यप्रकाशः समन्वयात्मकः ग्रन्थः। अत्र कारिकाः, वृत्तिः, उदाहरणानि च भवन्ति। सूत्ररूपेण कारिकाः भवन्ति। प्रथमोल्लासादारभ्य दशमोल्लासपर्यन्तं शास्त्रीया विषयाः कारिकारूपेण दर्शिताः। कारिकाः वृत्तिः मम्मटेन विरचिताः। उदाहरणानि तु तत्तद्ग्रन्थेभ्यः अलंकारशास्त्रग्रन्थेभ्यश्च उद्धृतानि। कारिकाः अपि मम्मटस्य न भवन्ति। कोऽपि प्राचीनः पण्डितः रचितवानिति वादोऽपि प्रचलितः। परमयं वादः 'वादो वादाय केवलम्'। अयं च दशभिः उल्लासैः विभक्तः। स्थूलतया एतेषु विद्यमानाः विषयाः एवं भवन्ति- 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति काव्यलक्षणस्यैव तत्तद्घटकपदानां निरूपणपरतया एव सन्ति।प्रथमं शब्दनिरूपणं, तदनु अर्थनिरूपणं, ततः काव्यभेदनिरूपणम्, पश्चात् दोषनिरूपणम्, अग्रे गुणनिरूपणम्, तदनन्तरम् अलंकारनिरूपणमिति च क्रमेण दर्शितानि।

**स्वावलोकनप्रश्नाः**

१. काव्यप्रकाशः कीदृशः ग्रन्थः ?

२.काव्यप्रकाशस्य उल्लासाः कति ?

३.उल्लासविभागः कथं कृतः ?

### ४.४.२. अष्टमोल्लासस्य स्वरूपम्

काव्यप्रकाशे शब्दार्थनिरूपणानन्तरं काव्यभेदान् निरूप्य हेयतया दोषान् प्रद्श्र्य आदेयतया गुणान् अष्ट्मोल्लासे दर्शयति।

अत्र द्वदश कारिकाः सन्ति। तासु कारिकासु क्वचित् एकस्यामेव कारिकायां नैकानि सूत्राणि भवन्ति। आहत्य षोडश सूत्राणि सन्ति। द्वादश उदाहरणश्लोकाः भवन्ति। तदनुसारं वृत्तिग्रन्थः

तत्तत्कारिकाणामवतारिकाः विलसन्ति। तत्तदवतारिकानुसारं सर्वप्रथमं गुणालंकारभेदः, गुणानां भेदाः, क्रमेण माधुर्यस्य ओजसः प्रसादस्य च लक्षणानि,उदाहरणानि च, प्राचीनालंकारिकैः कथितानां दशगुणानमस्वीकारे युक्तयः दशशब्दगुणानां गुणत्रये अन्तर्भावः इति विषयाः प्रतिपादिताः।

**स्वावलोकनप्रश्नाः**

१. अष्टमोल्लासे कति कारिकाः सन्ति?

२. अष्टमोल्लासे कति सूत्राणि सन्ति?

३. अष्टमोल्लासे कति उदाहरणश्लोकाः सन्ति?

### ४.४.३. प्रतिपाद्याः गुणाः

अष्टमे उल्लासे गुणाः प्रतिपादिताः इत्युक्तमेव। प्राचीनैः श्लेषः प्रसादः समता, माधुर्यम्, सुकुमारता, अर्थव्यक्तिः, उदारता, ओजः कान्तिः समाधिः इति वामनेन प्रतिपादिताः। शब्दगुणाः, अर्थगुणाश्च श्लेषादिनामभिरेव व्यवह्रियन्ते, इति दश शब्दगुणाः दश अर्थगुणाश्च इति विंशतिगुणाः भवन्ति।

गुणान् रसधर्मत्वेन , अलंकारान् शब्दार्थधर्मत्वेन च लक्षयन् उदाहरणमुखेन प्रतिपादयामास मम्मटः। माधुर्यस्य, ओजसः , प्रसादस्य च लक्षणानां उदाहरणमुखेन समन्वयं चकार। प्राचीनान् गुणान् त्रिषु गुणेषु अन्तर्भावयामास। प्राचीनगुणानां लक्षणानि सम्यक्परिशील्य केषांचन गुणानां लक्षणेषु स्वीयगुणत्रयलक्षणसमन्वयं कृत्वा कांश्चन गुणान् दोषभावरूपेण, कांश्चन गुणान् रसालंकाररूपेण निरूपयामास मम्मटः।

**स्वावलोकनप्रश्नाः**

१.मम्मटः प्राचीनोक्तान् गुणान् केषु गुणेषु अन्तर्भावयामास?

२.गुणाः कस्य धर्माः?

| |
|---|
| ३. अलंकाराः केषं धर्माः ? |

**४.५. प्राचीनानां मतानुसारं गुणविषये मतभेदाः- मम्मटस्य मतानुसारं गुणविषये मतभेदः**

४.५.१.गुणानां वर्णधर्मत्वम् उत रसधर्मत्वम्

**ये रसस्याङ्गिनो धर्माःशौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।। इति।**

आत्मनः - जीवात्मनः, एव यथा शौर्यादियो धर्मा न शरीरस्य, मृतशरीरेऽभावादिति लोके यथा प्रसिद्धं तथा माधुर्यादयो गुणा रसस्यैव धर्माः, न वर्णानाम् । ते च रसं विना नावतिष्ठन्ते, अवस्थिताश्चावश्यं रसमुपकुर्वन्ति। एवं च रसोत्कर्षकत्वे सति रसाऽव्यभिचारिस्थितत्वम्, अव्यभिचारेण रसोपकारत्वं चेति गुणस्य लक्षणद्वयं फलितम् ।

ननु 'मधुरा वर्णाः' इति लोकव्यवहराद् गुणस्य वर्णधर्मत्वं स्यात्, उक्तं च गुणस्य वर्णधर्मत्वं वामनादिभिरिति चेत्? उच्यते- विततकारस्य सुकुमारवर्णानां चाऽन्यवैलक्षण्येन व्यञ्जकत्वप्रतिपत्तये उपचारेण 'यजमानः प्रस्तरः' इतिवत्, अस्यायमाकार इव शूरः, एते वर्णा एव मधुरा इत्यादि क्वचिद् अभियुक्तां व्यवहरन्ति। तामलोकयन्तोऽनभिज्ञाः, विततकारस्यैव शूरत्वम्, सुकुमारवर्णादीनामेव माधुर्यादि मन्यमानाः तथैव व्यवहरन्ति। नैतावता गुणस्य वर्णधर्मत्वसिद्धिरिति। अत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते, न तु वर्णमात्राश्रयाः, इति ।

| |
|---|
| **स्वावलोकनप्रश्नाः**<br>१. गुणानां वर्णधर्मत्वम् उत रसधर्मत्वम् ?<br>२. मधुरा वर्णाः इति व्यहारः कथं सम्भन्ति?<br>३. गुणाः कस्य धर्माः ? |

४.गुणस्य कति लक्षणः?

५.गुणस्य प्रथमं लक्षणं किम्?

६.गुणस्य द्वितीयं लक्षणं किम्?

**४.५.२.गुणालङ्कारभेदः**

'समवायवृत्त्या-अपृथक्स्थित्यात्मकसम्बन्धेन शौर्यादयः, संयोगवृत्त्या तु हारादयः, इत्यस्तु लोके कथञ्जित् लौकिकगुणालङ्काराणां भेदः। काव्ये पुनः ओजः- प्रभृतिगुणानाम् अनुप्रासोपमाद्यलङ्काराणां चोभयेषामपि समवायवृत्त्या स्थितिरिति नास्ति गुणाऽलङ्कारयोर्भेदः। यदि च कोऽपि भेदमाचष्टे गड्डलिकाप्रवाहेणैव न तु वस्तुगत्या' इति भट्टोद्भटस्याऽभिप्रायः।

परं नेदं भट्टोद्भटस्य कथनं सङ्गतम्, किन्तु अज्ञानविलसितमेव। तथाहि ये प्रधानस्य रसस्य धर्माः सन्ति, ये च रसोत्कर्षस्य हेतुभूताः ये च रसं विना नावतिष्ठन्ते, ते गुणा इत्युच्यन्ते। शौर्यादयो धर्मा यथाऽऽत्मन एव न तु शरीरस्य, एवमेव माधुर्यादयो रसस्यैव धर्माः, न वर्णनाम्।

यथा हारादयः कण्ठाद्यङ्गानाम् अतिशयाधानद्वारा आत्मनोऽप्युपकारकाः, तथैव शब्दार्थद्वारा ये कदाचित् सम्भाविनं रसमुपकुर्वन्ति न तु सर्वदैव तेऽनुप्रासोपमदयः अलङ्कारा इति व्यवह्रियन्ते। गुणा रसं विना नावतिष्ठन्ते, अलङ्कराश्च रसं विनापि तिष्ठन्ति। गुणाः सर्वदैव रसोपकरकाः अलङ्कारास्तु कदाचिदेव, इत्यस्ति गुणालङ्कारयोर्भेदः। तथा चोक्तं मम्मटेन-

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।। इति।**

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।**
**हारादिवदलङ्कारास्तेऽनुप्रसोपमदयः।। इति च ।**

यच्च वमनेनोक्तम् -काव्यशोभायाः कर्त्तारो धर्मा गुणाः तदतिशयहेतवस्त्वलङ्काराः इति तदपि न युक्तम्। यतः किं समस्तैर्गुणैः काव्यव्यवहारः, उत कतिपयैः? यदि समस्तैः गुणैः काव्यव्यवहारः, तत्कथमसमस्तगुणा गौडी पाञ्चाली च रीतिः काव्यस्यत्मा? वमनमते-

'रीतिरात्मा काव्यस्य' इति काव्यलक्षणात्।

अथ कतिपयैस्ततः-

**अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः।।**

इत्यादौ ओजःप्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्राप्तिः। अपि च वामनोक्तम् अलङ्कारलक्षणमपि न युक्तम् । यतः 'गुणाऽऽहितशोभातिशयकारित्वम्' इति वमनाभिमतम् अलङ्कारलक्षणम् । किन्तु-

**स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी।**
**अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ।।**

इत्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारस्य प्रवर्तकौ। अतो मम्मटप्रदर्शितो गुणालङ्करयोः भेदोऽस्त्येव।

**स्वावलोकनप्रश्नाः**

१.गुणालङ्कारभेदःकथम्?

२.अलंकारस्य लक्षणं किम्?

३.गुणस्य लक्षणं किम्?

४.भट्टोद्भटेन गुणालंकरयोर्भेदः कथं स्वीकृतः?

**४.५.३.गुणाः- लाक्षणानि**

'रसोत्कर्षैकत्वे सति रसाव्यभिचारिस्थितित्वं गुणत्वम्, अव्यभिचारेण रसोपकारकत्वं वा गुणत्वम्, इति । स च त्रिविधः - माधुर्यम्, ओजः प्रसादश्चेति। उक्तं च मम्मटेन-

**माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश इति।**

माधुर्यम्- आह्लादकत्वं मधुर्यं शृङ्गारे द्रुतिकरणम् । इति शृङ्गारे अर्थात् सम्भोगशृङ्गारे। द्रतिः चेतसो गलितत्वमिव द्वेषादिजन्यमानकाठिन्याद्यपगमे सुकुमारः चित्तस्यावस्थाविशेष इत्यर्थः। तथा च यद्वशेन श्रोतुर्विमनस्कतेव सम्पद्यते तद् आह्लदकत्वस्वरूपं माधुर्यमित्यर्थः। उक्तं चाऽन्यत्र-

**गलितत्वमिवाह्लदपदव्याहृदये ददत् ।**
**माधुर्यं नाम शृङ्गारे प्ररोहं गाहते गुणः।। इति।**

किञ्च- करुणे विप्रलम्भे तच्छान्ते चातिशायान्वितम् ।

अयं च सम्भोगशृङ्गारे ततः करुणे, ततः विप्रलम्भे, तस्मादपि च शान्ते क्रमेणातिशयितम् अत्यन्तद्रुतिहेतुत्वादिति।

'श्रव्य नातिसमस्तार्थशब्दं मधुरमित्येते' इति भामहोक्तं तु न सम्यक् । ओजःप्रसदयोरपि श्रव्यत्वस्य सत्त्वेनातिव्याप्तेः।

ओजः - 'दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।' दीप्तिस्वरूपा या मनसो विस्तृतिर्ज्वलितत्वमिव। तथा च यद्वशाज्ज्वलितमिव मनो जायते तदोज इत्यर्थः। अपि च-

**बीभत्सरौद्ररसयोस्तस्याधिकं क्रमेण च । इति**

वीराद् बीभत्से ततोऽपि रौद्रे च कार्यायाश्चित्तदीप्तेः सातिशयतया करणत्वमोजः क्रमेणोत्कर्षवद् भवतीति भावः।

प्रसादः - **शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।**
**व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः।। इति।**

अग्निर्यथा शुष्कमिन्धनं सहसा-झटित्येव, व्याप्नोति, जलं यथा स्वच्छं पटं सहसैव व्याप्नोति, एवं यो गुणः, अन्यत्.-चित्तम्, सहसैव व्याप्नोति असौ प्रसादः (स्वच्छतारूपः, विकासरूपः) प्रसदाख्यो गुणाः भवति। यदा वीररौद्रादिषु चित्तं व्यप्नोति तदा शुष्केन्धनाग्निनवद्, यदा च शृङ्गारकरुणादिषु चित्तं व्याप्नोति तदा स्वच्छजलवदिति बोध्यम् । स च सर्वेषु रसेषु सर्वासु च रचनासु च मिलतीति।

**स्वावलोकनप्रश्नाः**

१.माधुर्यस्य लक्षणं किम्?

२.प्रसादस्य लक्षणं किम्?

३.ओजसः लक्षणं किम्?

### ४.५.४.प्राचीनोक्ताः गुणाः-तेषां गुणत्रये अन्तर्भावः

रसोत्कर्षैकत्वे सति रसाव्यभिचारिस्थितित्वं गुणत्वम्, अव्यभिचारेण रसोपकारकत्वं वा गुणत्वम्, इति । स च त्रिविधः - माधुर्यम्, ओजः प्रसादश्चेति। उक्तं च मम्मटेन- 'माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश' इति।

८. माधुर्यम्- आह्लादकत्वं मधुर्यं शृङ्गारे द्रुतिकारणम् । इति शृङ्गारे अर्थात् सम्भोगशृङ्गारे द्रुतिः चेतसो गलितत्वमिव द्वेषादिजमानकाठिन्याद्यपगमे सुकुमारः चित्तस्यावस्थाविशेष इत्यर्थः। तथा च यद्वशेन श्रोतुर्विमनस्कतेव सम्पद्यते तद् आह्लदकत्वस्वरूपं माधुर्यमित्यर्थः। उक्तं चान्यत्र-

**गलितत्वमिवाह्लदपदव्याहृदये ददत् ।**
**माधुर्यं नाम शृङ्गारे प्ररोहं गाहते गुणः।। इति।**

किञ्च- करुणे विप्रलम्भे तच्छान्ते चातिशायान्वितम् ।

अयं च सम्भोगशृङ्गारे ततः करुणे, ततः विप्रलम्भे, तस्मादपि च शान्ते क्रमेणातिशयितम् अत्यन्तद्रुतिहेतुत्वादिति।

'श्रव्य नातिसमस्तार्थशब्दं मधुरमित्येते' इति भामहोक्तं तु न सम्यक् । ओजःप्रसादयोरपि श्रव्यत्वस्य सत्त्वेनातिव्याप्तेः।

ओजः -'दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।' दीप्तिस्वरूपा या मनसो विस्तृतिर्ज्वलितत्वमिव। तथा च यद्वशाज्ज्वलितमिव मनो जायते तदोज इत्यर्थः। अपि च-

**बीभत्सरौद्ररसयोस्तस्याधिकं क्रमेण च । इति**

वीराद् बीभत्से ततोऽपि रौद्रे च कार्यायाश्चित्तदीप्तेः सातिशयतया करणत्वमोजः क्रमेणोत्कर्षवद् भवतीति भावः।

**प्रसादः - शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।**
**व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः।। इति।**

अग्निर्यथा शुष्कमिन्धनं सहसा-झटित्येव, व्याप्नोति, जलं यथा स्वच्छं घटं सहसैव व्याप्नोति, एवं यो गुणः, अन्यत्.-चित्तम्, सहसैव व्याप्नोति असौ प्रसादः (स्वच्छतारूपः, विकासरूपः) प्रसादाख्यो गुणे भवति। यदा वीररौद्रादिषु चित्तं व्याप्नोति तदा शुष्केन्धनाग्निनवद्, यदा च शृङ्गारकरुणादिषु चित्तं व्याप्नोति तदा स्वच्छजलवदिति बोध्यम् । स च सर्वेषु रसेषु सर्वासु च रचनासु च मिलतीति।

ननु प्राचीनैर्वामनादिभिः गुणानां शब्दार्थधर्मत्वं स्वीकृतम् । तथा च दश शब्दगुणाः

दश चार्थगुणाः कथिताः। यथा-

**श्लेषः प्रसादः समता माधुर्यं सुकुमरता।**
**अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः।।इति।**

अतो न तेषां मम्मटोक्तेषु त्रिषु गुणेषु अन्तर्भावो भवितुमर्हतीति। नैवं ब्रूहि । यतः -

**माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश।**
**केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः।**
**अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ।। इति।**

माधुर्यम्, ओजः, प्रसादः, इति त्रयः एव गुणा न दश। यतो हि केचिद् वामनोक्ता गुणाः एषु मम्मटोक्तेषु गुणेषु अन्तर्भूता भवन्ति, इतरे च केचिद् दोषाभावस्वरूपाः, तदन्ये च केचित् कुत्रचित् - रसविशेषे, उदाहरणविशेषे वा दोषरूपा भवन्ति। अतो न दशगुणाः, किन्तु त्रय एव। तथाहि-

सन्धिसौष्ठवादेकस्थानीयवणाह्वपन्यासाच्च बहूनामपि पदानामेकपदंवद्भासनात्मा यः श्लेषः, यथा ‘अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः’ इत्यत्र सन्नपि सन्धिः न प्रतीयते। यश्चारोहावरोहक्रमरूपः समाधिः यथा- चञ्चद्भुजभ्रमितचण्डगदाभिघात’ इत्यादौ च विच्छेदात् पदानां नृत्यत्प्रायत्वं विकटत्वं नामोदारता, यथा- ‘स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां झणिति रणितमसीत् तत्र चित्रं कलं च’ इत्यादौ। यश्च ओजोमिश्रितशैथिल्यात्मा प्रसादः, यथा- ‘यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां’ इत्यादौ एषां चतुर्णामपि गाढबन्धतया दीप्तिहेतुत्वादोजस्यन्तर्भावः। पृथक्पदत्वं माधुर्यं प्रकारान्तरेण तेन साक्षात् कण्ठरवेणोक्तम्। तत्र न काचिद् विप्रतिपत्तिः।

या च झटित्युपस्थानरूपार्थव्यक्तिः, यथा ’वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये’ इत्यादौ सा च प्रसदेऽन्तर्भवति। मार्गाभेदरूपा समता - यया रीत्योपक्रमस्तया रीत्या समापनम् मार्गाभेदः। सा च क्वचिद् दोष एव। तथाहि- मातङ्गाः किमु वल्गितैः इत्यादौ सिंहाभिधाने मसृणमार्गत्यागो गुणः, सिंहापेक्षया मृदुत्वेन मतङ्गानां मृदुभिरेव वर्णैरुपक्रमः, सिंहे तु कोपसम्बन्धात् तत्त्यागः समुचित इति भावः। यदपि अपारुष्यरूपं सौकुमार्यम् । यथा- अपसारय घनसारं कुरु हारं दूरे एव किं कमलैः इत्यादौ तदपि कष्टत्व-(श्रुतिकटुत्व) दोषाभावरूपमेव न गुणः। या च औज्ज्वल्यरूपा कान्तिः, यथा- निरानन्दः क्वेन्दौ मधुनि विधुरो बालबकुले, इत्यादौ सापि ग्राम्यत्वदोषाभावरूपैव, न गुणः। एवं न दशशब्दगुणा इति।

वामनमते 'श्लेषः, प्रसादः' इत्यदय एव दशार्थगुणा अपि, लक्षणानि तु भिन्नानि। तत्र-

**पदार्थे वाक्यरचन वक्यार्थे च पदाभिधा।**
**प्रौढिर्व्याससमसौ च साभिप्रायत्वमस्य च ।।**

इति पञ्चधा प्रौढिरोजः। तत्र एकपदार्थस्य बहुभिः पदार्थैरभिधानं पदार्थे वाक्यरचनम्। यथा 'चन्द्रम्' इत्येकस्मिन् पदार्थे वक्तव्ये 'अत्रेर्नयनसमुत्थं ज्योतिः' इति वाक्यरचनम् । बहूनां पदार्थानाम् एकपदेनाभिधानं वाक्यार्थे पदाभिधा। यथा 'निदाघशीतलहिमकालोष्णसुकुमारशरीरावयवा योषित्' इति वाच्यार्थे वक्तव्ये वरवर्णिनी इति पदाभिधानम् । एकस्य वाक्यार्थस्य किञ्चिद् विशेषनिवेशाद् अनेकैर्वाक्यैरभिधानमित्येवंरूपो व्यासः-विस्तारः। यथा-' परस्वं नापहर्त्तव्यम्' इत्येकस्मिन् वाक्यार्थे परान्नं न हर्त्तव्यम्, परवस्त्रं न हर्तव्यं नापहर्त्तव्यम्' इति व्यासेन प्रतिपादनम् । बहुवाक्यप्रतिपाद्यस्य एकवाक्येन अभिधानम् इत्येवं रूपः समासः। विशेषणस्य, सभिप्रायत्वं-सार्थकत्वम्। यथा-'कुर्यां हरस्यपि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये' इति पद्ये पिनाकपाणेः इति विशेषणस्य साभिप्रायत्वम्। इत्युक्तप्रकारा पञ्चविधा या प्रौढिः सा ओजः, इति वामनेन उक्तम् । तत्र आद्यभेदचतुष्टयं तु उक्तिवैचित्र्यमात्रमेव न गुणः, तदभावेऽपि काव्यव्यवहारप्रवृत्तेः। यच्च साभिप्रायत्वमोजः, तदपुष्टार्थदोषाभावरूपमेव न गुणः। यच्चोक्तिवैचित्र्यं माधुर्यं तदनवीकृतदोषाभावरूपमेव, या च अग्राम्यरूपा उदारता, सा ग्राम्यत्वदोषाभावरूपा। अर्थवैमल्यरूपः प्रसादः, स च अधिकपदत्वदोषाभावरूपः। या च वस्तुस्वभावस्फुटत्वरूपा अर्थव्यक्तिः, सा स्वभावोक्त्यलङ्कारेऽन्तर्भवति। दीप्तरसत्वरूपायाः कान्तेः रसध्वनिगुणीभूतव्यङ्ग्ये चाऽन्तर्भावः। क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूपघटानात्मकः श्लेषः, यथा- 'दृष्ट्वैकासनसंस्थिते प्रियतमे' इत्यादौ, सोऽपि विचित्रतामात्रम्, आस्वादप्रतीतौ विलम्बहेतुत्वान्न गुणः। प्रकान्तप्रकृतिप्रत्ययाऽविपर्यासेन अर्थस्य विसंवादिताविच्छेदः समता सा प्रक्रमभङ्गाभावरूपैव। अर्थादर्शनरूपः

समाधिः न गुणः किन्तु काव्यशरीरमात्रनिर्वर्तकः, रसस्यासधारणानुपकारित्वात् । तेन वामनभोजराजाद्युक्ता अर्थगुणा नाऽतिरिक्ताः। अपि तु मम्मटमते गुणदोषाभावरसध्वनिगुणीभूतव्यङ्ग्यालङ्करेष्वेव गतार्था इति।

**स्वावलोकनप्रश्नाः**

१.प्राचीनोक्ताः के के गुणाः केषु केषु मम्मटोक्तगुणेषु अन्तर्भवन्ति?

२.प्राचीनोक्तगुणानां लक्षणानि सूचयत?

३.दोषाभावरूपाः गुणाः के?

## ४.६.गुणाभिव्यञ्जकाः वर्णाः रचनाश्च

### ४.६.१.माधुर्याभिव्यञ्जकाः वर्णाः-रचना च

गुणास्त्रयः- माधुर्यम् ओजः,प्रसादश्चेति। तत्र-

माधुर्यव्यञ्जकाःट,ठ,ड,ढ वर्जिताः कादयो मान्ताः, शिरसि निजवर्गान्त्ययुक्ताः, तथा ह्रस्वस्वरयुक्तौ रेफणकारौ, अल्पसमासो मध्यसमासो वा तथा सौकुमार्यवती रचना माधुर्यगुणस्य व्यञ्जिका। उक्तं च मम्मटेन-

**मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।**
**अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।। इति।**

यथा-

**अनुङ्गरङ्गप्रतिमं तदङ्गं भङ्गिभिरङ्गीकृतमानताङ्ग्याः।**
**कुर्वन्ति यूनां सहसा यथैताः स्वन्तानि शान्तापरचिन्तितानि।।**

अत्र गकारास्तकराः शिरसि स्वस्ववर्गान्त्ययुक्ताः ह्रस्वान्तरितो रेफश्चेति वर्णाः, अनङ्गरङ्गप्रतिमम् इति मध्यवृत्तिः, प्रतिमं तदङ्गमिति अङ्गं अङ्गिभिः इत्यत्र च माधुर्यवती रचना तथा चाऽत्र वर्णसमासरचनारूपं त्रयमपि विप्रलम्भशृङ्गारे माधुर्यस्य व्यञ्जकम् ।

**स्वावलोकनप्रश्नौ**

१.माधुर्यगुणाभिव्यञ्जकाः वर्णाः के?

२.माधुर्यगुणाभिव्यञ्जिका रचना का?

### ४.६.२.ओजोव्यञ्जका वर्णाः-रचना च

ओजोगुणव्यञ्जकाः- वर्गस्य प्रथमतृतीयाभ्यां द्वितीयचतुर्थयोः सम्बन्धः रेफेण, अधः, उभयत्र वा, यस्य कस्यचिदक्षरस्य यत्र कुत्रचित्सम्बन्धः, तुल्ययोः अर्थात् तेनाक्षरेण तस्यैवाक्षरस्य सम्बन्धः, ट,ठ,ड,ढाः, शकारः षकारो दीर्घसमासः विकटा रचना चेति ओजोगुणव्यञ्ज्काः। उक्तं च मम्मटेन,-

**योगः आद्यतृतीयाभ्यामन्त्ययोः रेण तुल्ययोः।**
**टादिः शसो वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि।। इति।**

यथा-

**मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-**
**धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।**
**कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां**
**दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत्प्रयासः।।**

अत्र मूर्ध्नामिति, उत्सर्पिदर्पेति चोपरि रेफेण योगः अङ्घ्रीति अधोरेफेण योगः। ईशपिशुनशव्दयोः शकारः दोष्णामिति षकारः समासदैर्घ्यसङ्घटनौद्धत्यं वास्त्येव। सर्वे एवेमेव ओजोगुणव्यञ्जका इति।

**स्वावलोकनप्रश्नौ**

१.ओजोगुणाभिव्यञ्जकाः वर्णाः के?

२.ओजोगुणाभिव्यञ्जिका रचना का?

### ४.६.३.प्रसादाभिव्यञ्जका वर्णाः-रचना च

प्रसादगुणव्यञ्जकाः- येन शव्देन समानेन रचनया वा श्रुतिमात्रेण शब्दात् अर्थज्ञानं भवेत् स प्रसादव्यञ्जकः। तथा चोक्तं विवरणकारैः- श्रुतिमात्रेणार्थबोधकाः सर्वे एव सुकुमारा वा विकटा वा वर्णादयः प्रसादगुणस्य व्यञ्जकाः, इत्यर्थाल्लभ्यते इति। उदाहरणं

यथा-

**परिम्लानं पीनस्तनजघनसङ्गादुभयत-**
**स्तनोर्मध्यस्यान्तः परिमलिनमप्राप्य हरितम् ।**
**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः**
**कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ।।**

अत्र अन्वयप्रतियोगिनां यथास्थानमवस्थितेः झटित्येव अन्वयबोधात् प्रसाद इति।

**स्वावलोकनप्रश्नौ**

१.प्रसादगुणाभिव्यञ्जकाः वर्णाः के?

२.प्रसादगुणाभिव्यञ्जिका रचना का?

**४.७. रचनावृत्तिवर्णानाम् गुणाश्रितानामपि अन्यथात्वं कथं भवतीति विचारः**

४.७.१.रचना गुणाश्रितापि वक्त्राद्यौचित्यभेदेन भिन्ना यद्यपि रचना, वृत्तिः वर्णाश्च गुणाधीनास्तथापि वक्त्रौचित्याद्, वाच्यौचित्यात् प्रबन्धौचित्याच्च कुत्रचिद् रचनादीनां गुणापारतन्त्र्याभावोऽपि भवति। उक्तं च मम्मटेन-

**वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् ।**
**रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ।। इति**

तत्र क्वचिद् वाच्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः । यथा-

**मन्थायस्थार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः**
**कोणाघातेषु गर्जत्प्रलयघनघटाऽन्यसङ्घट्टचण्डः।**
**कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः**
**केनाऽस्मिन्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽसौ।।**

अत्र वाच्यार्थे क्रोधाद्यव्यञ्जके प्रश्नरूपे, प्रबन्धे च वेणीसंहारनाटकरूपे दीर्घसमासा, उद्धता रचना, अभिनयप्रतिकूलत्वेन, दीर्घसमासेन अर्थप्रतीतौ विलम्बाच्च अनुचितैव, किन्तु वक्ताऽत्र क्रोधी भीमसेनः, अतस्तदौद्धत्यद्योतनाय उद्धता रचना कृता।

**स्वावलोकनप्रश्नाः**

१. रङ्चना केन कारणेन भिन्ना भवति?

२. वर्णानामन्यथात्वं कथं सम्भवति?

३. वृत्तेरन्यथात्वं कथं सम्भवति?

४.वक्त्रपेक्षया रचना भिन्ना भवतीत्यस्य उदाहरणं किम्?

४.७.२.वृत्तिः गुणाश्रितापि वक्त्राद्यौचित्यभेदेन भिन्ना क्वचिद् वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयः। यथा-

**प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात-**
**त्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम्।**
**कुर्वत्काकुत्स्थवीर्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजां**
**झङ्कारैर्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम्,।।**

अत्र वक्ता वैतालिकः, प्रबन्धश्चाभिनेयात्मकः इति दीर्घसमसोद्धतरचनादयो यद्यपि नोचिताः, तथापि वाच्यस्य कुम्भकर्णोत्तमाङ्गस्य भीमत्वेन, ओजस्वितया औद्धत्यात् तदौद्धत्यव्यञ्जनाय उद्धता रचनादयः कृता इति।

प्रबन्धौचित्याद् यथा- आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः, प्रत्युत विकटबन्धत्वेनैव शोभावत्त्वम्। आख्यायिकायां गद्यप्राधान्यात् गद्ये च विकटबन्धस्यैवाभ्यार्हितत्वात् । अपि च तत्र वक्त्ता कविर्भवति न तु रागी, कोमला रचना च रागिमुखादेव शोभते। विप्रलम्भकरुणयोस्तु तस्यामपि न दीर्घसमासादि, तयोरतिसौकुमार्यादिति। कथायां रौद्रेऽपि नात्यन्तमुद्धता रचनादयो विधीयन्ते। अत्र हि वक्ता क्रोधाविष्टो न भवति। वर्णनीयस्य च सुखप्रतिपत्तेरेवोद्देश्यत्वात्। नाटकादौ रौद्रेऽपि व्यङ्ग्ये अभिनयप्रतिकूलत्वेन न दीर्घसमसदयो विधीयन्ते, विच्छेदेनैवाऽभिनयसौकुमार्यादिति। एवमन्यदपि ओचित्यादनुसर्त्तव्यम्।

**स्वावलोकनप्रश्नः**

१.वृत्तिः गुणाश्रितापि केन भिन्ना भवति?

## ४.८.सारांशः

अस्मिन् प्रकरणे मम्मटस्य काव्यप्रकाशस्य अष्टमोल्लासे प्रतिपादिताः गुणाः निरूपिताः। काव्यगुणानाम् इतिहासः अतिप्राचीनः। भरतः नाट्यशास्त्रे दशगुणान् निरूपितवान्। स च गुणानाम् अलंकाराणां मध्ये भेदस्य विषये किमपि नोवाच। अर्थगुणाः शब्दगुणाः इति भेदविषये किमपि नोवाच। तर्हि तदीयलक्षणानि परिशील्यन्ते चेत् केचन शब्दगुणाः इति अर्थगुणाः इति केचन उभयगुणाः इति ज्ञायन्ते। तेषां सधारणलक्षणं कथयन् गुणाः दोषाभावरूपाः इति कथयति।

भरतस्य अनन्तरं भामहः काव्यालंकारे माधुर्यम्, प्रसादः ओजः इति त्रीनेव गुणान् सूचयामास। परं लक्ष्यलक्षणविषये विस्तृतविवेचनं न कृतवानिति गुणानां संख्यास्वरूपविषये भामहस्य अभिप्रायमिदमित्थमिति वक्तुं न प्रभवाम।

भरतोक्तदशगुणानेव दण्डी काव्यादर्शे कथयामास। एतेषां गुणानां द्वारा वैदर्भगौडमार्गयोः भेदः सिद्ध्यतीति दण्डी प्रतिपादयति। एतेषां दशगुणानां मध्ये श्लेषः समता सुकुमारता ओजः इति चत्वारः शब्दगुणाः, प्रसादः अर्थव्यक्तिः उदारता कान्तिः समाधिः इति अर्थगुणाः माधुर्यमुभयगुणः इति दण्डिनः लक्षणोदाहरणानां परिशीलनेन अवगम्यते। दण्डी अपि गुणानामलंकाराणां भेदं न स्पष्टीचकार।

काव्ये गुणानां प्रधान्यं दत्तवान् वामनः। अयं गुणानां संख्यां दशतः विंशतिपर्यन्तं वर्धयामास। श्लेष इत्यादिदशशब्दगुणान् तन्नाम्नैव दश अर्थगुणांश्च अङ्गीचकार। प्रथमतः गुणालंकारयोर्भेदं वामनः एव विशदीचकार। गुणाः काव्ये सौन्दर्यं जनयन्तीति अलंकाराः तत्सौन्दर्यं वर्धयन्तीति प्रतिपादयामास।

दोषाः गुणाभावरूपा इति वामनः कथयामास। गुणाः दोषाभावरूपाः इति मम्मटादयः प्रतिपादयामासुः। अत्र अयं ज्ञातव्यः भवति। एकं वस्तु इतरवस्त्वभावरूपं इतरवस्तुभिन्नं वा भवेत् । यथा अश्वः गजाभावरूपः इति गजः अश्वाभावरूपः इति वक्तुं शक्यते। परमश्वे कानिचन विशेषलक्षणानि सन्ति, गजे अपि कानिचन विशेषलक्षणानि सन्ति। अतः अश्वो नाम कः इति प्रश्ने गजभिन्नः अश्वः इति गजो नाम कः इति प्रश्ने अश्वभिन्नः गज इति कथनमात्रेण न युज्यते। तेषां विशेषलक्षणानि वक्तव्यानि। अत एव गुणानां दोषाणां च

लक्षणानि वक्तव्यानि। तस्मात् दोषप्रकरणं गुणप्रकरणं पृथक्तया दर्शयामास मम्मटः।

वामनानन्तरं भोजादयः गुणानां संख्यां बहुधा वर्धितवन्तः। भोजः चतुर्विंशतिं शब्दगुणान् चतुर्विंशतिमर्थगुणान् दर्शयामास। इतोऽपि वैशेषिकगुणनाम्ना कांश्चन गुणानपि प्रतिपादयामास।

विद्यानाथः चतुर्विंशतिं शब्दगुणानेव विशदीचकार। परं वामनमतानुसारं गुणाः संघटानाश्रयाः इति कथयामास। गुणाश्रयाः शब्दार्थाः भवन्ति अलंकारा अपि शब्दार्थाश्रयाः भवन्ति। तर्हि अनयोः गुणालंकारयोः को भेदः इति प्रश्नः तथैव तिष्ठति। तस्य समाधानाय भट्टोद्भटः कंचन प्रयासं चकार। समवायसंबन्धेन वर्तमानाः गुणा इति तदितरसंबन्धेन वर्तमानाः अलंकारा इति।

तं वादं खण्डयित्वा मम्मटः रसाश्रिताः गुणाः इति शब्दार्थाश्रिताः अलंकारा इति च व्यवस्थापयामास। अभिनवगुप्तः गुणान् रसभावरसाभासाद्याश्रितान् अङ्गीचकार। परं मम्मटः रसमात्रधर्मत्वेन व्यवस्थापयामास इति विशेषः। एते च माधुर्यं शृङ्गारे करुणे शान्ते च भवतीति, ओजः रौद्रे बीभत्से वीरे च भवतीति च उवाच। तत्तद्रसानां चर्वणादशायां चित्तस्य द्रवीकरणकारणत्वेन माधुर्यं, विस्तृतिकारणत्वेन प्रसादं, व्याप्तिकारणत्वेन प्रसादं च अङ्गीकृत्य त्रय एव काव्यगुणा इति तेष्वेव प्राचीनोक्ताः श्लेषादयः शब्दार्थगुणाः अन्तर्भवन्तीति च स्पष्टीचकार मम्मटः।

वस्तुतस्तु तत्तद्रसानां चर्वणायां चित्तेषु जायमानान् विकारान् आश्रित्य केषांचन गुणानां धर्माणां वा कल्पने न कापि विप्रतिपत्तिः। परं प्राचीनालंकारिकैः शब्दार्थाश्रितरूपेण अर्थाश्रितरूपेण उभयाश्रितरूपेण वा स्वीकृतान् गुणान् समूलं निराकृत्य तत्स्थाने स्वीयसिद्धान्तानुसारं त्रयाणां गुणानां कल्पने कियत् युक्तियुक्तमिति आलोचनीयोऽयं विषयः। अत एव पण्डितराजः जगन्नाथः एते त्रयः गुणाः रसधर्मा इति एतेषां वादं नाङ्गीचकार। एतद्गुणत्रयं न तथा निराचकार तथापि एते क्वचित् शब्दसंघटनाश्रिता इत्यपि अङ्गीकर्तव्यम् इति असूचयत्। एतेषां गुणानामपेक्षया वामनादिभिरङ्गीकृतान् गुणान् अपि सविस्तरं प्रतिपादयामास । अपि च रसं चित्स्वरूपत्वेन प्रतिपाद्य रसब्रह्माणं संस्थाप्य ब्रह्मणो निर्गुणत्वेन रसस्य गुणाश्रयत्वमपि तिरश्चकार।

**स्वावलोकनप्रश्नाः**

१. भरतेन कति गुणाः उक्ताः

२.भरोतोक्तगुणेषु शब्दाश्रिताः गुणाः के?

३.भरोतोक्तगुणेषु अर्थाश्रिताः गुणाः के?

४..भरोतोक्तगुणेषु उभयाश्रिताः गुणाः के?

**४.९.बोधप्रश्नाः**

१.गुणाः नाम के?

२.गुणसामान्यलक्षणं किम्?

३.काव्यतत्त्वघटकतया गुणानां कीदृशं महत्त्वम्?

४.गुणानां काव्याङ्गत्वनिरूपणं कथं भवति?

५.गुणाः - तद्भेदाश्च के?

६.प्राचीनानां मतानुसारं गुणविषये मतभेदाः कथं भवन्ति?

७.मम्मटस्य मतानुसारं गुणविषये मतभेदः कीदृशः?

८.गुणानां वर्णधर्मत्वम् उत रसधर्मत्वम् इति विमृशत।ः

९.गुणालङ्कारभेदं निरूपयत।

१०. प्राचीनोक्तगुणानां लक्षणानि लिखत।

११.मम्म्टोक्तगुणानां लक्षणानि लिखत।

१२.प्राचीनगुणानां मम्मटस्य गुणत्रये अन्तर्भावः दर्शनीयः।

१३.गुणाभिव्यञ्जकाः वर्णाः के?

१४.गुणाभिव्यञ्जिकाः रचनाः काः?

## ४.१०. अभ्यासप्रश्नाः

१. गुणानां वर्णधर्मत्वं निराकृत्य सिद्धान्तं व्यवस्थापयत ।

२.गुणाऽलङ्कारयोः भेदं मम्मटरीत्या संसाध्य अत्र भट्टोद्भटमतं ब्याख्याय निराकुरुत।

३. सलक्षणान् गुणभेदान् विलिख्य कस्य गुणस्य कुत्र रसे स्थितिरिति लिखत?

४ प्राचीनोक्तानां दशशब्दगुणानां दशर्थगुणानां च केषु गुणेषु कथं च अन्तर्भावो भवति?

अथवा

वामनोक्तानां दशशब्दगुणानां दशार्थगुणानां च स्वरूपं प्रदर्श्य तान् यथायथं दूषयत?

५.कस्य गुणस्य के वर्णा रचनादयो व्यञ्जकाः? इति सोदहरणं प्रतिपदयत।

६.रचनावृत्तिवर्णानाम् अन्यथा कथं भवतीति सोदाहरणं प्रतिपदयत।

७.प्राचीनोक्तानां गुणानां लक्षणानि लिखत।

लघुप्रश्नोत्तराणि -

## नवमः उल्लासः

**संरचना**

५.१.प्रस्तावना
५.२.उद्देश्यम्
५.३.काव्यशास्त्रे शब्दालंकारस्वरूपम्
५.३.२.अलंकारसंप्रदायः - अलंकाराणां काव्याङ्गत्वनिरूपणम्
५.३.३.अलंकाराः - तद्भेदाश्च
५.४ काव्यप्रकाशस्य नवमोल्लासस्य प्रतिपाद्यः विषयः
५.४.१. काव्यप्रकाशस्य स्वरूपम्
४.४.२. नवमोल्लासस्य स्वरूपम्
५.५. अलंकारलक्षणम्- काव्ये अलंकाराणां प्रयोजनम्
५.५.१.मम्मटस्य अलंकारस्य निर्दुष्टं लक्षणम्
५.५.२.अलंकाराणां काव्ये महत्त्वम्
५.६.वृत्तयः - तासां स्वरूपम्
५.६.१.वृत्तीनां विभागः
५.६.२.वृत्तीनां लक्षणानि-उदाहरणानि च
५.७. वक्रोक्तेः स्वरूपम्- भेदाश्च
४.७.१.मम्मटस्य वक्रोक्तिलक्षणम्
५.७.२. अनुप्रासभेदाः उदाहरणानि च
५.८.अनुपासः तद्भेदाश्च
५.७.१. अनुप्रासलक्षणम्
५.९.यमकालंकारः
५.९.१.यमकालंकारस्य लक्षणम्
५.९.२.यमकलाटानुप्रासयोः परस्परं भेदः
५.१०.श्लेषः तद्भेदाश्च
५.१०.१.श्लेषलक्षणम्
५.९.२.यमकलाटानुप्रासयोः परस्परं भेदः

५.१०.३.श्लेषः अर्थालंकारः शब्दालंकारो वा

५.१०.४.श्लेषः अभङ्गश्लेषः सभङ्गश्लेषो वा

५.११.२.तस्य शब्दार्थालंकारत्वम् उत अर्थालंकारत्वम्  उभयालंकारत्वं वा

५.१२.चित्रालंकारनिरूपणम्

५.१२.१.चित्रालंकारलक्षणम्

५.१२.२.चित्रालंकारभेदाः

५.१३.सारांशः

५.१४.बोधप्रश्नाः

५.१५. अभ्यासप्रश्नाः

**५.१.प्रस्तावना**

मम्मटाचार्यः काव्यप्रकाशस्य विभाजनं समीचीनतया चकार। तद्विभाजनं काव्यलक्षणे एव दर्शितवान्। तदनुसारमेव उल्लासविभागमपि चकारेति अस्माभिर्ज्ञायते। अनेनैव क्रमेण गुणनिरूपणानन्तरमलंकारनिरूपणमकरोत् ।

अलंकाराः त्रिधा भवन्ति। शब्दालंकाराः, अर्थालंकाराः, उभयालंकाराः इति, शब्दालंकाराः अनुप्रासादयः। अर्थालंकाराः उपमादयः। उभयालंकाराः पुनरुक्तवदाभासः श्लेषः वक्रोक्तिरिति तल्लक्षणपरिशीलनेन अवगम्यते। परं सः उभयालांकारनिरूपणे वक्रोक्तेः पुनरुक्तवदाभासस्य श्लेषस्य च विशेषचर्चां चकार। तदर्थमेव नवमोल्लासे शब्दालंकारनिरूपणार्थं नवममुल्लासं रचितवान्। नवमे उल्लासे वक्रोक्तिम्, अनुप्रासं यमकं श्लेषं चित्रं, पुनरुक्तवदाभासं च इति षट् शब्दालंकारान् तदवान्तरभेदांश्च निरूपयामास। चित्रालंकारोऽपि लेशतया सूचितः। तेषामुदाहराणान्यपि दर्शितानि। तेषामेव निरूपणामत्र विहितम्।

**स्वावलोकनप्रश्नाः**

१.मम्मटः ग्रन्थविभाजनं कथं सूचितवान् ?

२.काव्यप्रकाशस्य नवमे उल्लासे के के अलंकाराः निरूपिताः।

| |
|---|
| ३. अलंकाराः कतिधा विभक्ताः ?<br><br>४.मम्मटः केषामलंकाराणां विषये विशेषतः चर्चां चकार ? |

**५.२.उद्देश्यम्**

एतदध्ययनेन -

- अलंकारलक्षणपरिष्कारः
- अलंकारविभागः
- शब्दालंकारभेदाः
- उभयालंकारविशेषपरिज्ञानम्
- वृत्तीनां स्वरूपम्
- वृत्तीनां विभेदविमर्शः
- अनुप्रासभेदज्ञानम्
- यमकालंकारपरिज्ञानम्
- शब्दश्लेषस्वरूपम्
- वक्रोक्तिस्वरूपम्
- पुनरुक्तवदाभासालंकारस्य शब्दालंकारता उत अर्थालंकारता उत उभयालंकारता वा इति सन्देहनिवारण्म्
- चित्रालंकारपरिचयः

इत्यादीन् विषयान् भवन्तः जानन्ति।

**५.३.काव्यशास्त्रे शब्दालंकारस्वरूपम्**

४.३.१.काव्यशास्त्रस्य संप्रदायानां संक्षिप्तः परिचयः

साहित्यशास्त्रे षट् संप्रदायाः भवन्तीति भवन्तः जानन्ति। ते च रससंप्रदायः,अलंकारसंप्रदायः, गुणरीतिसंप्रदायः,ध्वनिसंप्रदायः, वक्रोक्तिसंप्रदायः औचित्यसंप्रदायः इति। तेषु रससंप्रदायः अति विशिष्टः। तेषु रससंप्रदायस्य प्रवर्तकः भरतः, अलंकारसंप्रदायस्य प्रवर्तकः भामहः, गुणसंप्रदायस्य प्रवर्तकः दण्डी, तस्यैव परिपोषकः रीतिप्रवर्तकः वामनः,

ध्वनिसंप्रदायस्य प्रतिष्ठापकः आनन्दवर्धनः, वक्रोक्तिसंप्रदायस्य आचार्यः कुन्तकः, औचित्यसंप्रदायस्य प्रवर्तकः क्षेमेन्द्रः इति अस्माभिः ज्ञायते। भरतः रसं प्रधानमिति जानन्नपि अलंकारानपि रसाङ्गतया निरूपितावान् । मम्मटः एतान् संप्रदायान् रसध्वनिपरतया व्याख्यांचक्रे।

**स्वावलोकनप्रश्नाः**

१.अलंकारशास्त्रे गुणसंप्रदायस्य आचार्यः कः?

२.भरतः रसं प्रधानतया अंगीकुर्वन्नपि अलंकारान् किमर्थं निरूपितवान् ?

३.अलंकारशास्त्रे मम्मटस्य स्थानं किम्?

### ४.३.२.अलंकारसंप्रदायः - अलंकाराणां काव्याङ्गत्वनिरूपणम्

तेषु अलंकारसंप्रदायः अतिप्राचीनः इत्यपि ज्ञायते। भरतः चतुरः अलंकारान् निरूपयामास। उपमा,रूपकम्, दीपकम्, यमकं च। तेषु अलंकारेषु उपमा, दीपकम्, रूपकं च अर्थालंकाराः। यमकं तु शब्दालंकारः। लेशतया प्रतिपादितानेतानलंकारन् स्वीकृत्य भामहः काव्यालंकारे अलंकाराणामेव महत्त्वमिति सूचयन् अलंकारप्रवर्तकः समजायत। तदनु रुद्रटः, रुय्यकः, जयदेवः, अलंकाराणामेव काव्यशोभाधायकत्वमङ्गीचक्रुः। तत्रापि अर्थालंकाराणामेव विशेषतया चर्चां कृतवन्तः आचार्याः। शब्दालंकाराणां निरूपणविषये दण्डी विशेषपरिश्रमं चकार। तदनु भोजः चित्रालंकाराणां विवेचनं चकार। भारविः माघः स्वीयकाव्येषु शब्दालंकारविन्यासान् दर्शितवन्तः।

परमानन्दवर्धनः काव्यस्यात्मानं ध्वनिं प्रतिपादयन् आत्मरहितान् शब्दार्थालंकारान् चित्रमिति नाम्ना व्याजहार। नमिसाधुः चित्रालंकारा अपि काव्ये उपादेयाः इति स्वीचकार। मम्मटस्य समये प्रायः सर्वेषां कवीनां महाकव्येषु अलंकरविन्यासाः अनेके प्रविष्टाः। तेन भामहस्य काव्यलक्षणं किंचित् परिष्कृत्य आनन्दवर्धनस्य सिद्धान्तं द्रढीकुर्वन् काव्यलक्षणे अनलंकृती पुनः क्वापि इति सूत्रयित्वा क्वचिदलंकारविरहेऽपि न काव्यत्वहानिः इति सूचयित्वा 'यः कौमारहरः' इत्यादि श्लोकमुदाहृत्य 'अत्र स्फुटो न कश्चिदलंकारः' इति स्पष्टीचकार। तथापि रसस्य उपकारकतया एव अलंकाराणामलंकारता इति आनन्दवर्धनस्य

मतं समर्थयन् अलंकारनिरूपणं चकार मम्मटः। शब्दार्थद्वारेण प्रधानभूतं रसं ये परिपोषयन्ति ते एव अलंकाराः इति सिद्धान्तीचकार। तत्रापि स्थितस्य गतिश्चिन्तनीया इति वचनानुसारं चित्रालंकारणामपि निरूपणमकरोत्। कथमपि काव्यशोभाकरत्वमलंकारलाक्षणमत्र समन्वितं भवति।

**स्वावलोकनप्रश्नाः**

१. अलंकारसंप्रदायप्रवर्तकाः आचार्याः के?

२. अलंकाराणामलंकारत्वं कथं भवति?

३. मम्मटस्य काव्यलक्षणे अलंकारसंप्रदायसूचकं पदं किम्?

४. अलंकारसामान्यलक्षणं किम्?

### ५.३.३.अलंकाराः - तद्भेदाश्च

काव्यशोभाकारत्वमलंकारसामान्यलक्षण्म्। भरतोक्तेषु अलंकारेषु शब्दालंकराः अर्थालंकाराः च सन्ति। परं तदनन्तरवर्तिभिः आचार्यैः उभयालांकारा अपि परिगणिताः। ते च यमकालंकारमाधारीकृत्यैव अनुप्रासभेदान् निरूपितवन्तः। तदतिरिच्य खड्गाद्याकारविशेषानुरूपं शब्दसंरचनां कृत्वा चित्रालंकारान् निरूपितवन्तः। एते चित्रालंकाराः इत्युच्यन्ते। तेषु क्रमशः शब्दालंकाराः यमकम्, अनुप्रासः, तद्भेदाश्च प्रसिद्धाः। शब्दालंकरो नाम शब्दपरिवर्तनासहिष्णवः भवन्ति। यथा-

**सितकरकररुचिरविभा विभाकराकार! धरणीधर! कीर्तिः।**
**पौरुषकमला कमला सापि तवैवास्ति नान्यस्य।।**

विभाकराकार! सूर्यस्येव आकारवन्! तीव्रप्रतापशालिन्! धरणीधर! राजन् , सितकरकररिचिरविभा चन्द्रकिरणवदतिधवला कीर्तिः पौरुषकमला पौरुषलक्ष्मीः सा अप्रसिद्धा कमला अपि लक्ष्मीः, तवैव अस्ति न अन्यस्य अस्ति।

समानार्थकानां पदानाम् आवृत्तौ लाटानुप्रासः द्वयोः पदयोः अर्थः एकः भवति चेदेव लाटानुप्रासः। अत्र 'कर कर' 'विभा विभा' कमला कमला इति द्विवारं च पदानि

प्रयुक्तानि। अतः लाटानुप्रासः। कर शब्दस्य उभयत्रापि किरण इत्येव अर्थः। तथा सति करशब्दस्य परिवर्तनं कृत्वा किरण शब्दः प्रयुज्यते चेत् स अलंकारः नैव भवति इति शब्दस्य परिवर्तनं न सहते इति शब्दालकारः।

शब्दपरिवर्तनसहिष्णुः अर्थालंकारः। यथा मुखं चन्द्र इव सुन्दरम् इत्यत्र उपमालंकारः। अत्र मुखम् उपमेयम्, चन्द्रः उपमानम् , सुन्दरम् इति समानधर्मः इव उपमावाचकः। अतः अत्र उपमा अलंकारः। अत्र उपमानोपमेयसमानधर्मोपमावाचकानां परिवर्तनेऽपि यथा - वदनं सुधाकरः यथा रुचुरम् इति कथनेऽपि उपमालंकारः यथातथमेव तिष्ठति। अतः अयं अर्थालंकारः इति विवेकः।

यत्र केचन परिवर्तनसहिष्णवः शब्दाः भवन्ति तत्र उभयालंकाराः भवन्ति। यथा पुनरुक्तवदाभासे अलंकारे- उदाहरणं यथा-

**तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।**
**तेजोधाम महः पृथुमनसामिन्द्रो हरिर्जिष्णुः।।**

इदं सिंहवर्णनम् । असौ हरिः तनुवपुः सूक्ष्ममध्यः अजघन्यः श्रेष्ठः एव। करिकुञ्जररुधिररक्तखरनखरःवरगजरक्तकारणात् तीक्ष्णनखः तेजसः पराक्रमस्य आश्रयः। महःपृथुमनसां तेजसा महामनसाम् मध्ये जिष्णुः इन्द्रः श्रेष्ठः।

अत्र तनुवपुश्शब्दयोः देहः इति, करिकुञ्जरशब्दयोः गज इति रुधिर-रक्त-शब्दयोः रक्तमिति, तेजोधाममहः इति शब्दानां तेज इति, इन्द्रहरिजिष्णुशब्दानां च देवेन्द्र इति अर्थग्रहणात् आपाततः पुनरुक्तिः दृश्यते। एतेषु तनुकुञ्जररक्तधामहरिजिष्णुशब्दाः परिवृत्तिसहाः न भवन्ति। अत्र शब्दालंकारः। वपुः करिरुधिरेन्द्रशब्दाः परिवृत्तिसहाः । अतः अत्र अर्थालंकारः।

अत्र एकस्य पदस्य तन्वादेः परिवर्तने अलंकारः नास्ति। अत एव शब्दाश्रयः। अन्यस्य पदस्य परिवर्तनेऽपि अलंकारता न गता। अतः अर्थाश्रयः । एवम् अयमलंकारः उभयाश्रयः।

तथा च अलंकाराः शब्दगताः, अर्थगताः, उभयगताः इति त्रिधा भवन्ति। तेषु शब्दगताः अनुप्रासादयः। तत्रैव चित्रालंकारादयः परिगण्यन्ते। अर्थगताश्च उपमादयः। उभयगताः पुनरुक्तवदाभासादयः।

शब्दपरिवर्तनसहाः शब्दालंकाराः। शब्दपरिवर्तनासहाः अर्थालंकाराः। मिश्रिताश्च उभयालंकाराः।

अर्थालालङ्कारा: पुनः-

प्रतीयमानवस्तवः- यथा समासोक्तिपर्यायोक्त्याक्षेपार्थान्तरन्यासाः।

प्रतीयमानरसभावादयः- रसवत्प्रेयऊर्जस्विसमाहितादयः।

प्रतीयमानौपम्याः- दीपकापह्नुतिसन्देहप्रभृतयः।

अस्फुटप्रतीयामनाः- उपमादयः।

**स्वावलोकनप्रश्नाः**

१. अलंकाराः कतिविधाः?

२. शब्दालंकाराः कथं लक्षिताः भवन्ति?

३. अर्थालंकाराः कथं लक्षिताः भवन्ति?

४. उभयालंकाराःकथं लक्षिताः भवन्ति?

५. अर्थालंकाराः कतिविधाः? के च ते?

## ५.४ काव्यप्रकाशस्य नवमोल्लासस्य प्रतिपाद्यः विषयः

५.४.१. काव्यप्रकाशस्य स्वरूपम्

काव्यप्रकाशस्य स्वरूपविषये इतः पूर्वं दर्शितमेव तथापि पुनर्विमर्शनाय पुनः उच्यते। साहित्यशास्त्रं लक्ष्यलक्षणभेदेन द्विधा विभक्तम् । तत्र लक्ष्यविषयाः भवन्ति - काव्यनाटकादीनि, यथा- रघुवंशम्, अभिज्ञानशाकुन्तलम् इत्यादीनि। प्रायः उदाहरणानि सर्वाणि एतेभ्यः काव्यनाटकेभ्य एव प्रदीयन्ते।

लक्षणग्रन्था भवन्ति काव्यादर्शः इत्यादयः। साहित्यशास्त्रे षट् संप्रदायाः भवन्ति इति अस्माभिर्ज्ञायते। ते एव प्रस्थानाष्टकरूपेण विवृद्धिं गताः। यथा १.रसप्रस्थानं भरतेन, २. अलंकारप्रस्थानं भामहेन, ३. गुणप्रस्थानं दण्डिना, ४.रीतिप्रस्थानं वामनेन, ५.ध्वनिप्रस्थानम् आनन्दवर्धनेन, ६.वक्रोक्तिप्रस्थानं कुन्तकेन, ७. औचित्यप्रस्थानं क्षेमेन्द्रेण, ८. ध्वनिविरोधप्रस्थानम् महिमभट्टभोजमुकुलभट्टप्रभृतिभिः ।

ततःपरं प्रस्थानानामेतेषां समन्वयरूपेण केचन ग्रन्थाः समागताः। शास्त्रपरम्परायां समन्वयात्मकग्रन्थरूपेण क्रियमाणाः ग्रन्थाः प्रकणग्रन्था इत्युच्यन्ते। यथा व्याकरणशास्त्रे सिद्धान्तकौमुदी, न्यायशास्त्रे तर्कसंग्रहः इत्यादयः। तथैव साहित्यशास्त्रे काव्यप्रकाशः प्रथमः प्रकरणग्रन्थः। अयं यद्यपि प्रकरणग्रन्थः। तथापि अस्य स्वतन्त्रग्रन्थत्वे न कापि क्षतिः। अत एव अस्य ग्रन्थस्य शताधिकाः टीकाः समुपलभ्यन्ते। अत्र सर्वेषां सम्प्रदायानां समन्वयः दृश्यते। यथा रसः, अलंकारः, गुणः, रीतिः, वृत्तिः, ध्वनिः, औचित्यम्, अनुमानवादः, इति सर्वेऽपि चर्चिताः।

एवं लक्षणग्रन्थानामादर्शरूपेण परिलक्ष्यमाणः अयं काव्यप्रकाशः साहित्यदर्पणादिग्रन्थानां निर्माणे मूलमिव परिलक्ष्यते। अत्र दश उल्लासाः सन्ति। काव्यलक्षणे एव उद्देशक्रमेण काव्यलक्षणं, काव्यभेदाः, काव्यकारणानि, शब्दार्थस्वरूपनिरूपणम्, शब्दव्यापाराः, व्यञ्जनासिद्धिः, दोषविवेचनम्, गुणविमर्शनम्, शब्दालंकारनिरूपणम्, अर्थालंकारनिरूपणम् इति क्रमशः प्रथममुल्लासमारभ्य दशमोल्लासपर्यन्तं चर्चिताः।

अत्र कारिका, वृत्तिः, उदाहरणानि इति त्रिधा विभागः।
अल्पाभिधानेनार्थो यः समासेनोच्यते बुधैः।
सूत्रतस्सानुपठिता कारिकार्थप्रकाशिनी। इति कारिकालक्षणम् ।

अत्र विद्यमानाः कारिकाः श्लोकरूपाः। सर्वासां कारिकाणां पुरतः अवतारिकाः अपि प्रदत्ताः। कारिकाणां विवरणमपि दीयते। तदीयविवरणं वृत्तिनाम्ना विव्रियते। उदाहरणनि च कालिदासादिकवीनां ग्रन्थेभ्यः अदीयन्त। तत्र लक्षणसमन्वयमपि चकार। वृत्तिग्रन्थे अवतारिकाः अपि दर्शिताः: भवन्ति।

प्रत्युल्लासं संगतिरपि दर्शिता। अलंकाराणां विवेचनाय द्वौ उल्लासौ परिकल्पितौ।

**स्वावलोकनप्रश्नाः**

१. साहित्यशास्त्रे कति अंशाः भवन्ति?

२. साहित्यशास्त्रे प्रस्थानानि कति भवन्ति?

३. साहित्यशास्त्रप्रस्थानानि कानि भवन्ति?

४. कारिकालक्षणं किम् ?

५. काव्यप्रकाशः कतिधा विभक्तः?

६. काव्यप्रकाशस्य स्वरूपं किम् ?

### ५.४.२. नवमोल्लासस्य स्वरूपम्

नवमोल्लासे शब्दालंकाराः निरूपिताः। अत एव अस्य उल्लासस्य शब्दालंकारनिर्णयः इति नाम कृतम् । अत्र सप्तकारिकाः सन्ति। अत्र उदाहरणश्लोकाः त्रयस्त्रिंशत् सन्ति। अलंकाराः वक्रोक्तिः तस्य भेदौ काकुवक्रोक्तिः, श्लेषवक्रोक्तिः इति भेदद्वयम्, अनुप्रासलक्षणम् तस्य भेदाः छेकानुप्रासः, वृत्त्यनुप्रासः, उपनागरिका वृत्तिः परुषा वृत्तिः, कोमला वृत्तिः, तासां वृत्तीनाम् इतरैराचार्यैः कृतानि नामानि, लाटानुप्रासः, पदगतलाटानुप्रासः, एकपदगतलाटानुप्रासः, नामागतलाटानुप्रासः, यमकं, यमकभेदाः, श्लेषः, अभङ्गश्लेषः, चित्रालंकारलक्षणम्, पुनरुक्तवदाभासः, तस्य भेदौ, स च उभयालकारः भवतीति प्रतिपादनं च प्रधानाः अंशाः।

**स्वावलोकनप्रश्नाः**

१.नवमे उल्लासे कति कारिकाः सन्ति?

२.नवमे उल्लासे कति अलंकाराः निरूपिताः?

३.तत्र उभयालंकारः कः?

४.उदाहरणश्लोकाः कति दत्ताः नवमोल्लासे?

### ५.४.३. प्रतिपाद्याः अलंकाराः

नवमोल्लासे शब्दालकाराः निरूपिताः। तेषु यमकम् तद्गतभेदाः, अनुप्रासः तदीयाः भेदाः, चित्रालंकारः, पुनरुक्तवदाभासः इति उभयालंकाराः इत्येव प्रतिपाद्याः अलंकाराः।

**१.वक्रोक्तिः-**

वक्त्रा कमपि अभिप्रायं मनसि निधाय प्रयुक्तं वाक्यम् अन्येन श्लेषेण काकुस्वरेण वा अन्यथा योज्यते सः श्लेषमूला वक्रोक्तिः, काकुमूला वक्रोक्तिः द्विधा भवति इति ज्ञायते। तत्रापि श्लेषमूला वक्रोक्तिः सभङ्गश्लेषमूला अभङ्गश्लेषमूला वक्रोक्तिः इति द्विधा।

**२.अनुप्रासः-**

रसाद्यनुगतः पकृष्टो न्यासः अनुप्रासः। वर्णसाम्यमनुप्रासः। वर्णानुप्रासः पदानुप्रासः इति अनुप्रासः द्विविधः। अर्थरहितवर्णानामेव आवृत्तौ वर्णानुप्रासः। अर्थसहितपदानामेव आवृत्तौ पदानुप्रासः।

अव्यवधानेन वर्णानां द्विधा योजनमेव । स्वराणां साम्याभावेऽपि व्यञ्जनानां साम्यं वर्णसाम्यं रसादीन् अनुगच्छतीतिरसाद्यनुकूलः प्रकृष्टो न्यासः अनुप्रासः।

सचायं छेकानुप्रासः, वृत्त्यनुप्रासः, लाटानुप्रासः इति त्रिधा भवति। वृत्त्यनुप्रासे एव या वृत्तिः सा उपनागरिका, परुषा, कोमला इति त्रिधा भवति। माधुर्यव्यञ्जकैः वर्णैः उपनागरिका इति वृत्तिः भवति। ओजः प्रकाशकैः वर्णैः परुषा वृत्तिः भवति। इतरैः वर्णैः कोमला वृत्तिः भवति। कोमला वृत्तिरेव ग्राम्यवृत्तिरित्युच्यते। एताः तिस्रः वृत्तयः एव वामनादीनां मते वैदर्भीप्रमुखाः रीतयः। अर्थात् उपनागरिका वैदर्भी इति, परुषा वृत्तिः, गौडी इति कोमला वृत्तिः, पाञ्चाली रीतिरिति अभिप्रयन्ति। इमौ द्वौ भेदौ वर्णसाम्यमूलकौ वर्णगतौ भवतः। लाटानुप्रासस्तु पदगतः।

**लाटानुप्रासः-**

शब्दार्थयोः भेदाभावेऽपि तत्र प्रयुक्ताः शब्दाः अर्थाश्च एकाकारा अपि अन्वयभेदेन जायमानः अयमनुप्रासः शब्दगतानुप्रासः। अयं लाटदेशीयानामभीष्ट इति लाटानुप्रास इति कथ्यते। अयमेव पदानुप्रास इति केचन कथयन्ति।

शब्दानुप्रासः नाम पदानुप्रासः पदगतः नामगतः अर्थात् प्रातिपदिकगतः इति द्विविधः। नामगतः समासगतः असमासगतः इति द्विविधः। समासगतः एकसमासगतः, अनेकसमासगतः इति पुनर्द्विधा।

**एवमनुनुप्रासाः पञ्चधा भिन्ना भवन्ति।**
**सर्वेषां मूले उदाहरणनि द्रष्टव्यानि।**

**३. यमकम्-**

यमके बहूनां वर्णानाम् आवृत्तिः भवति। तेषामर्थवत्त्वे एकैकस्य वर्णसमुदायस्य एकैकः अर्थः भवति। कुत्रचित् वर्णाः यद्यपि भिन्नभिन्नरूपेण भवन्ति, तथापि श्रुतिसाम्येन

यमकम् अङ्गीक्रियते। यमकादौ डलयोः रलयोः बवयोः शषयोः नणयोः एकता लक्ष्यते। अन्ते विसर्गवताम् अविसर्गवताम् अनुस्वारवताम् अनुस्वाररहितानां च अभेदः गृह्यते। आवृत्तवर्णसमुदायानाम् एकार्थकत्त्वे लाटानुप्रासः भिन्नार्थकत्वे यमकमिति विवेकः। अयं यमकालांकारः बहुधा भिन्नो भवति।

१. मुखयमकम् -प्रथमपादस्य द्वितीयपादे आवृत्तिः।
२. संदंशयमकम्-प्रथमपादस्य तृतीयपादे आवृत्तिः।
३. आवृत्तियमकम् -प्रथमपादस्य चतुर्थपादे आवृत्तिः।
४. गर्भयमकम्- द्वितीयपादस्य तृतीयपादे आवृत्तिः।
५. संदष्टकयमकम् - द्वितीयपादस्य चतुर्थपादे आवृत्तिः।
६. पुच्छयमकम्- तृतीयपादस्य चतुर्थपादे आवृत्तिः।
७. पङ्क्तियमकम्- प्रथमपादस्य द्वितीयपादे तृतीयपादे चतुर्थपादे च आवृत्तिः।
८. युग्मकयमकम् - एकेस्मिन्नेव श्लोके प्रथमपादस्य द्वितीयपादे तृतीयपादे चतुर्थपादे नियमनं यदि भवति, अर्थात् प्रथमद्वितीयपादौ , तृतीयचतुर्थपादौ समानाकारौ यदि स्याताम् तत् युग्मकयमकमिति कथ्यते।
९. परिवृत्तियमकम् - प्रथमपादं चतुर्थपादे द्वितीयपादं तृतीयपादे नियमयेत् तत् परिवृत्तियमकम्। एवं रूपेण पादगताः यमकस्य नव भेदाः।
१०. अर्धावृत्तियमकम्- श्लोकस्य पूर्वार्धमेव यदि आवर्तयेत् ।
११. श्लोकावृत्तियमकम् - संपूर्णोऽपि श्लोकः यदि आवर्त्यते। इदमेव महायमकमिति कथ्यते। एतेषामुदाहरणानि दिङ्मात्रं प्रदर्शितानि। यथा- संदंशयमकस्य युग्मकयमकस्य महायमकस्य संदष्टकयमकस्य आद्यन्तयमकस्य च । एवं यमकस्य अनेके भेदाःभवन्तीति सूचितम् ।

**४.श्लेषः**

भिन्ना अपि शब्दाः यत् युगपदुच्चारणेन श्लिष्यन्ति, भिन्नं स्वरूपमपह्नुवते स श्लेषः। स च द्विविधः।

१.सभङ्गश्लेषः

स च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा। एते सर्वेऽपि भेदाः सभङ्गश्लेषभेदाः।

२. अभङ्गश्लेषः-अयं च नवमोभेदः।

पुनः प्रक्रान्तरेण शब्दपरिवर्तने अपि श्लेषः तथैव तिष्ठतीति शब्दश्लेषः, तदभावे

अर्थश्लेषः इति विवेकः। श्लेषोऽयं प्रायः सर्वालंकारेषु व्यापकरूपेण तिष्ठति।

३.उभयश्लेषः।

एवं शब्दालंकाराणां स्वरूपं नवमोल्लासे दर्शितम् ।

**स्वावलोकनप्रश्नाः**

१. नवमोल्लासे के अलंकाराः निरूपिताः?

२. यमकस्य कति भेदाः?

३. श्लेषस्य कति भेदाः?

**५.५. अलंकारलक्षणम्- काव्ये अलंकाराणां प्रयोजनम्**

५.५.१.मम्मटस्य अलंकारस्य निर्दुष्टं लक्षणम्

अलंक्रियतेऽनेनेति अलंकारः, अर्थाद्रसाद्युत्कर्षजनकत्वे सति, अतिशयशोभातिशायि कव्यधर्मत्वम् । उक्तं च विश्वनाथेन-

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत्।।**

**स्वावलोकनप्रश्नौ**

१.मम्मटस्य अलंकारलक्षणम् किम्?

२.विश्वनाथाभिमतम् अलंकारलक्षण्म् किम् ?

**४.५.२.अलंकाराणां काव्ये महत्त्वम्**

यथा अङ्गदादयः शरीरशोभामतिवर्धयन्तः शरीरिणमुपकुर्वन्ति, तथाऽनुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेकरुपकारकाः। अलङ्कारा अस्थिरा इति नैषां गुणवदावश्यकी

स्थितिः। अर्थाद् गुणा अपि उत्कर्षकाः सन्ति, किन्तु ते रसस्य स्थिरा धर्माः स्वरूपविशेषाः सन्ति। अलङ्काराश्च शब्दार्थयोरस्थिरा धर्माः शब्दार्थद्वारेण च रसमुत्कर्षयन्ति, इदमेव चैषां प्रयोजनं यत् शब्दार्थद्वारेण रसादेरुपकारकत्वम् ।

रसाद्युत्कर्षजनकत्वमात्रं लक्षणं तु न सम्यक्, गुणेषु अतिव्याप्तेः। रीतौ अतिव्याप्तिवारणाय 'शोभातिशायिनः' इति विशेषणम् । रीतीनां शोभामात्रजनकत्वं न तु शोभातिशयजनकत्वम् ।

स च शब्दगतः, अर्थगतः शब्दार्थगतश्चेति त्रिविधः । यथा यमकानुप्रासादयः शब्दगताः उपमारूपकादयोऽर्थगताः, पुनरुक्तवदाभासः शब्दार्थोभयगतश्चेति।
पुनरवलोकनप्रश्नाः

**५.६.वृत्तयः - तासां स्वरूपम्**

४.६.१.वृत्तीनां विभागः

रसविषयव्यापारवती वर्णरचना वृत्तिः। ताश्च तिस्रो भवन्ति- उपनागरिका, पुरुषा कोमला चेति।

उपनागरिका- 'माधुर्यव्यञ्जकैर्वर्णैरूपनागरिकोच्यते।' माधुर्यव्यञ्जकैः वर्णैर्युक्ता वृत्तिः उपनगरिका, नागरिकया चतुरया स्त्रियोपमिता उपनागरिकेत्युच्यते। तथा चोक्तम्-

**स्वरूपसंयोगयुतां मूर्ध्नि वर्गान्त्ययोगिभिः।**
**स्पर्शैर्युतां च मन्यन्ते उपनागरिकां बुधाः।। इति।**

एषैव केषाञ्चिन्मते वैदर्भी रीतिः कथ्यते। यथा-

**अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।**
**कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि।।**

अत्र माधुर्यगुणव्यञ्जकवर्णद्वारा अनङ्गेत्यादिपदत्रयमात्रघटितसमासविशिष्टा सुकुमारार्थकपदयोजना उपनागरिका वृत्तिः।

**स्वावलोकनप्रश्नौ**

१.वृत्तयः कति?

२.वृत्तिलक्षणं किम्?

५.६.२.वृत्तीनां लक्षणानि-उदाहरणानि च

उपनागरिका- 'माधुर्यव्यञ्जकैर्वणरुपनागरिकोच्यते।' माधुर्यव्यञ्जकैः वर्णैर्युक्ता वृत्तिः उपनगरिका, नागरिकया चतुरया स्त्रियोपमिता उपनागरिकेत्युच्यते। तथा चोक्तम्-

**स्वरूपसंयोगयुतां मूर्ध्नि वर्गान्त्ययोगिभिः।**
**स्पर्शैर्युतां च मन्यन्ते उपनागरिकां बुधाः।। इति।**

एषैव केषाञ्चिन्मते वैदर्भी रीतिः कथ्यते। यथा-

**अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।**
**कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि।।**

अत्र माधुर्यगुणव्यञ्जकवर्णद्वारा अनङ्गेत्यादिपदत्रयमात्रघटितसमासविशिष्टा सुकुमारार्थकपदयोजना उपनागरिका वृत्तिः।

**परुषा-**

ओजः प्रकाशकैस्तैस्तु पुरुषा इति। ओजोव्यञ्जकैः वर्णैः युक्ता वृत्तिःपरुषा। परुषवर्णघटितत्वात् परुषेत्युच्यते। एषैव केषाश्चिन्मते गौडी रीतिरित्युच्यते। यथा-

**मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा**
**धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।**

**कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां**
**दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत्प्रयासः।**

अत्र ओजोव्यञ्जकवर्णरचनाद्वारा, आडम्बरबन्धस्य विद्यमानत्वाद् बहुतरसमासस्यापि विद्यमानत्वाच्च परुषा वृत्तिः।

कोमला-

'कोमला परैः' इति। परैः शेषैः, ओजोमाधुर्यव्यञ्जकातिरिक्तैः प्रसादवद्भिः वर्णैर्युका वृत्तिः कोमलेत्युच्यते। एषैव केचाञ्चिन्मते पाञ्चाली रीतिरिति कथ्यते। अस्या एव संज्ञान्तरं ग्राम्या केचिद् । उद्भटादयोऽतिशयकान्तिराहित्याद् ग्राम्यस्त्रीसामान्यात् (अविदग्धस्त्रीसादृश्यात्) ग्राम्येति वदन्ति तदुक्तम्-

**शेषैर्वर्णैर्यथायोगं ग्रथितां कोमलाख्यया।**
**ग्राम्यां वृत्तिं प्रशंसन्ति काव्ये निष्णातबुद्धयः।। इति।**

यथा-

**अपसारय घनसारं कुरु हारं दूरे एव किं कमलैः।**
**अलमलमालि मृणालैरिति वदति दिवानिशं बाला।।**

अत्र मूर्ध्नि वर्गान्त्यगाभवात्, अद्यतृतीयादियोगाऽभावाच्चकोमला वृत्तिः।

**स्वावलोकनप्रश्नाः**

१.वृत्तयः वामनदिभिः कथं स्वीकृताः?

२.परुषावृत्तेः लक्षणं किम्?

३.उपनागरिका इति नाम कथमागतम्?

४.कोमलावृत्तिः ग्राम्या इति किमर्थमुच्यते?

**५.७. वक्रोक्तेः स्वरूपम्- भेदाश्च**

५.७.१.मम्मटस्य वक्रोक्तिलक्षणम्

**यदुक्तमन्यथा वक्यमन्यथाऽन्येन योज्यते।**
**श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा।।**

एकेन वक्त्रा, अन्याभिप्रायेण, उक्तं यद् वाक्यम्, अन्येन- श्रोत्रा, तदेव वाक्यं श्लेषेण काक्वा वा, अन्यार्थकतया योज्यते - सङ्गम्यते, सा वक्रोक्तिः। एकेनाऽन्याभिप्रायेणोक्तं वाक्यम्, अन्येन श्रोत्रा यदि अन्याभिप्रायकं कल्प्यते तदा वक्रोक्तिरलङ्कारः इति तात्पर्यम्। सा श्लेषवक्रोक्तिः काकुवक्रोक्तिश्चेति द्विविधा। 'अन्येन' इत्युक्त्या अपह्नुतौ नातिव्याप्तिः, अपह्नुतौ स्वोक्ते स्वयमेवाऽन्यथाकरणादिति।

**स्वावलोकनप्रश्नाः**

१. अपह्नुतिवक्रोक्त्योः कः प्रधानः भेदः?

२. वक्रोक्तिः कतिधा भिन्ना?

३. अपह्नुतौ अतिव्याप्तिवारणाय कारिकायां किं पदमुपन्यस्तम् ?

**५.७.२.श्लेषवक्रोक्तिः**

श्लेषस्य सभङ्गाभङ्गरूपेण द्विविधत्वात् श्लेषवक्रोक्तिरपि द्विविधा। तत्र सभङ्गपदश्लेषेण वक्रोक्तिर्यथा-

**नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो**
**वामानां प्रियमाधाति हितकृन्नैवाबलानां भवान् ।**
**युक्तं किं हितकीर्त्तनं ननु बलाभावप्रसिध्दात्मनः**
**सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः।।**

अत्र वक्रोक्तिरलंकारः। वक्त्राऽन्याभिप्रायेणोक्तस्य वाक्यस्य श्रोता अन्यार्थकतया योजितत्वात्। यथाऽत्र नारीणामिति पदं कामिनीपरतया वक्त्रोक्तम्, प्रतिवक्त्रा तु 'न अरीणाम्' इत्यर्थपरतया योजितम् । एवमग्रेऽपि। नारीणामित्यादिपदानां द्व्यर्थकत्वात् सर्वत्र श्लेषः। एवं श्लेषमूलिका वक्रोक्तिरियम् ।

यथापि वामादिपदे न भङ्गस्तथापि नारीणामिति पदभङ्गमुपजीव्य प्रवृत्तानां श्लेषान्तराणां स एव मूलमिति तेनैव व्यवहारः।

अभङ्गश्लेषेण वक्रोक्तिर्यथा-

**अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता।**
**त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्।**

अत्र दारुणा इति पदं क्रूरः इत्यर्थकतया वक्त्रा प्रोक्तम् 'काष्ठेन' इत्यर्थपरतया च श्रोत्रा योजितम् । अत्र दारुणा-क्रूरा, काष्ठेन इत्युभयार्थपक्षेऽपि 'दारुणा' इति पदस्य न भङ्गः। इत्यभङ्गपदश्लेषेण वक्रोक्तिरियम्।

**स्वावलोकनप्रश्नाः**

१. श्लेषवक्रोक्तिः कतिधा भिन्ना?

२. नारीणामित्यत्र कथं सभङ्गश्लेषः?

**५.७.३.काकुवक्रोक्तिः**

काक्वा यथा-

**गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम् ।**
**अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ।।**

अत्र नैष्यतीति निषेधाभिप्रायेण नायिकयोक्तम्। पुनः तदेवोत्तरयन्त्या सख्या तु न एष्यति? अपि तु एष्यत्येवेत्यर्थतया काक्वा- ध्वनिविकारेण योज्यते। अतोऽत्र काकुवक्रोक्तिरियम्। अत्र काकोः शब्दधर्मतया शब्दालङ्कारता अन्यथायोजनं च व्यञ्जनयेति।

**स्वावलोकनप्रश्नौ**

१.काकुः नाम का?

२.उदाहरणे कुत्र काकुः **?**

**५.८.अनुपासः तद्भेदाश्च**

५.८.१. अनुप्रासलक्षणम्

स्वरस्यासादृश्येऽपि व्यञ्जनसदृशत्वम् अनुप्रासः। रसाद्यनुगतः (प्रकृतरसव्यञ्जकः) प्रकृष्टो न्यासः (आवृत्तिः) अनुप्रासः, इति अनुप्रासपदस्य योगार्थः। उक्तं च मम्मटेन-

**'वर्णसाम्यमनुप्रासः' इति।**

**स्वावलोकनप्रश्ना**

१.अनुप्रासः नाम कथं योगार्थः?

२.अनुप्रासस्य निष्कृष्टं लक्षणं किम् ?

५.८.२. अनुप्रासभेदाः उदाहरणानि च

वर्णसाम्यमनुप्रासः। स च द्विविधः - वर्णानुप्रासः शब्दानुप्रासश्चेति। तत्र निरर्थकवर्णानुप्रासः प्रथमः। द्वितीयस्तु सार्थकवर्णानुप्रासस्वरूपः। वर्णानुप्रासोऽपि द्विविधः- छेकानुप्रासः, वृत्त्यनुप्रासश्च। उक्तं च -

**'छेकवृत्तिगतो द्विधा'** इति

छेकानुप्रासः - व्यञ्जनसमुदायस्य स्वरूपतः क्रमसश्च एकवारं साम्यं छेकानुप्रासः। उक्तम् मम्मटेन -

**'सोऽनेकस्य सकृत् पूर्व.'** इति।

यथा-

**ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।**
**दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम् ।।**

अत्र स्पन्दमन्दी इत्यत्र नकारदकारयोः गण्डपाण्डु इत्यत्र णकारडकारयोः'काम-कामिनी इत्यत्र कारमकारयोश्च अनेकस्य सकृत्साम्यमिति छेकानुप्रासः।

वृत्त्यनुप्रासः -**'एकस्याप्यसकृत्परः'** इति ।

अर्थादेकस्य अनेकस्य वा व्यञ्जनस्य अनेकवारं साम्यं वृत्त्यनुप्रासः।
यथा-

**अपसारय धनसारं कुरु हारं दूरे एव किं कमलैः।**
**अलमलमालिमृणालैरिति वदति दिवानिशं बाला।।**

अत्र रेफस्य लकारस्य च बहुकृत्वः सादृश्याद् वृत्त्यनुप्रासः। एवं वर्णानुसारं निरूप्य शब्दानुप्रासो लक्ष्यते-

**शब्द्स्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः।।**

अर्थाद् भिन्नतात्पर्यकतुल्यार्थकशब्दसादृश्यं शब्दानुप्रासः स च लाटजनवल्लभत्वात् लाटानुप्रस इत्युच्यते।

स च शब्दानुप्रासो प्रथमतः द्विविधः - पदगतो नामगतश्चेति। तत्र पदगतोऽपि अनेकपदैकपदगतत्वेन द्विविधः। नामगतश्च समासासमासगतत्वेन एकसमासगतत्वेन विभिन्नसमासगतत्वेन चेति त्रिविधः इति मिलित्वा शब्दानुप्रासः पञ्चविधः। तत्र आद्यः -

**'पदानां सः'** इति।

अत्र पदानामिति बहुवचनमनेकोपलक्षणम् । स इति लाटानुप्रासः।
यथा-

**यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।**
**यस्य च सविधे दयिता दवहनस्तुहिनदीधितिस्तस्य।।**

अत्र सविधे-दयितेत्यादीनां बहूनां तात्पर्यमात्रभेदेनावृत्तिरिति अनेकपदगतो लाटनुप्रासः। उद्देश्यविधेयभावभेदाच्च तात्पर्यभेदः। द्वितीयस्तु-

**'पदस्यापि'।**

एकपदगत इत्यर्थः। यथा -

**वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः।**
**सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत्।**

अत्र सुधाकरः इत्यस्य एकस्य पदस्य तात्पर्यभेदेनावृत्तिरिति एकपदगतो लाटानुप्रासः। उद्देश्यविधेयभावभेदाच्च तात्पर्यभेदः।

नामगतस्य (प्रातिपदिकस्य) प्रकारत्रयमाह मम्मटः -

**वृत्तावन्यत्र तत्र वा।**
**नाम्नः स वृत्त्यवृत्त्योश्च ।।** इति ।

एकस्मिन् समासे भिन्ने वा समासे, समासामासयोर्वा, नाम्नः- प्रतिपादिकस्य, न तु पदस्य सारूप्यम्, नाम्न एव लाटानुप्रासः। भेदत्रयस्यैकमेवोदाहरणं यथा-

'सितकरकररुचिरविभा विभाकराकार! घरणिधर! कीर्तिः।
पावृषकमला कमला सापि तस्यैवास्ति नान्यस्य।

अत्र 'कर-कर' इत्येकसमासः, 'विभा-विभा' इति भिन्नौ समासौ 'कमला-कमला'इति पूर्वस्य समासः, उत्तरस्यासमासः, इति त्रयाणामपि एकमेवोदाहरणमिदम् । तदेवं लाटानुप्रासः पञ्चधा।

**स्वावलोकनप्रश्नाः**

१. अनुप्रासः कतिविध;?

२. लाटानुप्रासः कतिविधः?

३. नमगतस्य अनुप्रासस्य प्रकारत्रयं किम्?

**५.९.यमकालंकारः**

५.९.१.यमकालंकारस्य लक्षणम्

अर्थे सति भिन्नार्थकानां वर्णानां सा पूर्वोक्तक्रमेण स्थिता पुनः श्रुतिः(आवृत्तिः) यमकालङ्कारः। उक्तं च मम्मटेन-

अर्थे सत्यर्थभिन्नानां सा पुनः श्रुतिः। यमकम् इति।

तथा चैकेन क्रमेणाऽसमानार्थकानां समानवर्णानां (वर्णयोर्वा) आवृत्तिर्यमकालङ्कारः। अत्र क्वचिद् द्वयोरपि सार्थकत्वम्, क्वचिच्च निरर्थकत्वम्,क्वचिदेकस्य सार्थकत्वम्, अपरस्य निरर्थकत्वम् इत्युक्तम्, -'अर्थे सत्यर्थभिन्नानाम्' इति । क्वचिद् वर्णभेदेऽपि श्रुतिसाम्येन यमकं भवति। तदुक्तम् -

**यमकादौ भवेदैक्यं डलयोः रलयोर्बवोः।**
**शषयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः**
**सबिन्दुकाबिन्दुकयोः स्यादभेदप्रकल्पनम् ।। इति।**

अत्र डकारलकारयोर्भेदेऽपि श्रुतिसाम्येन यमकं भवति।

**स्वावलोकनप्रश्नाः**

१. यमकस्य कतिभेदाः?

२. यमकस्य लक्षणं किम्?

३. श्रितिसाम्येन केषां केषं वर्णानां यमकं विधीयते?

४. यमकलाटानुप्रासयोः कः भेदः?

**५.९.२.यमकलाटानुप्रासयोः परस्परं भेदः**

ननु यमकलाटानुप्रासयोः को भेदः, इति चेत्? श्रुणु- प्रकृत्यर्थभेदे यमकम्, प्रकृत्यर्थभेदाभावे तात्पर्यमात्रभेदे लाटानुप्रास इति। लाटानुप्रासेऽतिव्याप्तिवारणाय अर्थभिन्नानाम्; इति । 'सरो रसः' इत्यादौ वृत्त्यनुप्रासेऽतिव्याप्तिवारणाय सा पुनः श्रुतिः इत्युक्तम् । तच्च-

**पदपादतद्भागावृत्ति तद्यात्यनेकताम्।**

तच्च यमकं पदावृत्ति-पादावृत्ति श्लोकार्द्धावृत्ति श्लोकावृत्त्यादिभेदेन बहुविधतया प्रभूततमभेदम्। दिङ्मात्रमुदाह्रियते-

**सन्नारीभरणोमायमाराध्य विधुशेखरम्,।**
**सन्नारीभरणोमायस्ततस्त्वं पृथिवीं जय।।**

अत्र प्रथमपादस्य तृतीयपादे यमनात् सन्दशो नाम यमकम् ।

**स्वावलोकनप्रश्नाः**

१. यमकस्य लाटानुप्रासतः कथंभेदः ?

२. संदंशयमको नाम कः ?

३. सदंशयमकस्य किमुदाहरणम् ?

४. यमकभेदाः के ?

## ५.१०.श्लेषः तद्भेदाश्च

### ५.१०.१.श्लेषलक्षणम्

सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति इति, 'प्रकृत्यर्थं शब्दनिवेशः' इति च सिद्धान्तात्, एकशब्देन एकस्यैवार्थस्य प्रतीतिः। अर्थद्वयप्रतीत्यर्थं श्लेषस्थले एकाकारौ द्वौ शब्दौ स्तः इत्यवश्यं स्वीकार्यम् । तौ च एकेन प्रयत्नेन एकदोच्चार्यतया; पृथक्तया नानुभूयेते।

ननु भिन्नसमासानाम्, इन्द्रशत्रुप्रभृतीनां श्लेषे उदात्तानुदात्तादिस्वरभेदाद् एकरूपतया भासनम् अनुपपन्नमिति चेत् न। काव्यमार्गे स्वरो न गण्यते इति न्यायात्। अत एव 'विभाषा छन्दसि (अष्ट..१.२.३६) इति पाणिनिसूत्रे तन्त्रेण आवृत्त्या 'विभाषाऽछन्दसि' इति नञं प्रश्लिष्य भाषायामपि वैकल्पिकी एकश्रुतिरङ्गीक्रियते, इति।

**स्वावलोकनप्रश्नाः**

१.एकस्य शब्दस्य एक एवार्थः इत्यस्य आधारसिद्धान्तः कः ?

२.स्वराः के ?

३.काव्यमार्गे स्वरो न गण्यते इति कुत्र मम्मटः उवाच ?

**५.१०.२.श्लेषस्य भेदाः**

भिन्ना अपि शब्दाः यत् युगपदुच्चारणेन श्लिष्यन्ति, भिन्नं स्वरूपमपह्नुवते स श्लेषः। स च द्विविधः।

१.सभङ्गश्लेषः

स च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा। एते सर्वेऽपि भेदाः सभङ्गश्लेषभेदाः।

२. अभङ्गश्लेषः-अयं च नवमोभेदः।

पुनः प्रक्रारान्तरेण शब्दपरिवर्तने अपि श्लेषः तथैव तिष्ठतीति शब्दश्लेषः, तदाभावे अर्थश्लेषः इति विवेकः। श्लेषोऽयं प्रायाः सर्वालंकारेषु व्यापकरूपेण तिष्ठति।

३.उभयश्लेषः।

एवं शब्दालंकाराणां स्व्ररूपं नवमोल्लासे दर्शितम् ।

**स्वावलोकनप्रश्नाः**

१. श्लेषस्य लक्षणं किम्?

२. श्लेषः कतिविधः?

३. उभयश्लेषो नाम कः?

४. सभङ्गश्लेषः कतिविधः?

**५.१०.३.श्लेषः अर्थालंकारः शब्दालंकारो वा -**

ननु अभङ्गश्लेषः स्वरितादिगुणभेदाभावाद् एक प्रयत्नोच्चार्यत्वाच्च अर्थचमत्कृतिमत्त्वाच्च अर्थश्लेषः कथं नाभ्युपगम्यते इति चेत्? न दोषगुणालङ्कारविभागस्य अन्वयव्यतिरेकानुविधायित्वात्। शब्दपरिवृत्तिसहे 'स्तोकेनोन्नतिमायाति' इत्यादावेव अर्थश्लेषस्य सत्त्वात् न चोपमादीनां श्लेषसङ्कीर्णतया श्लेषस्य च अलङ्कारान्तरसङ्कीर्णतया उपमाद्यलङ्कारबाधकः श्लेषः इति वाच्यम् । गुणक्रियासाम्यवत् शब्दसाम्यस्यापि उपमाप्रयोजकत्वात्-

**स्फुटमर्थालङ्कारोवेतावुपमासमुच्चयौ किन्तु।**
**आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवतः।।**

इति रुद्रटोक्तत्वाच्च। न च **'कमलमिव मुखम्'** इत्यादिः साधारणधर्मप्रयोगशून्य उपमाया विषय इति वाच्यम् पूर्णोपमाया निर्विषयत्वापत्तेः। 'देव त्वमेव पातालम्' इत्यादिश्लेषस्य चोपमालङ्कारभिन्नो विषयोऽस्ति। द्वयोर्योगे सङ्करः।

वस्तुत उपमाविषय एव बलीयान् 'प्राधान्येन व्यपदेशा भवन्ति' इति नियमात् । श्लेषं विना साधारणधर्मसम्भवो नास्ति। साधारणधर्मं विना नोपमा भवितुमर्हति 'साधर्म्यमुपमा भेदे' इति तल्लक्षणात् ।

'अबिन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुका' इत्यादौ विरोधज्ञानोत्पत्तिहेतुकः श्लेषो नास्ति, प्रत्युत श्लेषज्ञानोत्पत्तिहेतुको विरोधोऽस्ति। न ह्यत्र अर्थद्वयप्रतिपादकः श्लेषोऽस्ति, द्वितीयार्थस्य प्रतिभासमात्रस्य शाब्दबोधाऽविषयत्वात् ।

ननु उभयविधश्लेषस्य (सभङ्गाभाङ्गात्मकस्य) अर्थालङ्कारत्वं स्यादिति चेत्? न । वदतो व्याघातात् । शब्दश्लेष इति कथ्यते अर्थालङ्कारमध्ये च गण्यते, इति । किञ्च चमत्कारजनकता यत्र भवेत्तस्यैव अलङ्कारत युक्ता। शब्दस्य चमत्कारित्वे शब्दालङ्कारतैवोचिता। अर्थसापेक्षत्वादत्र शब्दानाम् अर्थश्लेष इति चेत् न । अनुप्रासादीनामपि अर्थाकङ्कारतापत्तेः । रसाद्यनुगतः प्रकृष्टोन्यासः अनुप्रासः , इति व्युत्पत्त्यनुसारम् अनुप्रासो रसव्यञ्जकं स्वरूपम् अपेक्षते, रसश्चार्थं विना न सम्भवतीति तात्पर्यम् । शब्दगुणदोषालङ्काराणाम् अर्थापेक्षया, अर्थगुणदोषालङ्काराणां च शब्दापेक्षया व्यवस्थितिरिति तेऽपि क्रमेण वयं के पुनरमी इत्यादौ वर्णादिश्लेषे एकप्रयत्नोच्चार्यत्वात् शब्दभेदेऽपि अर्थश्लेषत्वं प्रसज्येत। तस्मात् सभङ्गश्लेषस्तु शब्दान्वयव्यतिरेकानुविधायी चेत् तदा शब्दश्लेषः, अन्यथा तु अर्थश्लेष इति सर्वमवदातम्।

**स्वावलोकनप्रश्नाः**

१. शब्दश्लेषस्य किं लक्षणम्?

२. सभङ्गश्लेषस्य किं लक्षणम्

३. अभङ्गश्लेषोनाम कः?

| |
|---|
| ४. शब्दश्लेषार्थश्लेषयोः मध्ये को भेदः ? |
| ५. सभङ्गाभङ्गश्लेषयोः को भेदः ? |

### ५.१०.४.श्लेषः अभङ्गश्लेषः सभङ्गश्लेषो वा

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते इति । अनेकेनार्थेन सम्मिलितैः एकोच्चारणेनैव युगपदनेकार्थबोधकैः पदैरभिधायाऽनेकार्थबोधने सति श्लेषोऽलङ्कारः। स च श्लेषः सभङ्गाभङ्गोभयात्मकत्वात् त्रिविधः। तत्र 'येन ध्वस्तमनोभवेन' इत्यादौ सभङ्गः शब्दश्लेषः। **'अन्धकक्षयकरः'** इत्यादौ अभङ्गः शब्दश्लेषः। अनयोश्चैकत्र सम्भवात् सभङ्गाभङ्गात्मकः शब्दश्लेषः। अतस्त्रिविध एव श्लेषः शब्दालङ्कारो नार्थालङ्कार इति साहित्यदर्पणकारस्य श्रीविश्वनाथस्य हृदयम् ।

अत्रालङ्करसर्वस्वकारादयः ननु सभङ्ग एव शब्दश्लेषविषयः यत्रोदात्तादिस्वरभेदाद् भिन्नप्रयत्नोच्चार्यत्वेन भिन्नयोः शब्दयोः जतुकाष्ठन्यायेन श्लेषः। अभङ्गस्तु अर्थश्लेष एव। यत्र स्वराभेदाद् अभिन्नप्रयत्नोच्चार्यतया शब्दाभेदाद् अर्थयोरेकवृन्तफलद्वयन्यायेन श्लेषः। यो हि यदाश्रितः स तदलङ्कार एव, अलंकार्यालंकरणभावस्य लोकवद् आश्रयाश्रयित्वेनोपत्तिरिति वदन्ति, इति पूर्वपक्षः।

अथ सिद्धान्तपक्षः परं मतमिदमन्ये काव्यप्रकाशकारादयो न सहन्ते। तथाहि- अत्र ध्वनिगुणीभूतव्यङ्यदोषगुणालंकाराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वय व्यतिरेकानुविधायित्वेन नियमः। अर्थात् शब्दार्थयोर्मध्ये यस्मिन् शब्देऽर्थे वा सति ये ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालंकाराः सन्ति, असति च न सन्ति, ते तदधीनस्वरूपतया तदीया इति व्यवस्थाप्यन्ते। एवं च शब्दभङ्गाभङ्गोभयविधस्थलेऽपि शब्दश्लेष एव ।

न च अन्धकक्षयकरः - इत्यादौ शब्दभेदः। अर्थभेदेन इति दर्शनात् । 'प्रत्यर्थं शब्दनिवेशः' इति सिद्धान्तादित्यर्थः।

किञ्चाऽत्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभोट्टङ्कनात् शब्दालंकारत्वमेव। विसदृशशब्दद्वयस्य बन्धे चैवं विधवैचित्र्याभावाद् वैचित्र्यस्यैव चाऽलंकारत्वात्। अर्थमुखप्रेक्षितया अर्थालङ्कारत्वे अनुप्रासादीनामपि रसादिपरत्वेन, अर्थमुखप्रेक्षितया अर्थालंकारत्वप्रसङ्गः।

शब्दस्याभिन्नप्रयत्नोच्चर्यत्वेन अर्थालंकारत्वमिति चेत् । तदा 'प्रतिकूलतामुपगते हि विधौ' इत्यादौ शब्दभेदेऽपि अर्थालंकारत्वं तवापि प्रसज्येत। तस्मादुभयत्रापि शब्दालंकारत्वमेव, यत्र च शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना तत्र 'स्तोकेनोन्नतिमायाति' इत्यादौ अर्थश्लेष एव।

इदमत्रावधेम् - सभङ्गपदस्थले शब्दश्लेषः, अभङ्गपदस्थले स्वभावादनेकार्थैः शब्दैरनेकार्थाभिधाने शब्दश्लेषः। स्वभावादेकार्थैः शब्दैरनेकार्थाभिधाने अर्थश्लेषः, इति साहित्यदर्पणकारस्य विश्वनाथस्य मतम् । तथा चोक्तमर्थश्लेषनिरूपणप्रसङ्गे-

**'शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् '** इति ।

**स्वावलोकनप्रश्नाः**

१.श्लेषः शब्दश्लेषो वा इति विषये अलंकारसर्वस्वकारस्य मतं किम्?

२.मम्मटस्य अभिप्रायः कः?

३.श्लेषस्य शब्दार्थगतत्वे किं निर्णायकम्?

## ५.११.पुनरुक्तवदाभासनिरूपणम्

### ५.११.१.पुनरुक्तवदाभासनिरूपणम्

**यदुक्तमन्यथावाक्यमन्यथान्येन योज्यते।**
**श्लेषेण काक्वा वा ज्ञेया वक्रोक्तिः तथा द्विधा।**

श्लेषवक्रोक्तिः काकुवकोक्तिश्चेति।

आपातदृष्ट्या न तु पर्यालोचनयापि, अर्थस्य पौनरुक्त्यप्रतीतिः विभिन्नाकृतिविशिष्टशब्दगा सा पुनरुक्तवदाभासो नामालंकरः। तथा चोक्तं मम्मटभट्टैः-

**'पुनरुक्तवदाभासो विभिन्नाकारशब्दगा। एकर्थतेव '** इति।

अर्थाद् भिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेन मुखे भासनं पुनरुक्तावदाभासः। स च द्विविधः - शब्दमात्रस्य, शब्दार्थयोश्चेति। शब्दनिष्ठोऽपि द्विविधः सभङ्गशब्दनिष्ठः,

अभङ्गशब्दनिष्ठश्च। तत्र सभङ्गशब्दनिष्ठो यथा-

**अरिवधदेहशरीरः सहसारथिसूततुरगपदातः।**
**भाति सदानत्यागःस्थिरतायामवनितलतिलकः।।**

अत्र देहशरीरशब्दयोः सारथिसूतशब्दयोः, दानत्यागशब्दयोश्चापाततः पौनरुक्त्यम्, सभङ्गाश्चैते शब्दा इति सभङ्गशब्दनिष्ठः पुनरुक्तवदाभासः। शब्दमत्रालंकारत्वं चोभयोरपि शब्दयोः पर्यायपरिवृत्त्यसहत्वादिति बोध्यम् ।

**स्वावलोकनप्रश्नाः**

१.पुनरुक्तवदाभासस्य किं लक्षणम्?

२.सभङ्गशब्दनिष्ठस्य पुनरुक्तवदाभासस्य उदाहरणे केषां शब्दानां पुरुक्तवदाभासता?

३.पुनरुक्तवदाभासस्य द्वौ भेदौ कौ?

५.११.२.पुनरुक्तवदाभासस्य शब्दार्थालंकारत्वम् अर्थालंकारत्वम् उत उभयालंकारत्वं वा

**अरिवधदेहशरीरः सहसा रथिसूततुरगपदातः।**
**भाति सदानत्यागःस्थिरतायामवनितलतिलकः।।**

अत्र देहशरीरशब्दयोः सारथिसूतशब्दयोः, दानत्यागशब्दयोश्च आपाततः पौनरुक्त्यम्, सभङ्गाश्चैते शब्दा इति सभङ्गशब्दनिष्ठः पुनरुक्तवदाभासः। शब्दमात्रालंकारत्वं चोभयोरपि शब्दयोः पर्यायपरिवृत्त्यसहत्वादिति बोध्यम् ।

इदमत्र तत्त्वम् - देहशरीर इति द्वावपि सार्थकौ सभङ्गौ च । 'सारथिसूत' इति द्वयोराद्यो निरर्थकः, अन्त्यश्च सार्थकः, उभावपि सभङ्गौ। 'दानत्याग' इति निरर्थकत्वं च विवक्षितार्थाभावत्त्वमिति बोध्यम् ।

अभङ्गशब्दनिष्ठो यथा-

**चकासत्यङ्गनारामाः कौतुकानन्दहेतवः।**
**तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः।।**

अत्र अङ्गनारामाशब्दयोः स्त्र्यर्थकतया, कौतुकानन्दशब्दयोः सन्तोषार्थकतया, सुमनसो विबुधा इत्यनयोर्देवार्थकतया, आपाततः पौनरुक्त्यम्, अभङ्गाश्चेते शब्दा इत्यभङ्गशब्दनिष्ठः पुनरुक्तवदाभासोऽलंकारः।

शब्दार्थनिष्ठो यथा-

**तनुवुजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।**
**तेजोधाम महः पृथुमनसामिन्द्रो हरिर्जिष्णुः।।**

अत्र तनुवपुश्शब्दयो; शरीरार्थकतया, करिकुञ्जरशब्दयोः गजार्थकतया, रुधिररक्तशब्दयोः शोणितार्थकतया, तेजोधाममहश्शब्दानां तेजोऽर्थकतया, इन्द्रहरिजिष्णुशब्दानां च देवेन्द्रार्थकतया, आपाततः पौनरुक्त्यम् । तत्र तनुकुञ्जर- रक्तधामहरिजिष्णुशब्दाः परिवृत्तिं न सहन्ते, वपुकरिरुधिरेन्द्रशब्दास्तु तां सहन्ते, इत्यस्योभायालंकारत्वम् । अन्वयव्यतिरेकमूलिकैव 'शब्दपरिवृत्तिसहत्वासहत्वाभ्यां शब्दार्थगतव्यवस्थितिः' इति।

**स्वावलोकनप्रश्नाः**

१.पुनरुक्तवदाभासस्य सभङ्गस्य उदारहणं किम् ?

२.शब्दार्थगतव्यस्थितिः कथम्?

३.शब्दार्थनिष्ठस्य पुनरुक्तवदाभासस्य उदाहरणं किम्?

## ५.१२.चित्रालंकारनिरूपणम्

### ५.१२.१.चित्रालंकारलक्षणम्

सन्निवेशविशेषेण न्यस्ता वर्णाः खड्गमुरजपद्माकरमुल्लसयन्ति तच्चित्रमलंकारः। उक्तं च मम्मटेन-

**'तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता।।'** इति।

उदाहरणं यथा-

**भासते प्रतिभासार रसाभासाहताविभा।**
**भावितात्मा शुभा वादे देवाभा बत ते सभा।।**

अत्र पद्मबन्धः। अष्टदलपद्मबन्धोऽयम् । अत्र कर्णिकायां श्लोकस्यादिमो वर्णः

स्थाप्यः। स चाष्टधा श्लिष्टः। दले दले द्वौ वर्णौ लेख्यौ । तत्र दिग्दलेषु निर्गमप्रवेशाभ्यां श्लिष्टौ वर्णौ, विदिग्दलेषु तु न श्लिष्टौ। तत्र प्राच्यदले आदौ निर्गमः, श्लोकान्ते च प्रवेशः। दक्षिणोत्तरदलयोः निर्गत्यैव प्रवेशः, पश्चिमदले तु प्रविश्यैव निर्गमः। आग्नेयवायव्यदलयोः प्रवेश एव, नैरृतेशानयोस्तु निर्गमएवेति।

**स्वावलोकनप्रश्नाः**

१. चित्रमिति पदं काव्यशस्त्रे कथं प्रयुज्यते?

२. चित्रालंकारस्य लक्षणं मम्मटेन किं दत्तम्?

३. पद्मबन्धः लेखनीयः?

**५.१२.२.चित्रालंकारभेदाः**

काव्यप्रकाशस्य नवमोल्लासे चित्रालांकारः प्रदर्शितः। तत्र खड्गबन्धः। पद्मबन्धः, मुरजबन्धः, सर्वतोभद्रमिति चत्वारः भेदाः दर्शिताः।

**स्वावलोकनप्रश्नः**

१. काव्यप्रकाशे कति चित्रबन्धाः दर्शिताः?

**५.१३.सारांशः**

काव्यशोभाकारत्वमलंकारसामान्यलक्षणम्। भरतोक्तेषु अलंकारेषु शब्दालंकराः अर्थालंकाराः च सन्ति। परं तदनन्तरवर्तिभिः आचार्यैः उभयालांकारा अपि परिगणीताः। ते च यमकालंकारमाधारीकृत्यैव अनुप्रासभेदान् निरूपितवन्तः। तदतिरिच्य खड्गाद्याकारविशेषानुरूपं शब्दसंरचनां कृत्वा चित्रालंकारान् निरूपितवन्तः।एते चित्रालंकाराः इत्युच्यन्ते। तेषु क्रमशः शब्दालंकाराः यमकम्, अनुप्रासः, तद्भेदाश्च प्रसिद्धाः। शब्दालंकरो नाम शब्दपरिवर्तनासहिष्णवः भवन्ति। य्था-

**सितकरकररुचिरविभा विभाकराकार धरणीधर कीर्तिः।**

**पौरुषकमला कमला सापि तवैवास्ति नान्यस्य।।**

विभाकराकार सूर्यस्येव आकारवन्! तीव्रप्रतापशालिन्! धरणिधर! राजन् , सितकरकररिचिरविभा चन्द्रकिरणवदतिधवला कीर्तिः पौरुषकमला पौरुषलक्ष्मीः सा अप्रसिद्धा कमला अपि लक्ष्मीः, तवैव अस्ति न अन्यस्य अस्ति।

समानार्थकानां पदानाम् आवृत्तौ लाटानुप्रासः द्वयोः पदयाह्नः अर्थः एकः भवति चेदेव लाटानुप्रासः। अत्र 'कर कर' 'विभा विभा' कमला कमला इति द्विवारां द्विवारं च पदानि प्रयुक्तानि। अतः लाटानुप्रासः। कर शब्दस्य उभयत्रापि किरण इत्येव अर्थः। तथा सति करशब्दस्य परिवर्तनं कृत्वा किरण शब्दः प्रयुज्यते चेत् स अलंकारः नैव भवति इति शब्दस्य परिवर्तनं न सहते इति शब्दालकारः।

शब्दपरिवर्तनसहिष्णुः अर्थालंकारः। यथा मुखं चन्द्र इव सुन्दरम् इत्यत्र उपमालंकारः। अत्र मुखम् उपमेयम्, चन्द्रः उपमानम् , सुन्दरम् इति समानधर्मः इव उपमावाचकः। अतः अत्र उपमा अलंकारः। अत्र उपमानोपमेयसमानधर्मोपमावाचकानां परिवर्तनेऽपि यथा वदनं सुधाकरः यथा रुचुरम् इति तथापि उपमालंकारः यथातथमेव तिष्ठति। अतः अयं अर्थालंकारः इति विवेकः।

यत्र केचन परिवर्तनसहिष्णवः केचन परिवर्तनासहिष्णवः शब्दाः भवन्ति तत्र उभयालंकाराः भवन्ति। यथा पुनरुक्तवदाभासे अलंकारे- उदाहरणं यथा-

**तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।**
**तेजोधाम महः पृथुमनसामिन्द्रो हर्रिजिष्णुः।।**

इदं सिंहवर्णनम् । असौ हरिः तनुवपुः सूक्ष्ममध्यः अजघन्यः श्रेष्ठः एव। करिकुञ्जररुधिररक्तखरनखरः वरगजरक्तकारणात् तीक्ष्णनखः तेजसः पराक्रमस्य आश्रयः। महःपृथुमनसां तजसा महामनसाम् मध्ये जिष्णुः इन्द्रः श्रेष्ठः।

अत्र तनु वपुः शब्दयोः देहः इति, करिकुञ्जरशब्दयोः गज इति रुधिर-रक्त-शब्दये रक्तमिति, तेजोधाममहः इति शब्दानां तेज इति, इन्द्रहरिजिष्णुशब्दानां च देवेन्द्र इति अर्थग्रहणात् आपाततः पुनरुक्तिः दृश्यते। एतेषु तनुकुञ्जररक्तधामहरिजिष्णुशब्दाः परिवृत्तिसहाः न भव्न्ति। अत्र शब्दालंकारः। वपुः करिरुधिर-इन्द्रशब्दाः परिवृत्तिसहाः । अतः अत्र अर्थालंकारः।

अत्र एकस्य पदस्य त्वादेः परिवर्तने अलंकाराः नास्ति। त एव शब्दाश्रयः। अन्यस्य पदस्य परिवर्तनेऽपि अलंकारता न गता। तः अर्थाश्रयः । एवम् अयमलंकारः उभयाश्रयः।

तथा च अलंकाराः शब्दगताः, अर्थगताः, उभयगताः इति त्रिधा भवन्ति। तेषु शब्दगताः अनुप्रासादयः। तत्रैव च्चालंकारादयः परिगण्यन्ते। अर्थगताश्च उपमादयः। उभयगताः पुनरुक्तवदाभासादय;।

शब्दपरिवर्तनसहाः शब्दालंकाराः। शब्दपरिवर्तनासहाः अर्थालंकाराः। मिश्रिताश्च उभयालंकाराः।

अर्थालाम्काराः पुनः-

प्रतीयमानवस्तवः- यथा समासोक्तिपर्यायोक्त्याक्षेपार्थान्तरन्यासाः।

प्रतीयमानरसभावादयः- रसवत्प्रेयऊर्जस्विसमाहितादयः।

प्रतीयमानौपम्याः- दीपकापह्नुतिसन्देहप्रभृतयः।

अस्फुटप्रतीयामनाः- उपमादयः।

नवमोल्लासे शब्दालकाराः निरूपिताः। तेषु यमकम् तद्गतभेदाः, अनुप्रासः तदीयाः भेदाः, चित्रालंकारः, पुनरुक्तवदाभासः इति उभयालंकाराः इत्येव प्रतिपाद्याः अलंकाराः।

**१.वक्रोक्तिः।**

वक्त्रा कमपि अभिप्रायं मनसि निधाय प्रयुक्तं वाक्यं अन्येन श्लेषेण काकुस्वरेण वा अन्यथा योज्यते सः श्लेषमूला वक्रोक्तिः, काकुमूला वक्रोक्तिः द्विधा भवति इति ज्ञायते। तत्रापि श्लेषमूला वक्रोक्तिः सभङ्गश्लेषमूला अभङ्गश्लेषमूला वक्रोक्तिः इति द्विधा।

**२.अनुप्रासः-**

रसाद्यनुगतः पकृष्टो न्यासः अनुप्रासः। वर्णसाम्यमनुप्रासः।

वर्णानुप्रासः पदानुप्रासः इति अनुप्रासः द्विविधः। अर्थरहितवर्णानामेव आवृत्तौ वर्णानुप्रासाः। अर्थसहितपदानामेव आवृत्तौ पदानुप्रासः।

अव्यवधानेन वर्णानां द्विधा योजनमेव । स्वराणां साम्याभावह्लऽपि व्यञ्जनानां साम्यं वर्णसाम्यं रसादीन् अनुगच्छतीतिरसाद्यनुकूलः प्रकृष्टो न्यासः अनुप्रासः।

सचायं छेकानुप्रासः, वृत्त्यनुप्रासः, लाटानुप्रासः इति त्रिधा भवति। वृत्त्यनुप्रासे एव या वृत्तिः सा उपनागरिका, परुषा, कोमला इति त्रिधा भवति। माधुर्यव्यञ्जकैः वर्णैः उपनागरिका इतिवृत्तिः भवति। ओजः

प्रकाशकैः वर्णैः परुषा वृत्तिः भवति। इतरैः वर्णैः कोमला वृत्तिः भवति। कोमला वृत्तिरेव ग्राम्यवृत्तिरित्युच्यते।एताः तिस्रः वृत्तयः एव वामनादीनां मते वैदर्भीप्रमुखाः रीतयः। अर्थात्

उपनागरिका वैदर्भी इति परुषा वृत्तिः गौडी इति कोमला वृत्तिः पाञ्चाली रीतिरिति अभिप्रयन्ति। इमौ द्वौ भेदौ वर्णसाम्यमूलकौ वर्णोगतौ भवतः। लाटानुप्रासस्तु पदगतः। लाटानुप्रासः-शब्दार्थयोः भेदाभावद्धऽपि तत्रत्यप्रयुक्तशब्दाः अर्था श्च एकाकारा अपि अन्वयभेदेन जायमानः अयमनुप्रासः शब्दगतानुप्रासः। यं लाटदेशीयानामभीष्ट इति लाटानुप्रास इति कथ्यते। अय्मेव पदानुप्रास इति केचन कथयन्ति।

शब्दानुप्रासः नाम पदानुप्रासः पदगतः नामगतः अर्थात् प्रातिपदिकगतः इति द्विविधः। नामगतः समासगतः असमासगतः इति द्विविधः। समासगतः एकसमासगतः अनेकसमासगतः इति पुनर्द्विधा। एवं शानुप्रासाः पञ्चधा भिन्ना भवन्ति।

**सर्वेषां मूले उदाहरणनि द्रष्टव्यानि।**

### ३. यमकम्-

यमके बहूनां वर्णानाम् आवृत्तिः भवति। तेषामर्थवत्त्वे एकैकस्य वर्णसमुदायस्य एकैकः अर्थः भवति। कुत्रचित् वर्णाः यद्यपि भिन्नभिन्नरूपेण भवन्ति, तथापि श्रुतिसाम्येन यमकम् अण्ग्लिगक्रियते। यमकादौ डलयोः रलयोः बवयोः शषयोः नणयोः एकता लक्ष्यते। अन्ते विसर्गवताम् अविसर्गवतां अनुस्वारवताम् अनुस्वाररहितानां च अभेदः गृह्यते। आवृत्तवर्णसमुदायानाएकार्थकत्त्वे लातानुप्रासः भओन्नार्थकव्ये यमकमिति विवेकः।अयं यमकालांकारः बहुधा भिन्नो भवति।

१.मुखयमकम् -प्रथमपादस्य द्वितीयपादे आवृत्तिः।

२.संदंशयमकम्-प्रथमपादस्य तृतीयपादे आवृत्तिः।

३.आवृत्तियमकम् -प्रथमपादस्य चतुर्थपादे आवृत्तिः।

४.गर्भयमकम्- द्वितीयपादस्य तृतीयपादे आवृत्तिः।

५.संदष्टकयमकम् - द्वितीयपादस्य चतुर्थपादे आवृत्तिः।

६.पुच्छयमकम्- तृतीयपादस्य चतुर्थपादे आवृत्तिः।

७.पङ्क्तियमकम्- प्रथमपादस्य द्वितीयपादे तृतीयपादे चतुर्थपादे च आवृत्तिः।

८.युग्मकयमकम् - एकेस्मिन्नेवे श्लोके प्रथमपादस्य द्वितीयपादे तृतीयपादे चतुर्थपादे नियमनं यदि भवति,

अर्थात् प्रथमद्वितीयपादौ , तृतीयचतुर्थपादौ समानाकारौ यदि स्याताम्

तत् युग्मकयमकमिति कथ्यते।

९. परिवृत्तियमकम् - प्रथमपादं चतुर्थपादे द्वितीयपादं तृतीयपादे नियमयेत् तत् परिवृत्तियमकम्

एवं रूपह्नण पादगताः यमकस्य नव भेदाः।

१०.अर्धावृत्तियमकम्- श्लोकस्य पूर्वार्धमेव यदि आवर्तयेत् ।

११.श्लोकावृत्तियमकम् - संपूर्णोऽपो श्लोकः यदि आवर्त्यते। इदमेव महायमकमिति कथ्यते। एतेषामुदाहरणानि दिङ्मात्रं प्रदर्शितानि। यथा- संदंशयमकस्य युग्मकयमकस्य महायमकस्य संदष्टकयमकस्य आद्यन्तयमकस्य च । एवं यमकस्य अनेके भेदाः भवन्तीति सूचितम् । चित्रालंकरोऽपि स्थालीपुलाकन्याये दर्शितम्।

**५.१४.बोधप्रश्नाः**

१.. उपनागरिकावृत्तेः किं लक्षणम् ?

२.. परुषायाः वृत्तेः किं लक्षणम् ?

३. यमकालंकारस्य किं लक्षणम्?

४. पदभागा वृत्तियमकस्यापरं नाम किम् ?

५.काव्यप्रकाशकारानुसारेण श्लेषस्य लक्षणं लिखत?

६. काव्यप्रकाशानुसारेण श्लेषस्य कति भेदाः भवन्ति।

७. श्लेषस्य के अष्टौ भेदाः भवन्ति?

८. काव्यप्रकशकारानुसारेण श्लेषस्यनवमो भेदः कः?

९. मम्मटाभिमतम् पुनरुक्तवदाभासयस्य किं लक्षणम् ।

१०. मम्मटमतानुसारेण कति शब्दालंकाराः सन्ति।

११. केमम्मटाभिमतः षट्ःशब्दालंकाराः सन्ति?

**५.१५. अभ्यासप्रश्नाः**

१. वक्रोक्तेः स्वरूपं निरूप्य तस्य भेदान् निरूपयत।

२. काव्यप्रकाशकानुसारेण अनुप्रासस्य किं स्वरूपम् ।

३. श्लेषस्य भेदान् सोदाहरणं विशदयत।

४.यमकभेदान् सोदाहरणं विशदयत।

# दशम उल्लासः

अष्टमः खण्डः

**१.प्रस्तावना -**

काव्यप्रकाशे सर्वेषामुल्लासानामपेक्षया दशमोल्लासः आकारेण विस्तृतः। अत्र मम्मटः एकोनषष्टिम् अर्थालंकारान् लक्षणोदहरणसमन्वयपूर्वकं प्रतिपादयामास। संसृष्टेः संकरस्य च अनेके भेदाः अत्र अवान्तरभेदैः सह निरूपिताः। अलंकारदोषविषये सप्तमोल्लासे चर्चितान् दोषानतिदिश्य अन्ते केचन अंशाः उपपादिताः। तत्रापि सर्वप्रथमम् उपमालंकारः निरूपितः। काव्यशोभाकरत्वमलंकारलक्षणम्। एते अलंकाराः पुनः शब्दार्थोभयालकारभेदैः त्रिधा भवन्ति।

गतपाठ्यविषयेषु शब्दोभयालंकाराणां विषये ज्ञातवन्तः। तदेव पुनः वयः स्मारयामः।

**१.शब्दालंकारलक्षणम्-**

शब्दपरिवर्तनासहिष्णुता शब्दालंकरस्य लक्षणम् । अर्थात् पर्यायपदप्रयोगस्य अस्वीकार्यता।

शब्दपरिवर्तने अलंकारः न तिष्ठति चेत् शब्दालंकारः।

यथा- शब्दश्लेषे पृथुकार्तस्वरपात्रम् तव मम च भवनम् समानम् इति कश्चन याचकः वदति। अत्र राजपक्षे पृथु नाम बहु इत्यर्थं : कार्तस्वरपात्रम् नाम स्वर्णपात्रम् इत्यर्थं च स्वीकुर्मः। बहुस्वरसुवर्णपात्रसहितम् राजभवनम् इत्यर्थः।

याचकस्य पक्षे तु पृथुकानाम् बालकानाम् आर्तस्वरः रोदनस्वरः तस्य पात्रम् स्थानमित्यर्थं स्वीकुर्मः। एवमत्र शब्दश्लेषः।

यदि पृथु इति पदस्य परिवर्तनं कृत्वा वयं बहुकार्तस्वरपात्रम् इति प्रयुञ्ज्महे तदा याचकपक्षे स चार्थः नायाति। अतः अयं शब्दश्लेषः शब्दपरिवर्तनासहिष्णुः।

**२.अर्थालंकारलक्षणम्-**

शब्दपरिवर्तनसहिष्णुता अर्थालंकारस्य लक्षणम् । पर्यायशब्दप्रयोगस्य स्वीकार्यता।

यथा- अर्थश्लेषे -लसत्तेजःपुञ्जो विभाति विभाकरः।

अत्र विभाकरः नाम सूर्यः इति एक : अर्थः विभाकारः इति कश्चन तन्नाम राजा। लसत्तेजःपुञ्जः इति विशेषणपदस्य प्रकाशमानपराक्रमसमुदायः राजा, प्रकाशमानकान्तिसमुदायाः सूर्यः इति अर्थः स्वीक्रियते। अत्रैव पुनः राजत्कान्तिनिकायः इति तस्य पर्यायपदस्य प्रयोगेऽपि स अर्थः यथातथमेव तिष्ठतीति अस्य अर्थालंकारता।

३.उभयालंकारलक्षणम्- यत्र केचन शब्दाः परिवर्तनसहिष्णवः अन्ये परिवर्तनसहिष्णवः भवन्ति चेत् उभयालंकारो भवति।

यथा- पुनरुक्तवदाभासे-

**तनुवुजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।**
**तेजोधाम महः पृथुमनसामिन्द्रो हरिर्जिष्णुः।।**

अत्र तनुवपुश्शब्दयो; शरीरार्थकतया, करिकुञ्जरशब्दयोः गजार्थकतया, रुधिररक्तशब्दयोः शोणितार्थकतया, तेजोधाममहश्शब्दानां तेजोऽर्थकतया, इन्द्रहरिजिष्णुशब्दानां च देवेन्द्रार्थकतया, आपाततः पौनरुक्त्यम् । तत्र तनुकुञ्जर- रक्तधामहरिजिष्णुशब्दाः परिवृत्तिं न सहन्ते, वपुःकरिरुधिरेन्द्रशब्दास्तु तां सहन्ते, इत्यस्योभायालंकारत्वम् ।

अधुना अर्थालंकाराणां प्रसङ्गात् तस्य स्वरूपं किञ्चिदवलोकयामः।

**पुनः अर्थालंकाराः चतुर्धा भवन्ति।**

चमत्काजनकः व्यङ्ग्यः एव। अयमेव व्यङ्ग्यः प्रतीयमानशब्देनापि व्यवह्रियते। अलंकारेषु प्रतीयमानं कदाचित् वस्तुरूपं भवति। कदाचित् सादृश्यं भवति। कादाचित् रसभावादिः भवति। कदाचित् अस्फुटं भवति। तदाधारीकृत्य अर्थालंकाराः चतुर्धा भवन्ति।

१. प्रतीयमानवस्तवः,

२. प्रतीयमानौपम्याः,

३. प्रतीयमानरसभावादयः

४. अस्फुटप्रतीयमाना इति। यथा-

१. प्रतीयमानवस्तवः समासोक्त्यप्रस्तुतप्रशंसापर्याक्तादयः।

२. प्रतीयमानौपम्याः दीपकादयः।

३. प्रतीयमानरसभावादयः रसवदाद्यलंकाराः।

४. अस्फुटप्रतीयमानाः उपमादयः।

तेषु उपमालंकरः सर्वप्रथमः अस्फुटप्रतीयमानः अलंकारः। अयमेव अलंकारः सर्वेषामलंकाराणाम् मूलरूपः इति अप्पयदीक्षितादयः अभिप्रयन्ति।

अतः काव्यशास्त्रीयग्रन्थेषु अर्थालंकारसन्दर्भे उपमालंकारमेव प्रथमतः निरूपयन्ति। मम्मटः दशमे उल्लासे उपमामारभ्य एव ५९ अलंकारान् प्रतिपादयामास। तदतिरिच्य

संसृष्टिसंकरौ दर्शितौ।

एतेषु अलंकारेषु अधोनिर्दिष्टानामलंकराणां अवान्तरभेदाः निरूपिताः।

१.उपमालकारस्य द्वौ भेदौ। तत्रापि लुप्तोपमायाः षट् भेदाः। लुप्तोपमायाः एकोनविंशतिभेदाः। योगेन पञ्चविंशतिर्भेदाः।

२.रूपकस्य पञ्चभेदाः।

३ अप्रस्तुतप्रशंसायाः त्रयः भेदाः।

४.दीपकस्य द्वौ भेदौ।

५.उदात्तस्य द्वौ भेदौ।

६.समुच्चयस्य द्वौ भेदौ।

७.पर्यायस्य द्वौ भेदौ।

८.सङ्करस्य त्रयः भेदाः इति।

एते भेदाः तत्तदलंकारप्रसङ्गे यथासम्भवं ज्ञेयाः। एतान् विहाय इतरे अष्टपञ्चाशत् अलंकाराः लक्षणोदाहरणसमन्वयपूर्वकं सुलभतया निरूपिताः दशमे उल्लासे मम्मटेन।

प्रायः अलंकाराणां परस्परभेदज्ञानाय उपमानम्, उपमेयः, वर्ण्यः अवर्ण्यः, विषयः विषयी, प्रस्तुतम् अप्रस्तुतम्, प्रकृतम् अप्रकृतम् इत्यादीनां पारिभाषिकपदानां ज्ञानमपेक्षितम्।

यद्वर्ण्यते तत् उपमेयम्, वर्ण्यम्, विषयः, प्रस्तुतम्, प्राकरणिकम्, प्रकृतम् इति शब्दैः व्यवह्रियते।

येन सादृश्यादिकं प्रतिपाद्यते तत् उपमानम्, अवर्ण्यम्, अप्रस्तुतम्, अप्राकरणिकम्, अप्रकृतम् इति शब्दैः प्रतिपाद्यते।

प्रायः अलंकाराणां नामभिरेव तेषां लक्षणमस्माभिर्ज्ञायते।

यथा - उपमा इति नाम्ना उपमानोपमेययोः साम्यमत्र प्रतिपाद्यते इति ज्ञायते।

उत्प्रेक्षानाम्ना ऊहः इति सम्भावनमिति,

रूपकम् नाम्ना आरोपः इति

स्वभावोक्तिर्नाम वस्तुस्वभाववर्णनम् इति च ज्ञायते।

एवं तत्तल्लक्षणानाम् अभ्यूहः कर्तुं शक्यते। उपमानादिशब्दज्ञानेन अलंकाराणां

नामभिश्च अलंकारस्वरूपं निर्धारयितुं प्रभवाम।

तेनैव क्रमेण अयं पाठ्यांशः निरूप्यते।

**स्वावलोकनप्रश्नाः**

१. अलंकारलक्षणं किम्?

२. शब्दालंकारास्य सामान्यलक्षणं किम्?

३. अर्थालंकारस्य सामान्यं लक्षणं किम् ?

४. उभयालंकारस्य सामान्यलक्षणम् किम् ?

५. अलंकारविशेषलक्षणज्ञानं सामान्यतः कथं भवति?

६. अर्थालंकाराः कतिधा भवन्ति?

**२.उद्देश्यम्-**

अस्य दशमोल्लासस्य अध्ययनेन वयं अधोनिर्दिष्टान् अंशान् जानीमः-

- अर्थालंकारस्वरूपम्
- शब्दार्थोभयालंकाराणां परस्परं भेदः
- अलंकारविशेषाणां लक्षणविवेचनम्
- अलंकारविशेषाणां लक्षणानां लक्ष्येषु समन्वयः
- अलंकारविशेषाणां भेदाः
- अलंकाराणां परस्परं भेदाः

**३.उपमालक्षणम् सोदाहरणम् तद्भेदाः**

साधर्म्यमुपमा भेदे ।

अर्थात् उपमानोपमेययोः भेदे सति, साधर्म्यम् –उपमाननोपमेययो समानधर्मेण गुणक्रियादि-

रूपेण सम्बन्धः उपमालंकारः। सा च द्विधा –

**१.पूर्णा**

२.लुप्ता च ।

क्रमशः विवरणम्-

१.पूर्णा -उपमानम्, उपमेयः, साधारणधर्मः, उपमावाचकः इत्यादीनां चतुर्णामपि उपादाने पूर्णा भवति ।

२.लुप्ता-उपमानोपमेयोपमावाचाकानां मध्येएकस्य द्वयोस्त्रयाणां वाऽनुपादाने (लोपे) लुप्तोपमा ।

**तत्र पूर्णा प्रथमं द्विधा श्रौती,क आर्थी इति।**

१.श्रौती-

यत्र यथाशब्दः, इवशब्दः साक्षात् प्रयुज्यते सा श्रौती।

२.आर्थी चेति द्विविधा ।

यत्र तुल्यम्, समम्, समानम्, सदृशम्, निभम्, संकाशम्, नीकाशम्, उपमा, त्यादीनां प्रयोगे आर्थी।

द्विविधाऽपि सा प्रत्येकं वाक्यसमासतध्दितगतत्वेन त्रिविधत्वात् पर्णोपमा षड्विधा ।

क्रमेण विवरणं दीयते-

वाक्यगता- यत्र वाक्ये उपमानं, उपमेयं, समानधर्मः उपमावाचकः इति चत्वारः प्रयुज्यन्ते।

समासगता - यत्र उपमावाचकः समासगति भवति सा समासगता।

तद्धितगता- यत्र उपमावाचकः तद्धितप्रत्ययेन ज्ञायते चेत् तद्धितगता भवति। तथाहि-



धर्मलोपे पञ्च, उपमानलोपे द्वौ, इवादिलोपे षट्, धर्मवाद्योलोपे द्वौ,धमोपमानयोलोपे द्वौ, इवाद्युपमेययोलोपे एकः,त्रयाणां च लोपे एकः ,इति लुप्तोपमायाः एकोनविंशतिर्भेदाः। दिङ्मात्रमुदह्रियते –

**स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।**
**प्रभावप्रभवं कान्तं स्वाद्गीनपतिका यथा ।।**

वाक्यगतायाः श्रौती पूणोपमायाः उदाहरणमिदम् । अत्र स्वाधीनपतिका -उपमानम्, विजयश्रीरूपमेया, 'न मुञ्चति ' इत्यपरित्यागः, साधरणो धर्मः, यथेत्युपमाप्रतिपादकम्। न चैतेषां मध्ये कयोरपि समास इति वाक्यगा श्रौती पूणाह्वपमेयम्।

इतरे अलंकाराः- अनन्वयः, उपमेयोपमा, उत्प्रेक्षा, सन्देहः, रूपकम्, अपह्नुतिः, श्लेषः,

समासोक्तिः, निदर्शना, अप्रस्तुतप्रशंसा, अतिशयोक्तिः, प्रतिवस्तूपमा, दृष्टान्तः न्तः;:,दीपकम्, तुल्ययोगिता, व्यतिरेकः आक्षेपः,विभावना,विशेषोक्तिः,अर्थान्तरन्यासः

विरोधः,स्वभावोक्तिः,व्याजस्तुतिः काव्यलिङ्गम्, पर्यायोक्तम्, परिकरः, परिसंख्या, असङतिः, भ्रान्तिमान्, संसृष्टिः सङ्करः,इति।

**१. अनन्वयः–**

**उपमानोपमेयत्वे एकस्यैवकवाक्यगे । अनन्वयः** इति।

एकस्यैव वस्तुनः, एकस्मिन्नेव वाक्ये ,उपमानत्वम् ,उपमेयत्वं च भवति चेत्तदा अनन्वयालङ्कारः । न विद्यते अन्वयः– सम्बन्धः, अर्थात् उपमानान्तरेण यत्र सोऽनन्वयः। स्वस्य स्वेनैवोपमाऽनन्वय इति तत्त्वम् । उदाहरणं यथा–

**न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव ।**
**यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः ।।**

अत्र स्वेनैव नितम्बिन्यादिरूपवस्तुना स्वस्यैवोपमा इति अनन्वयालङ्कारः ।

**२. उपमेयोपमा—** द्वयोःपदार्थयोः वाक्यद्वये पर्यायेण (परिवर्तनेन) उपमानोपमेयत्वम् उपमेयोपमानालङ्कारः । इतरोपमानव्यवच्चेदपरा उपमानोपमेया इति उपमेयोपमा ।

उक्तं च मम्मटेन –

**विपर्यास उपमेयोपमा तयोः इति ।**

विपर्यासः – परिव्रुत्तिः। इयं चेतरोपमानव्यवच्चेदेनैव चमत्कारिका । उदाहरणं यथा–

**कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।**
**धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ।।**

अत्राऽस्य राज्ञो बुद्ध्यादि सदृशं नान्यदस्तीत्यर्थः। अत्र स्पृहणीयत्व - प्रचितत्वविस्तृत्वानि त्रिषु साधारणधर्मः ।

**३.उत्प्रेक्षा—**

उपमेयस्य उपमानेन सह, एकरूपतया(तादात्म्येन) यत्सम्भावनं सोत्प्रेक्षा– उत्प्रेक्षानामकोलऽङ्कारः इत्यर्थः। उत्कटैककोटिः संशयः संभावनम् ।

सा चेयमुत्प्रेक्षा हेतुफलस्वरुपसम्भावन भेदात् बहु प्रकाराः। तत्र हेतूत्प्रेक्षा यथा–

**उन्मेषं यो मम न सहते जातिवैरीनिशाया -**
**मिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।**
**नितः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षा-**
**ल्लग्ना मन्ये ललिततनु! ते पादयोः पद्मलक्ष्मीः ।।**

अत्रोपमेयभूता स्वाभाविकी पादशोभा, उपमानभूतयथोक्तहर्षहेतुकपादपतनविषयीभूत पद्म शोभात्वेन सम्भावितेति हेतूत्प्रेक्षेयम् ।

क्रियास्वरूपोत्प्रेक्षा यथा–

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गताः ।।

अत्र व्यापानादि लेपनादिरुपतयोत्प्रेक्षितमिति क्रियास्वरूपोत्प्रेक्षेयम् । अत्र पूर्वार्ध्दे क्रियास्वरूपोत्प्रेक्षैव न तूपमा,तिङन्तसमभिव्याहृतेव शब्दस्य सम्भावनाबोधकत्वात् । "**न वै तिङन्तेनोपमानमस्ति**" इति च महाभाष्यम् ।

**४. सन्देहः—**

**स सन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः इति ।**

प्रकृतस्य समेन यत् इति पूर्वसूत्रात् अनुवर्तते । तथा च प्रकृतस्य – उपमेयस्य, समेन - उपमानेन (उपमानरूपतया) सादृश्यज्ञान प्रयोज्यो यस्तु संशयः– सशयात्मकं ज्ञानम्, स सन्देहानामलङ्कारः । स च भेदोक्तौ , भेदानुक्तौ चेति द्विविधः । अयं च सस्न्देहो निश्चयगभाह्व निश्चयान्तः ,शुध्दश्च (केवलं संशयरूपश्च ) इति त्रिविधो भवति ।

तत्र भेदोक्तौ ससन्देहो यथा -

**अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः**
**कुशानुः किं सर्वाः प्रसरति धिशो नैषं नियतम् ।**
**कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं**
**समालोक्यायौ त्वां विदधति विकल्पान् प्रतिभटाः ।।**

अत्र अयं किं मार्तणाडस्तदन्यो वेति संशयत्वात् बेदोक्तौ ससन्देहोऽलङ्कारः । न तु अयम् असंख्यतुरगयुक्तादिना राज्ञो मार्तण्डाद्युपमानेभ्य आधिक्योक्तेः व्यतिरेकालंकारः । व्यतिरेकस्य सन्देहानुयायिता ससन्देहालङ्कारेणैव व्यपदेशौचित्यात् । अयमाद्यः प्रभेदोऽपि द्विविधः - निश्चयगर्भो निश्चयान्तश्चेति । तत्र निश्चयगर्भ उदाहृत एव । निश्चयान्तो यथा-

**इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम् ।**
**ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ।।**

अत्र ललितसुविशालवचनरूपवैधर्म्यात् मुखत्वेन रूपेण मुखस्य निश्चये पुनः केनापि रूपेण न संशय इति निश्चयान्तोऽयं ससन्देहोऽलङ्कारः ।

भेदाऽनुक्तौ ससन्देहो यथा -

**अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः,**
**श्रृङ्गारैकरसः कथं नु मदनो मासो नु पुष्पाकरः ।**
**वेदाऽभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो**
**निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ।।**

अत्र अस्याः सृष्टौ यः प्रजापतिः (निर्माता ) अभूत्, स किं चन्द्रः किं वा मदनः, किं वा वसन्तः ? इति प्रजापतिधर्मिकश्चन्द्रत्वादिरूपविरुद्धनानाभावकोटिका संशयः । एवं चाऽत्र एतत्प्रजापतौ (उर्वशीनिर्मातरि ) चन्द्रादेः सन्देहत्वात् ससन्देहनामकोऽलङ्कारः । अत्र चोपमेयभूतस्य प्रजापतेः, उपमानभूतस्य चन्द्रादेर्वा कस्यापि वैधर्म्यं नोक्तमिति भेदाऽनुक्तौ ससन्देहालङ्कारोऽयम् ।

**५.रूपकम्**

रूपयति एकतां नयतीति रूपकम् । उपमानापमेययोः योऽभेदः = अभेदारोपस्तद् रूपकमित्यर्थः। उक्तं च मम्मटेन -

**तद्रूपकमभेदो यं उपमानोपमेययोः इति ।**

तच्च रूपकं प्रथमं त्रिविधम् - साङ्गं, निरङ्गं परम्परितं चेति । तत्रापि साङ्गम् - समस्तवस्तुविषयम्, एकदेशविवर्ति चेति द्विविधम् । निरङ्गं च शुद्धं (केवलम् ) मालारूपं चेति द्विविधम् । परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनतया द्विविधं सत् प्रत्येकं केवलं मालारूपं चेति चतुर्विधम्, इति मिलित्वा रूपकस्याष्टौ भेदाः । तत्र दिङ्गमात्रमुदाह्रियते -

**ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी -**
**न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।**
**द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले,**
**न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य छलेन ।।**

अत्र रात्रिः उपमेया कापालिकी उपमानम् , एवं ज्योत्स्नादिकम् उपमेयम्, भस्मादिकम् उपमानम् । रात्रिरेव कापालिकीति अङ्गि (प्रधानम् ) रूपकम् , अन्यानि चाङ्गानि रूपकानि रूपकाणि । तानि चाङ्गिरूपकस्य परिपोषकाणि । अत एवाहुरुद्योतकाराः -

**साङ्गत्वं च परस्परसापेक्ष्यरूपकसमुदायत्वम् । इति ।**

तथा चाऽत्रोपमेयभूतेषु रात्रिज्योस्नादिषु आरोप्यमाणानां कापालिकीभस्मादीनां सर्वेषां शब्दपातत्वात् समस्तवस्तुविषयं रूपकमिदम् । एवं च कापालिक्या आरोप इव तदङ्गानां(तदुपकरणानाम्) भस्मादीनामारोप्यद् रूपकस्य साङ्गत्वम्।

**६.अपह्नुतिः-** उपमेयम् असत्यं कृत्वोपमानं यत्सत्यतया व्यवस्थाप्यते=आहार्यनिश्चयविषयीक्रियते,सा अपह्नुतिरित्यर्थः। उक्तं च मम्मटेन-

प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः।

सा चापह्नुतिः- शाब्दी आर्थी चेति द्विविधा। तत्र शाब्दी अपह्नुतिर्यथा-

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनीरमणी गाढमुरसि।।

अत्रोपमेयभुतं कलकं निषिध्यउअसत्यं कृत्वा, उपमानभुता रात्रिः, सत्यतया व्यवस्थापिता, इत्यपह्नुतिरियम्। इयं हि कलङ्को नैवायम् इति नञ्शब्देन निषेधस्य प्रतिपादनाच्छाब्दी। आर्थी यथा-

**बत सखि कियदेतत् पश्य वैरं स्मरस्य,**
**प्रियविरहकृशेस्मिन् रागिलोके तथाहि।**
**उपवनसहकारोद्भासिभृङ्गच्छलेन**
**प्रतिविशिखमनेनोट्टङ्कितं कालकूटम्।।**

अत्र उपमेयभूतान् भृतान् भृङ्गान् निषिध्य = असत्यतया व्यवस्थाप्य, उपमानभूतं कालकूटं सत्यतया व्यवस्थापितम्, इति इति अपह्नुतितिरियम् । छलशब्देन भृङ्गाणामसत्यत्वम् प्रतिपाद्यते, सत्यत्वे व्याजताविरहादित्त्याक्षेपालभ्यो निषेधः, इति आर्थी अपह्नुतिरियम् ।

**७.श्लेषः-**

स्वभावादेकार्थप्रतिपादकानामेव शब्दानं यत्र प्रकरणादेरनियमेन अनेकोऽर्थः बुध्यते अतः अर्थश्लेषः।

उक्तं च मम्मटेन -

श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत् इति।

उदाहरणम् यथा-

**उदयमयते दिङ्मालिन्यं निराकुरुतेतराम्**
**नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः।**
**रचयतितरां स्वैराचारप्रवर्तनकर्तनम्**
**बत बत लसत्तेजः पुञ्जो विभाति विभाकरः।।**

अत्र उदयमयते इत्यादिषु वाक्येषु उदयमित्यादीनाम शब्दानाम् अभिधायाः संयोगाद्यैः प्रकरणादिकैः नियन्त्रणाभावात् अनेकार्थस्य अनेकार्थस्य वाच्यताया पर्यायपरिवृत्त्यसहतया शब्दश्लेष एव। एवं च विभाकरः इत्यंशे उदयमित्यादिषु बहुषु अर्थश्लेषात् उदाहरणत्वमिति बोध्यम्।

**८.समासोक्तिः-** प्रकृतार्थविशेषणवाचिमात्रशब्दस्य श्लेषमहिम्ना यत्र प्रकृतार्थकेन वाचकेन अप्रकृतगतव्यहाररूपार्थस्य व्यञ्जनया बोधनं यत्र समासोक्तिरलङ्कारः। समासेन संक्षेपेण, एकेनैव शब्देन उक्तिः अर्थद्वयकथनम्, समासोक्तिः। उक्तं च मम्मटेन-

**परोक्तिभेदकैः श्लिष्टैः समासोक्तिःइति।**

यथा-

**लब्ध्वा तव बाहुस्पर्शं यास्याः स कोऽप्युल्लासः।**
**जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा।।**

तत्र बाहुसोर्शलाभप्रयुक्तोल्लासाद साधारनविशेषबलात् जयलक्ष्मीवृत्तान्तः नायिकावृत्तारूपतया गम्यते, इति समासोक्तिरलङ्कारः। अप्रस्तुतेन प्रस्तुतार्थबोधोऽर्थाक्षेपः समासोक्तिरिति बोध्यम्।

**९.निदर्शना-**

यत्र वाक्यार्थयोः पदार्थयोः वा, अन्वयः अनुपद्यमानः सन् उपमां परिकल्पयति सा निदर्शयति सा निश्चयेन सादृश्यम् उपमनोपमेयभावं बोधयतीति निदर्शनालङ्कारः।

उक्तं च मम्मटेन-

**साच वाक्यार्थनिदर्शना, पदार्थनिदर्शना इति द्विविधा।**

तत्र वाक्यार्थनिदर्शना यथा-

**क्व सूर्यप्रभवो वंशः क्वचाल्पविषया मतिः ।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।**

अत्र उडुपेन सागरतरणवन्मन्मत्या सूर्यवंशवर्णनम् असम्भवितम् इति उपमां कल्पयति। उपमायां पर्यवसानात् वाक्यार्थनिदर्शनेयम् ।

पदार्थनिदर्शना यथा –

**उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्ताम् ।**
**वहति गिरिरयं विलम्बिघण्टाद्वय परिवारितवारणेन्द्रलीलाम् ।।**

अत्र कथमन्यस्य लीलामन्यो वहतीति वारणेन्द्रलीलासदृशीं लीला वहतीति उपमायां पर्यवसानात् पदार्थनिदर्शनेयम् ।

यत्र क्रिययैव स्वस्य कार्यस्य स्वहेतोश्चाऽन्वयो हेतुहेतुमद्भावरूपः ख्याप्यते परान् प्रति बोध्यते सा अपरा निदर्शना। उक्तं च मम्मटेन –

**स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सापरा । इति ।**

उदाहरणं यथा –

**उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।**
**शैलशेखरगतो दृषत्कणश्चारुमारुत धुतः पतध्यतः ।।**

अत्र पतेत्पद प्रतिपाद्यस्य पातस्य कार्यस्य लाघवे सति उन्नतपदप्राप्तिरूपस्य कारणस्य च कार्यकारणभावरूपः सम्बन्धः पततिपदप्रतिपाद्यया पातक्रियया प्रतिपाद्यते । तथा च लाघवे सति उन्नतपदप्राप्तिः पाते हेतुर्यथा दृषत्कणस्येति दृष्टान्तपर्यवसानात् निदर्शनालङ्कारः ।

**१०.अप्रस्तुतप्रशंसा —**

अप्राकरणिकस्याभिधानेन प्राकरणिकस्य आक्षेपः– व्यञ्जनम्, अप्रस्तुतप्रशंसालङ्कारः। अत्र क्वचित् अप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषो गम्यते,क्वचिद्वा

अप्रस्तुतात् विशेषात् प्रस्तुतं सामान्यं गम्यते, क्वचिच्च अप्रस्तुतात् कार्यात् प्रस्तुतंनिमित्तं गम्यते, क्वचिच्च अप्रस्तुतात् निमित्तात् प्रस्तुतं कार्यं गम्यते । एवम् अप्रस्तुतप्रशंसा पञ्चधा भवति । उक्तं च मम्मटेन –

**अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ।।**

**कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।**

**तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ।।**

दिङ्मात्रमुदाह्रियते–

**याता किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते,**
**नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।**
**लज्जामन्थरतारके निपतत्पीताश्रुणा चक्षुषा**
**दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ।।**

अत्र प्रस्थानात् किं निवृत्तोऽसीति कार्ये पृष्टे कारणात् प्रस्तुतस्य कार्यस्य प्रतीते, अप्रस्तुतप्रशंसालङ्कारः । एवमन्यदपि उदाहार्यम्।

अतिशयोक्तिः –

**निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।**
**प्रस्तुतस्य यदन्यत्वं यद्यथोक्तो च कल्पनम् ।।**

**कार्यकारणयोर्यश्च पौर्वापर्य विपर्ययः ।**
**विज्ञेयाऽतिशयोक्तिः सा..... ।।**

अतिशयोक्तिः चतुर्धा भवति । तत्र परेण – उपमानेन, 'समेन' इति पाठोऽपि अयमेवार्थः। निगीर्य – कवलीकृत्य, पृथग् अनिर्दिश्य यत् प्रकृतस्य – उपमेयस्य, अध्यवसानम् – आहार्याभेदनिश्चयः, सा एका प्रथमा अतिशयोक्तिर्ज्ञेया । यत् प्रस्तुतस्य – प्रकृतस्य, अन्यत्वम्– अन्यत्वप्रकारेण वर्णनम्, सा द्वितीया । यच्च यद्यर्थस्य– यदि शब्देन, चेच्छब्देन वा यदि शब्दार्थस्य, उक्तौ सत्यां कल्पनम् – असम्भविनोर्थस्य कल्पनं सा ततीया । यश्च

कार्यकारणयोः – कारणकार्ययोः,पौर्वापर्यस्य विपर्ययः – वैपरीत्यम्, सा चतुर्थेति चतस्रोऽतिशयोक्तयः।

तत्र प्रथमाऽतिशयोक्तिर्यथा –

**कमलम्नभसि कमले च कुवलये तानि कनकलतिकायाम् ।**
**सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ।।**

अत्र प्रकरणलभ्यानां नायिकावक्त्रादीनां कमलादितादात्म्येन अध्यवसानात् मुखादेरतिशयः प्रतीयते, इति निगीर्याध्यवसानरूपा, भेदेऽभेदाऽध्यवसायात्मिका अतिशयोक्तिरियमिति ।

द्वितीय यथा –

**अन्यत्सौकुमार्यमन्यैव च काऽपि वर्तनच्छाया ।**
**श्यामा सामान्यप्रजापतेः रेखैव च न भवति ।।**

अत्र लोकप्रसिद्धसौकुमार्याद्यभेदेऽपि भेदो वर्णितः । तथा चाऽत्र अन्यदेव सौकुमार्यम्, इत्युक्त्या अस्याः सौन्दर्ये सौन्दर्यान्तरात् अतिशयः प्रतीयते, इति अन्यत्ववर्णनारूपा, अभेदे भेदाऽध्यवसयात्मिका अतिशयोक्तिरियम् ।

तृतीया यथा –

**राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।**
**तस्या मुखं तदा साम्यपराभवमाप्नुयात् ।।**

अत्र चन्द्रेण मुखस्य साम्यं सदा तर्कितमेव न तु वस्तुतु, तेन मुखस्यातिशयः प्रतीयते,इति यद्यर्थातिशयोक्तिरियम् ।

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी । यथा –

**हृदयमधिष्टितमादौ मालत्याः कुसुमचापबाणेन ।**
**चरमं रमणीवल्लभलोचनविषयं त्वया भजता ।।**

अत्र कारणस्य रमणीवल्लभाधिष्टानस्य शीघ्रकारितां वक्तुं कार्यस्यकन्दर्पाधिष्टानस्य प्रथममुक्तिरिति कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिः ।

कार्यस्य सहभावेन यथा –

**सममेव समाक्रान्तं द्वयं द्विरदगामिना ।**
**तेन सिंहासनं पित्र्यं मण्डलं च महीक्षिताम् ।।**

अत्र सममेव न तु पूर्वापरभावनेति प्रतीतेः पौर्वापर्यविपर्ययरूपाऽतिशयोक्तिः।

**१२.प्रतिवस्तूपमा—**

**...........प्रतिवस्तूपमा तु सा ।**
**सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः** ।। इति।

एकस्य साधारणधर्मस्य वाक्यद्वये— उपमानोपमेयवाक्ययोः, यत्र-यस्यामलङ्कृतौ, द्विवारं स्थितिः-उपादानम्, अर्थात् शब्देन सा प्रतिवस्तु - प्रतिवाकार्थम्,उपमा- साधारणधर्मो यस्यामिति,अन्वर्थनामा प्रतिवस्तूपमाऽलङ्कारः । सा च प्रतिवस्तूपमा द्विधा-केवला,मालरूपा च।

तत्राद्या यथा—

**देवीभावं गमिता परिवारपदं कथं भजत्वेषा ।**
**न खलु परिभोगयोग्यं दैवतारूपाङ्कितं रत्नम् ।।**

अत्र द्वयोः वाक्यार्थयोः अनौचित्यरूपः एक एव साधारणधर्मः 'कथम्', 'न खलु' इति भिन्नशब्दोपात्तः, इति प्रतिवस्तूपमालङ्कारः।

मालारूपा यथा—

**यदि दहत्यनलोऽत्र किमद्भूतं यदि च गौरवमद्रिषु किं ततः ।**
**लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता।।**

अत्र स्वाभाविककार्यदर्शनं न विस्मयकरमिति स्वाभाविककार्यदर्शनस्य विस्मयजनकत्वं साधारणोधर्मः शब्दभेदेन निर्दिष्टः । एवं चानलादेः दाहकत्वादिकं यथा स्वाभाविकत्वात् नाश्चर्याय, एवं सतामविषादिता स्वाभाविकीति नाश्चर्याय, इत्यौपम्ये पर्यवसानात् प्रतिवस्तूपमा।

**१३.दृष्टान्तः —**

उपमेयवाक्ये उपमानवाक्ये च सर्वेषाम् उपमानोपमेय साधारण धर्माणां बिम्बप्रतिबिम्बभावः

( न त्वेकत्वमित्यर्थः) दृष्टान्तनामाऽलङ्कारः ।

उक्तंच मम्मटभट्टैः —

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् । इति ।

स च दृष्टान्तः साधर्म्यवैधर्म्याभ्यां द्विधा भवति । तत्र साधर्म्येण यथा -

**त्वयि दृष्टे एव तस्याः निर्वाति मनोभवज्वलितम् ।**
**आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः ।।**

अत्र नृपचन्द्रयोः, नायिकाकुमुद्वत्योः, मनकुसुमयोः( उपमानोपमेययोः), मनोभवज्वलितसूर्यकिरणज्वलितयोः, निर्वाणविकासयोश्च (साधारण धर्मयोरित्यर्थः) बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः ।

वैधर्म्येण यथा—

**तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिक मानिनीषतः ।**
**भटाः परेषां विशरारुतामगुः दधत्यवाते स्थिरतां हि पांसवः ।।**

अत्र वाते तु पांसवःस्थिरतां न दधतीत्येवं रूपे वैधर्म्य विपर्यये साधर्म्यपर्यवसानमिति दृष्टान्तालङ्कारत्वम् । अत्र पांसुभटयोः पलायनाऽस्थिरत्वयोर्बिम्बप्रतिबिम्बभावः ।

**१४.दीपकम् —**

दीपकं द्विविधम् – क्रियादीपकं कारकदीपकं चेति । तत्र एकस्य धर्मस्य, एकवारं प्रस्तुताप्रस्तुतोभयवृत्तित्वे क्रियादीपकमेकम् । एकस्य कारकस्य, एकवारमेवानेकासु क्रियासु सम्बन्धे कारकदीपकम् अपरम् । उक्तं च मम्मतभट्टैः —

**सकृद् वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।**
**सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ।। इति ।**

एकस्यैव सर्ववाक्यदीपकत्वेन दीपसाम्यात् दीपकमित्यर्थः ।

तत्र क्रियादीपकं यथा -

**कृपणानां धनं नागानां फणमणिः केसराः सिंहासनम् ।**
**कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ।।**

अत्र वर्णनीयत्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेन अप्रकृतानां कृपणधनादीनां च स्पर्शनक्रियारूपसाधारणधर्मस्य सकृदुपादानमिति क्रियादीपकाऽलङ्कारोऽयम् ।

कारक दीपकं यथा—

**स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक् ।**
**अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ।।**

**१५.मालादीपकम् —**

पूर्वेण पूर्वेण वस्तुना, उत्तरमुत्तरं चेदुपक्रियते तत् मालादीपकम् । उक्तं च -

**मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् । इति ।**

उदाहरणं यथा –

**सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते**
**देवकर्णय येन येन सहसा यद्यत् समासादितम् ।**
**कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं**
**तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रय् ।।**

अत्र कोदण्डादिभिः पूर्वपूर्वैः उत्तरोत्तरेषाम् आसादनक्रियाकर्मकरणरूपोपकारात् निः सपत्नभूलोकराज्य लोकत्रयव्यापिकीर्तिलाभात् नृपतेरुत्कर्षः प्रत्याय्यते । यथा मालायां पूर्वपूर्वग्रथित पुष्पाणाम् उत्तरोत्तरधारणादुपकारकत्वम् तद्वदत्रापीति मालारूपता,इति दीपकम्।

**१६.तुल्ययोगिता ——**

केवलप्रकृतानां केवलाप्रकृतानां वा गुणक्रियादिरुपैकधर्मान्वयः तुल्ययोगिताऽलङ्कारः। अन्वर्थेयं संज्ञा । तुल्यश्च असौ योगश्च – सम्बन्धश्च, अन्वयश्च तुल्ययोगः, एकधर्मान्वय इत्यर्थ : । सोऽस्ति येषां ते तुल्ययोगिनः, तेषां भावस्तुल्ययोगितेति व्युत्पत्तिः । उक्तं च -

**नियतानां सकृद् धर्मः सा पुनस्तुल्ययोगिता । इति ।**

तत्र प्रकरणिकानामेव धर्मस्य यत् सकृदुपादानं तद्रूपा तुल्ययोगिता ।

उदाहरणं यथा–

**पाण्डुक्षामं वदनं हृदयं सरसं तवालसं च वपुः ।**
**आवेदयति,नितान्तं क्षेत्रियरोगं सखि हृदन्तः ।।**

अत्र प्रकृतानां विरहवदनादीनामेव धर्मत्वेन आवेदनाख्यो धर्म उपात्तः, न तूपमानरोगधर्मतया, अतस्तुल्ययोगितेयम् ।

अप्राकरणिकानामेव धर्मस्य यत् सकृदुपादानं तद्रूपा तुल्ययोगिता यथा —

**कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का ।**
**अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ।।**

अत्र पूर्वार्थे कामिनीनयनोपमानत्वेन,अप्रकृतानामेव कुमुदादीनां धर्मतया कापदव्यङ्ग्योऽधिक्षेपः (तिरस्कारः) उपात्तः। उत्तरार्धे आननोपमानत्वेन, अप्रकृतानामेवामृतादीनां धर्मतया प्रतिहतित्वं चैको धर्मः उपात्त इति उभयत्र तुल्ययोगिताऽलङ्कारः ।

**१७.व्यतिरेकः —**

उपमानापेक्षया उपमेयस्य यो विशेषेणातिरेकः– आधिक्यम्, गुणविशेषकृत उत्कर्षः स एव व्यतिरेकालङ्कारः । विशेषेण अतिरेको व्यतिरेक इति सार्थकनामाऽयम् अलङ्कारः। उक्तं च

मम्मटेन —

उपमानाद् यदन्यस्य व्यतिरेकः स एव सः इति । उदाहरणं यथा–

**क्षीणः क्षीणोऽपि शशी भूयोऽभिवर्धते सत्यम् ।**
**विरम प्रसीद सुन्दरि यौवन मनवर्ति यातं तु ।।**

अत्र चन्द्रापेक्षया यौवनगताऽस्थैर्यस्य आधिक्यं वर्णितमिति व्यतिरेकालङ्कारः ।

**१८.आक्षेपः —**

अवश्यवक्तव्यस्य अर्थस्य विधितात्पर्यकं विशेषप्रतिपत्तये निषेधाभिधानमाक्षेपालङ्कारः। स आक्षेपो द्विधा – वक्ष्यमाणविषयः उक्तविषयश्चेति । उक्तं च मम्मटेन —

**निषिधो वक्तुमिष्टस्य यो विशेषाभित्सया ।**
**वक्ष्यमाणोक्तविषयः, स आक्षेपो द्विधा मतः ।। इति।**

तत्र वक्ष्यमाणविषयो यथा–

**ए, एहि किमपि कस्या अपि कृते निष्कृप भणामि अलमथवा ।**
**अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्यामि ।।**

अत्र विरहजनित दुर्दशातिशयो वक्ष्यमाणो वक्तुम् अशक्यता निषिद्ध इत्याक्षेपालङ्कारः।

उक्तविषयो यथा –

**ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः**
**कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः ।**
**अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर -**
**व्यापाराय भवन्ति हन्ति किमनेनोक्त न ब्रूमहे ।।**

अत्र वियोगिनीनां ज्योत्स्नादि स्फुलिङ्गायते, इत्यत्र अतिप्रसिध्दत्वं विशेषं व्यञ्जयितुं ज्योत्स्नादीन्युक्त्वा तत्कथनं प्रतिषिध्दमिति आक्षेपालङ्कारोयम् ।

**१९.विभावना –**

प्रसिध्दकारणनिषेधेऽपि तत्कार्यरूपफलस्य प्रकाशनं (कथनम् ) विभावनालङ्कारः। विभावयति – कल्पयति कारणान्तरम् (अप्रसिध्दकारणं – विधग्धमात्रवेद्यं कारणम्) इति विभावना, इत्यन्वर्थ संज्ञा । उक्तं च मम्मटेन –

**क्रियायाः प्रतिषेधोऽपि फलव्यक्तिर्विभावना । इति ।**

उदाहरणं यथा–

**कुसुमितलताभिरहिताऽप्यधत्त रुजमलिकुलैरदष्टाऽपि ।**
**परिवर्ततेस्म नलिनीलहरीभिरलोलिताऽप्य घूर्णत सा ।।**

लताहननं पीडाहेतुः, भ्रमरदंशःपरिवर्तनहेतुः, तरङ्गसम्बन्धो घूर्णनहेतुः, अत्र तेषां हेतूनामभावेऽपि तत्कार्यस्य पीडादिरूपस्य कथनम् इति विभावनालङ्कारः,विरहातिशयरूपस्य अप्रसिध्दस्य हेतोर्विभावनात् ।

**२०.विशेषोक्तिः** -

अखण्डेषु (मिलितेषु) प्रसिद्धेषु कारणेषूक्तेषु सत्सु कार्याऽभावकथनं विशेषोक्तिः।

उक्तं च मम्मटेन -

**विशेषोक्तिरखण्डेषु कारणेषु फलावचः। इति ।**

सा च त्रिविधा - अनुक्तिनिमित्ता, उक्तनिमित्ता, अचिन्त्यनिमित्ता चेति ।

तत्र अनुक्तनिमित्त यथा -

**निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।**
**श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ।।**

अत्र निद्रानिवृत्तिसूर्योदयादिरूपकारणसत्त्वेऽपि, आलिङ्गनपरित्यागरूपकार्याभावोक्तिरिति विशेषोक्तिः । सा च निमित्तस्याऽनुरागातिशयस्य अनुक्तेः अनुक्तनिमित्ता ।
उक्तनिमित्ता यथा -

**कर्पूरइव दग्धोऽपि शक्तिमान् यो जने जने ।**
**नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ।।**

अत्र शरीरदाहः शक्तिध्वंसे कारणम्, सत्यपि तस्मिन् कारणे शक्तिध्वंसरूपकार्याभावकथनमिति विशेषोक्तिः। सा च निमित्तस्यावार्यत्वस्य कथनात् उक्तनिमित्ता ।

अचिन्त्यनिमित्ता यथा -

**स एकस्त्रीणि जयति जयन्ति कुसुमायुधः ।**
**हरतापि तनुं यस्य शम्भुना न बलं हृतम् ।।**

अत्र तनुहरणं बलहरणे कारणम् , सत्यपि तस्मिन् कारणे बलहरणरूपकारयस्याभावकथनमिति विशेषोक्तिः । सा च तनुं हरता कथं बलं न हृतमित्यत्र हेतुर्विशिष्य वक्तुं (सहासा चिन्तयितुम्) न शक्यते, शास्त्रैकगम्यत्वात् इत्यचिन्त्यनिमित्तेयम् ।

**२१.अर्थान्तरन्यासः -**

अनुपपद्यमानतया सम्भाव्यमानस्यार्थस्य उपपादनार्थं यद् अर्थान्तरं न्यस्यते, सोऽर्थारन्यासोऽलंकारः । उक्तं च मम्मटेन -

**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।**
**यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ।। इति ।।**

तथा च सामान्यं यद् विशेषेण समर्थ्यते , विशेषो वा सामान्येन समर्थ्यते इति द्विविधोऽर्थान्तरन्यासः। द्विविधोऽपि स क्वचित् साधर्म्येण समर्थ्यते क्वचिच्च वैधर्म्येणेति अर्थान्तरन्यासो चतुर्धा । तत्र विशेषेण सामोन्यस्य समर्थनं साधर्म्येण यथा -

**निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम् ।**
**पश्यति पित्तोपहतः शसिशुभ्रं शङ्खमपि पीतम् ।।**

अत्र निजदोषेत्यादि सामान्यं शङ्खपीतिम्ना विशेषेण समर्थितमिति विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः । समान्येन विशेषस्य समर्थनं साधर्म्येण यथा -

**सुसितवसनालङ्कारायां कदाचन कौमुदी**
**महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधिः ।**
**तदनु भवतः कीर्तिः केनाप्यगीयत येन सा**
**प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः ।।**

अत्र सुसितेत्यादिनाऽभिहितो विशेषः **क्व नासि** इत्यादिना सामान्येन समर्थितः, इत्यर्थान्तरन्यासोऽलङ्कारः । विशेषेण सामान्यस्य समर्थनं वैधर्म्येण यथा —

**गुणानामेव दौरात्म्यात् धुरि धुयो नियुज्यते ।**
**असञ्जातकिणस्यन्धः सुखं स्वपिति गौर्गलिः ।।**

अत्र धुर्यः इत्यादिनाऽभिहितं सामान्यं गौर्गलिरिति विशेषेण समर्थितमिति अर्थान्तरन्यासोऽयमलङ्कारः। गुणाभावात् गलिर्गौ न धुरि नियुज्यते इति वैधर्म्यम् ।

सामान्येन विशेषस्य समर्थनं वैधर्म्येण यथा —

**अहो हि मे बह्वपुराध्दमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।**
**त एव धन्याः सुहृदः पराभवं जगत्यदृष्टैव हि ये क्षयं गताः।।**

अत्र **'ते'** इत्यनेन सामान्यतो मत्पदार्थस्यापि ग्रहणात् सामान्यत्वम् । 'ते धन्याः' इति सामान्येन 'अहमधन्यः' इति वैधर्म्यद्वारा स्वायुरपुराधरूपो विशेषः समर्थ्यते, इति अर्थन्तरन्यासोऽलङ्कारः।

**२२.विरोधः —**

विरुध्दार्थ प्रतिपादकस्य पदादेः अर्थान्तरपरत्वादिना वस्तुतो विरोधाभावेऽपि आपाततो विरोधप्रतीतिः विरोधनामालङ्कारः । अयमेव विरोधाभास इत्युच्यते, विशोधश्चासौ आभासश्चेति विरोधाभासः । उक्तं च मम्मटेन —

**विरोधः सोऽविरोधोऽपि विरुध्दत्वेन यद्वचः । इति ।**

स च दशविधो भवति । उक्तं च मम्मटेन –

**जातिश्चतुर्भिर्जात्याद्यैर्विरुध्दा स्याद् गुणस्त्रिभिः ।**
**क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश ।। इति ।**

दिङ्मात्रमुदाह्रियते –

**अभिनवनलिनीकिसलयमृणालक्यादि दवदहनराशिः।**
**सुभगकुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगविपाते ।।**

अत्र नलिनीत्वकिसलयत्वादि जातीनां दवदहनत्वजत्या स ह विरोधः स च नलिन्यादिषु विरहोद्दीपकतया दवधनत्वोपचारेण परिहृत इत्याभासरूप इति विरोधाभासालङ्कारः ।

**२३.स्वभावोक्तिः—**

यस्य कस्यचिद्वस्तुनोऽसाधारणधर्मवर्णनं स्वभावोक्त्यलङ्कारः । चमत्कृतिहेतुत्वत्वत्रापि आवश्यकम् । उक्तं च मम्मटेन –

**पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-**
**रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।**
**घासग्रासाभिलाषादनवरतचलत्प्रोतथतुण्डस्तुरङगो**
**मन्दं शब्दायमानो विलिखति शयनदुत्थितः क्ष्मां खुरेण।।**

अत्र अश्वमात्रगतयोः क्रियासस्थानयोः वर्णनम् । पश्चादित्यादिना संस्थानस्य घासग्रासेत्यादिना क्रियया वर्णनमिति स्वभावोक्त्यलङ्कारः ।

**२४.व्याजस्तुतिः —**

स्तुतिपर्यवसायिनी निन्दा, निन्दापर्यवसायिनी वा स्तुतिः व्याजस्तुतिरलङ्कारः।

उक्तं च मम्मटेन —

**व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा । इति ।**

व्याजरूपा व्याजेन वा स्तुतिः व्याजस्तुतिः । मुखे– प्रारम्भे । रूढिः – पर्यवसाने प्रतीतेः। अन्यथा– यथाक्रमं स्तुत्या, निन्दया वा । तत्र स्तुतिपर्यवसायिनी निन्दा यथा –

**हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो**
**लज्जावर्जनमन्तरेण न रमामन्यत्र सन्दृश्यते ।**
**यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितयाः श्रियः**
**प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ।।**

अत्र राज्ञ आश्रित-त्याग रूपनिन्दाव्याजेन महादातृत्वेपि लक्ष्मीवत्वाभिधानात् स्तुतिरिति व्याजेन स्तुतिः । इयं निन्दापूर्वका व्याजस्तुतिः । निन्दापर्यवसयिनी स्तुतिर्यथा —

**हे हेलाजित बोधिसत्त्व वचसां किं विस्तरैस्तोयधे**
**नास्ति त्वत्सदृशः परः प्रहिताधाने गृहीतव्रतः ।**
**तृष्यत् पान्थजनोपकारघटनावैमुख्यलब्धायशो**
**भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ।।**

अत्र समुद्रस्य स्तुतिव्याजेन निन्दाप्रतिपादनाच्च्मत्कारातिशयः, इति व्याजरूपा स्तुतिः ।

**२५.काव्यलिङ्गम् —**

स्वतोननुपपद्यमानाथोपपादकहेतोर्वचनं काव्यलिङ्गमलङ्कारः । हेतोर्वाक्यर्थता, अनेकपदार्थता, एकपदार्थता चेति त्रिविधकाव्यलिङ्गम् । उक्तं च मम्मटेन –

**काव्यलिङ्गं हेतोर्वाक्यपदार्थता । इति ।**

तत्र वाक्यार्थता यथा –

**वपुः प्रादुर्भावदनुमितमिदं जन्मनि पुरा**
**पुरारे न प्रायःक्वचिदपि भवन्तं प्रणतवान् ।**
**नमन् मुक्तः सम्प्रत्यहमतनुरग्रेऽप्य नतिभाक्**
**महेश! क्षन्तव्यं तदिदमपराधद्वयमपि ।।**

अत्र **पुरा** कदाचिदपि नाहं भवन्तं प्रणतवान् , 'अग्रेऽप्यहमनतिभाक्' इत्यवान्तरवाक्ययोरथोऽनमनम् अपराधे हेतुः इति काव्यलिङ्गमलङ्कारः ।

अनेकपदर्थता यथा–

**प्रणयिसखीसलीलपरिहासरसाधिगतै -**
**र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।**
**वपुषि वधाय तत्र तव शस्त्रमुपक्षिपत :**
**पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ।।**

अत्र वपुषि 'शस्त्रमुपक्षिपतः' इति प्रातिपदिकानां क्रिया साकाङ्क्षतया वाक्यभावमनाप्तानाम् अनेकपदनामर्थः शस्त्रोपक्षेपरूपो भुजपाते हेतुरिति काव्यलिङ्गमलङ्कारः ।

ए कपदार्थता यथा –

**भस्मेद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं**
**हा सोपानपरम्परां गिरिसुताकान्तालयाऽलङ्कृतिम् ।**
**अप्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-**
**लोकोच्छेदिनि मोक्षनामानि महामोहे विधीयामहे ।।**

अत्र महामहोत्वे सुखालोकच्छेदकत्वं समस्तपदाथाह्न हेतुः, इत्येकपदार्थरूपः हेतुरिति काव्यलिङ्गमलङ्कारः । इदं काव्यलिङ्गमेव हेत्वलङ्कारः कथ्यते ।

### २६.पर्यायोक्तम् -

यत्र वाच्यार्थ एव प्रकारान्तरेण व्यञ्जनया प्रतिपाद्यते तत् पर्यायोक्तम् । पर्यायेण प्रकारान्तरेण कथनात् पर्यायोक्तम् । उक्तं च मम्मटेन -

**पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः । इति ।**

उदाहरणं यथा -

**यं प्रेक्ष्यचिररूढापि निवासप्रीतिरुज्झिता ।**
**मदेनैरावणमुखे मानेन हृदये हरेः ।।**

अत्र ' ऐरावतेन्द्रौ मदनमानशून्यौ जातौ ' इत्यर्थस्य व्यङ्ग्यस्यैव भङ्ग्यन्तरेण अभिधानात् पर्यायोक्तमलङ्कारः ।

**२७.परिकरः -** साभिप्रायानेकविशेषणद्वारा यत्र विशेष्यस्यातिशयप्रतीतिः स परिकरोऽलङ्कारः। परिकरः = परिष्करणम् , उपस्करणम् , वाक्यार्थस्योपस्करणात् परिकर इत्यन्वर्थेयं संज्ञा। उक्तं च मम्मटेन -

**विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः । इति ।**

उदाहरणं यथा -

**महौजसौ मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।**
**न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।।**

अत्र महौजस इत्यादिविशेषणानां परानभिभवनीयत्वाद्यभिप्रायकत्वात् धनुर्भृत इति विशेष्यस्य परिपृष्टिः । तेन च प्रधानस्य दुर्योधनस्य अतिशयः प्रतीयते, इति परिकरालङ्कारः ।

**२८.परिसंख्या - किञ्चित् पृष्टमपृष्टं वा कथितं यत्प्रकल्पते ।**
**तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ।।**

तथा च किञ्चित् वस्तु पृष्टमपृष्टं वा, कथितं = शब्देन प्रतिपादितं सत् तादृगन्यव्यपोहाय उ स्वतुल्यान्यवस्तुव्यवच्छेदाय यत् प्रकल्पते = पर्यवस्यति , सा परिसंख्या नामालङ्कारः। परिशब्दो वर्जनार्थकः, संख्या = बुद्धिः, अर्थात् वर्जनबुद्धिः परिसंख्या, इत्यन्वर्थेयं संज्ञा।

अत्र कथनं च प्रश्नपूर्वकं तदन्यथा च परिदृष्टम् । उभयत्र च व्यहोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः क्रमेणोदाहरणम् ।

तत्र प्रश्नपूर्विका प्रतीयमानव्यवच्छेद्या यथा -

**किमासेव्यं पुंसा सविधमनवद्यं द्युसरितः**
**किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।**
**किमाराध्यं पुण्यं किमभिलषणीयं च करुणा**
**यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति ।।**

अत्र सेव्यत्वेनालगतस्य गङ्गासविधादेः पुन- कीर्तनम् इतरपरिवर्जनार्थमिति परिसंख्यालङ्कारः। अर्थात् अत्र शास्त्रपुराणादिना गङ्गातटादेः सेव्यत्वादिकं सर्वावगतमेव न तदवगमायेदं पद्यमुक्तम्। किन्तु गङ्गाभिन्ननदीतटादेः असेव्यत्वादिप्रतिपादनाय गङ्गातीरादेः सेव्यत्वादिकमुक्तमिति परिसंख्यालङ्कारः । अत्र च कथनं 'किमासेव्यम् ' इत्यादिप्रश्नपूर्वकमिति

अन्यनदीतटादेः सेव्यत्वादिकं व्यवच्छेद्यं प्रतीयमानमिति च प्रश्नपूर्विकांप्रतीयमानव्यवच्छेद्येयम्।
प्रश्नपूर्विका वाच्यव्यवच्छेद्या परिसंख्या यथा -

**किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः ।**
**किं चक्षुरप्रतिहतं धिषणा न नेत्र जानाति कस्त्वदपरः सदसद्विवेकम् ।।**

अत्र यशः प्रभृते भूषणत्वादिकम् आगमादितः सर्वविदितमेवेति न तदवगमायेदं पद्यमुक्तम् किन्तु यशोभिन्नरत्नादेरभूषणत्वादिप्रपादनायेति परिसंख्यालङ्कारः। अत्र च कथनं किं भूषणम् इत्यादिप्रश्नपूर्वकमिति रत्नादेर्भूषणत्वादिकं व्यवच्छेद्यं वाच्यम् (शाब्दम्) इति च प्रश्नपूर्विका वाच्यव्यवच्छेद्यम् ।

अप्रश्नपूर्विका प्रतीयमानव्यवच्छेद्या यथा -

**कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।**
**काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ।।**

अत्र कथनमप्रश्नपूर्वकमिति कौटिल्यादेरितराधकरणकत्वं व्यवच्छेद्यं व्यङ्ग्यमिति चाप्रश्नपूर्विका प्रतीयमानव्यवच्छेद्या चेयम् ।

अप्रश्नपूर्विकावाच्य.व्यवच्छेद्या यथा -

**भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामात्रे।**
**चिन्ता यशसि न वपुषि परिदृश्यते महताम् ।।**

अत्र कथनमप्रश्नपूर्विकमिति भक्त्यादेरितराधिकरणकत्वं व्यवच्छेदं वाच्यम् (शाब्दम्) इति चाप्रश्नपूर्विका वाच्यव्यवच्छेद्या चायं परिसंख्या ।

**२९.असङ्गतिः-** यस्सिन्नलङ्काले कार्यकारणभूतयोः धर्मयोरत्यन्तभिन्नदेशतया, एककालेकथनं सा असङ्गतिलंङ्कालः। उक्तं च मम्मटेन–

**भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः।**
**युगपत् धर्मयोर्यत्र ख्यातिः सा स्यादसंङ्गतिः।।इति।**

अन्यत्राप्युक्तम्– कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः।। इति।
उदाहरणं यथा– यस्येव व्रणस्तस्यैव लेदना भणति तज्जनोलीकम्।।
दन्तक्षतं कपोले वध्वाः, वेदना सपन्तिनाम्।।

अत्र वध्वाः कपोले स्वामिकृतदन्तक्षतादिः सपन्तीनाम् अतीव क्लेशदायकः इत्यर्थविशेषप्रतिपतये

वेदनादन्तक्षतयोः कार्यकारणयोः भिन्नदेशताभिधानमिति वैयधिकरण्यरूपासङ्गतिरलंकारः।

**३०.विषमः—** अनुरूपसंसर्गो विषमालंकारः। तथा च क्वचिद् यत् सम्बन्धिनोः, अतिवैसादृश्यात्

सम्बन्धः श्लाघ्यत्वरूपाम् उपपद्यमानतां न प्राप्नुयात् किन्तु अनुपपद्यमानतयैव प्रतीयते स एक विषमः। यच्च कर्तुः व्यापारस्य यत्फलं तस्य प्राप्तिर्नैव भवेत्, प्रत्युत अनर्थश्च भवेत् स द्वितीयो विषमः। यत् कार्यस्य गुणेनकारणस्य गुणो विरुद्धो भवेत् स तृतीयो विषमः। यत् कार्यस्य क्रियया कारणस्य क्रिया विरुद्धा भवेत् स चतुर्थो विषमः। उक्तं च मम्मटेन—

**क्वचिद्यदतिवैधर्मान्न श्लेषो घटनामियात्।**
**कर्तुः क्रियाफलाप्राप्तिर्नैवानर्थश्च यद् भवेत्।।**

**गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।**
**क्रमेण च विरुद्धे यत् स एष विषमो मतः।। इति।**

तत्र प्रथमो यथा-

**शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना।**
**अयं क्व च कुकुलाग्निकर्कशो मदनानलः।।**

अत्र नायिकामदनानलयोः अत्यन्तवैलक्ष्यात् तयोः सम्बन्धः अनुपपद्यमानतयैव क्वशब्दद्वयेन प्रतीयते, इति विषमोयमलङ्कारः।

द्वितीयो यथा—

**सिंहिकासुतसन्त्रस्तः शशः शीतांशुमाश्रितः।**
**जग्रमे साश्रयं तत्र तमन्यः सिंहिकासुतः।।**

अत्र आत्मरक्षारूपेष्टसाधने प्रवृतस्य शशस्य न केवलमिष्टाप्राप्तिः,प्रत्युताश्रयविनाशाघ्यस्य अधिकानर्थस्य प्राप्तिश्चेति विषमालंकारः।

उक्तंच प्रदीपोद्यतयोः — अत्र त्राणरूपफलाभावेन्येन ग्रासरूपोनर्थः इति। अत्रानयोर्योगोनुचितं इति व्यङ्ग्यम्।

तृतीयो यथा—

**सद्यः करस्पर्शमवाप्य चित्रं रणे रणेयस्य कृपाणलेखा।**
**तमालनीला शरदिन्दुपाण्डु यशस्तिलोकाभरणं प्रसूते।।**

अत्र कार्यकारणयोः यशकृपाणयोः पाण्डुनिलाख्यौ गुणौ विरुध्धाविति विषमालंकारः। चतुर्थो यथा–

**आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम्।**
**विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे।।**

अत्र नायिकाविरहयोः जनकजन्योः, आनन्ददानतापनक्रिये विरुद्धे, इति विषमालङ्कारः। अस्य अन्येपि भेदाः सम्भवन्ति। दिङ्गमात्रमुदाहियते—

**विपुलान सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगश्रये।**
**मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा।।**

अत्र जगदाधारजगदीश्वर लोचनैकदेशकरणस्त्रीकर्तृकपानयोरत्यन्तविलक्षणतयानुपपद्यमान **एव योगः प्रतीयते, इति विषमालङ्कारः।**

**३१.भ्रान्तिमान्—** प्राकरणिकस्य दर्शने सति, यद् अप्राकरणिकत्वेन ज्ञानं स भ्रान्तिमान् अलङ्कारः। भ्रान्तिरस्मिन् अस्तीति भ्रान्तिमान्, इत्यन्वर्थेयं संज्ञा। उक्तं च मम्मटेन —

**भ्रान्तिमान् अन्यसंवित् तत्तुल्यदर्शने। इति।**

अन्यः = अप्राकरणिकः। तत्तुल्यस्य = अप्राकरणिकसदृशस्य, प्राकरणिकस्ये त्यर्थः। संवित् = ज्ञानेम्। सा च संवित् कविप्रतिभोत्थितैवालङ्कारः। उदाहरणं

**कपोले मार्जारः पय इति करान् लाधि शशिन-**
**स्तरुच्छिन्नप्रोतान् बिसमिति करी सङ्कलयति।**
**रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति**
**प्रभामत्तश्चन्द्रो जगदिदमहोन विप्लवयति।।**

अत्र शुभ्रतया अप्रकृतदुग्धादितुल्यानां चन्द्रकिरणानां दर्शने सति मार्जारादीनाम् अप्रकृतदुग्धादित्वेन ज्ञानामिति सदृशदर्शनजन्या भ्रान्तिरलंङ्कारः। यथा लोके, अङ्गदादिसम्बद्धपद्मरागप्रमुखमणिमेलनेधिकचमत्कारः। तत्र द्वयी विधा परस्परनिरपेक्षव्यवस्थितेः तदभावाच्च। तत्राद्या संसृष्टिः,द्वितीयस्तु सङ्करः। तत्राद्या यथा-

**३२.संसृष्टिः—** पूर्वोक्तानामेषामलङ्काराणां परस्परनिरपेक्षत्वेन या व्यवस्थितिः सा संसृष्टिरलङ्कारः। उक्तं च मम्मटेन–

**सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः। इति।**

यदित्यव्ययं स्थितिविशेषणम्। येत्यर्थः। इह उएकत्र।सेयं संसृष्टिः , शब्दलंङ्कारमात्रस्य अर्थालंकारमात्रस्य, शब्दार्थालङ्कारयोर्वोति त्रिप्रकारा इत्यर्थः।

तत्र शब्दलंकारसंसृष्टिर्यथा—

**वदनसौरभलोभपरिभ्रमद्भ्रमरसभ्रमसभृतशोभया।**
**चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्यया।।**

अत्र पूर्वार्द्धे भकारानुप्रासः, तृतीयचरणे लकारानुप्रासः, चतुर्थचरणे लकलोलकलो इति यमकम्। तथा चानुप्रासयमकयोः शब्दलङ्कारयोः परस्परनिरपेक्षर्योगात् संसृष्टिरलंकारः।

अर्थालङ्कारयोः संसृष्टिर्यथा—

**लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलता गता।।**

अत्र पूर्वार्द्धे लेपनविषयोत्प्रेक्षा, उत्तरार्द्धे असत्पुरुषसेवनाविषयोपमा, तयोरर्थालङ्कारयोः परस्परनिरपेक्षयोर्योगात् संसृष्टिरलंकारः।

शब्दार्थालंङ्कारयोः संसृष्टिर्यथा——

**सो णात्थि एत्थ गामे जो एअं महमहन्तलाअण्णं।**
**तरुणाणं हिअअलूडिं परिपक्कन्तीं णिवारेइ।।**

**स नास्त्यत्र ग्रामे य एनां महमहायमानलावण्याम्।**
**तरुणानां हृदयलुण्ठाकीं परापक्वमाणां निवारयति।।**

अत्र पूर्वार्द्धे णात्थि एत्थेति तकारखकारत्मकस्य, अनेकव्यञ्जकस्य सकृतसाम्यमिति छेकानुप्रासः शब्दालंकारः, उत्तरार्द्धे हृदयलुण्ठाकीमिति रूपकमर्थालंकारः।तयोश्च परस्परनिरपेक्षयोगात् संसृष्टिलंकारः।

**३३. सङ्करः—** अथ सङ्करलंकारः। स चाङ्गाङ्गित्वेन सन्देहास्पदत्वेन एकपदप्रतिपादकत्वान च त्रिविधः। तत्राद्योङ्गाङ्गीभावरूपः सङ्करो यथा—

**अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः इति ।**

एते पूर्वोक्ता एवालंकारा यत्रात्मभावे,अनासादितात्मभावाः, परस्परम् अनुग्राहानुग्राहकतां दधति,तदा ए षां सङ्कीर्यमाणस्वरूपत्वात् सङ्करलंकारः। उदाहरणं यथा—

**आत्ते सीमन्तरत्ने मरकितनि हृते हेमताटङ्कपत्रे**
**लेप्तायां मेखलायां झटिति मणितुलाकाटियुग्मे गृहिते।**
**श्रोणं बिम्बोष्ठकान्या त्वदरि मृगदृशामित्वरीणमरण्ये**
**राजन् गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति।।**

अत्र बिम्बोष्ठकान्त्या षाणमिति तद्गुणः गुञ्जाफलानां स्रजः इति भ्रान्तिमत्वं स्वरूपनिष्पत्तौ अनुगृह्णाति, तद्गुणस्य च भ्रमजनकतया भ्रान्तिमत्साहाय्येनचारुत्वातिशय अत् तयोरङ्गाङ्गिभावरूपः सङ्करालंकाराः। तद्गुणोङ्गं भ्रान्तिमान् अङ्गीति भावः। द्वितीयो सन्देहास्पदो यथा–

**एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः इति।।**

एकतरस्य अलंकारस्य ग्रहे निश्चये न्यायदोषाभावात् यः अनिश्चयः संदेहः सःसम्देहालंकाराः। यथा-

**यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः।**
**तथा किं विधिना एष विधिना एष सरसपानीयो जलधिर्न कृतः।।**

अत्र गम्भीरादिश्लिष्टविशेषणसाम्यात् महिम्ना इत्यर्थः, अप्रस्तुतपुरुषविशेषप्रतीतेः इयमप्रस्तुतप्रशंसा इति संदेहः।

तृतीय एकपदप्रतिपद्यः संकरो यथा-
स्फुटमेकत्र विषये शब्दालंकाराद्वयम् । व्यवस्थितं च।

एकत्र विषये अभिन्ने एव पदे यत् शब्दार्थलंकृतिद्वयं शब्दार्थालंकारः अर्थालंकारश्च इति द्वयं स्पस्स्टं स्फुटं यथा स्यात् तथा व्यवस्थितं भवति। सोऽपि सण्ग्लकरः। अयमेव एकपदप्रतिपाद्यः सङ्करः इति च व्यपदिश्यते।

उदाहरणं यथा-

**स्पस्टोल्लसत्क्रणकेसरसूर्यबिम्बविस्तीर्णकर्णिकमथो दिवसारविन्दम्**
**श्लिष्टाष्टदिग्दलकलापमुखवतारबद्धान्धकारमधुपावलि सञ्चुकोच।।**

अत्र किरणकेसरेत्यत्र सूर्यबिम्बविस्तीर्नकर्णिकेत्यत्र दिग्दकलाप्त्यत्र चेति पादत्रये प्रत्येकं रूपकानुप्रासयोः एकपदानुप्रवेशरूपः सङ्करः। एवं त्रिविधः सङ्करो व्याख्यातः।

उपमादोषनिरूपणम्

युधिष्टिर इवायं सत्यं वदति इत्यत्रोपमा सदोषा, निर्दोषा वा इति युक्तियुक्तं प्रतिपादनम्-

कालपुरुषविद्यादिभेदरूपोपमादोषाणां भग्नप्रक्रमतायामेव अन्तर्भावः । यथा - ' गङ्गेव प्रवहतु ते सदैव कीर्तिः '।' चीरं जीवतु ते सूनुर्मार्कण्डेयमनिर्यथा इत्यादौ गङ्गा प्रवहति न तु प्रवहतु, एवमेव मार्कण्डेयमुनिर्जीवत्येव न पुनर्जीवतु इति । अत एषु स्थलेषु अप्राप्तप्रापणं हि विधिओः ' इत्येवं रूपस्य विधेरसंभवात् ' यथा गङ्गा सदैव प्रवहति तथा ते कीर्तिः सदैव प्रवहतु ' इति वाच्यम् । तथा सति ' प्रवहति ' इत्युपक्रम्य ' प्रवहतु ' इत्यस्य वाच्यतया प्रक्रमभङ्गाद् भग्नप्रक्रमत्वं दोषः ।

ननु ' गङ्गेव प्रवहतु ते सदैव कीर्तिः ' इत्यादौ साधारणम्, उच्चारिचं वा प्रतीयमानं वा उज्ज्वलत्वरूपधर्मान्तरम् अवलम्ब्य उपमा प्रतीयताम् । ' प्रवहतु ' इति क्रिया चोपमेयभूतायां कीर्तौ एव अन्वेतु, न तूपमानभूतायां गङ्गायामपीति न कालादिभेदो दोषः।

ननु तत्र समानधर्मान्तरमुपादायास्तु कथञ्चित् समर्थनम् । यत्रपुनर्नास्ति समानं धर्मान्तरम्, अपि तु तिङ्गन्तवाच्यमेव औपम्ये घटकम् । यथा - ' युधिष्ठिर इवायं सत्यं वदति ' इति। तत्र का गतिः ? युधिष्ठिरो हि सत्यमवादीत् न तु सत्यं भवति । तथा चात्रोपात्तं 'सत्यं वदति' इति

सत्यवदनकर्तृत्वमेव साधारणो धर्मः, स च वस्तुगत्या भिन्नकालिक एवेति कथमत्र पूर्वोक्तं समाधानमिति चेत् ? उच्यते - यत्रापि भिन्नकालादितया उच्चारितशब्दप्रतिपादितेनैव साधारणधर्मेणोपमा अवगम्यते , यथा युधिष्ठिर इवायं वदति इति प्रतिपत्स्यामहे(ज्ञास्यामहे)।

एवं च युधिष्ठिर इव सतियवदनशिलोयमिति तच्छीलत्वस्य साधारणधर्मस्य प्रतीयमानस्य अतीतापिकालष्वपि उपमा, न तु वर्तमानेन सत्यवदनेन योगः, इति नात्र कालादिभेदो दोषः।

ननु सत्यवादित्वमात्रेण उपमायाम् सत्यवादीसत्यं वदति इति पौनरुक्त्यं स्यात् ? मैवम्, रापोषं पुष्णाति इतिवद् युधिष्ठिर इव सत्यवदनेन सत्यवादि अयम् इति, अर्थात् यथा युधिष्ठिरो लोभादिना न सत्यं वदति किन्तु ,त्यवदनस्वभावात्, तथायमपीत्यर्थलाभात्, न पौनरक्त्यमिति।

वस्तुतस्तु रैपोषं पुष्णाति इत्यादिषु साधुत्वार्थं नियमितेषु(स्थितेषु)अनुप्रयोगेषु कथञ्चित् समाधानंउसमर्थनम्,नतु सर्वथैव निरवद्यम्उनिर्दोषम्,किन्तु सदोषमेवेत्यर्थः। अपि

चोपातधर्ममनादृत्य प्रतीयमानधर्मेण उपमा न साधीयसी। उपस्थितं साधारणधर्मं विहाय, अनुपस्थित (प्रतीपुनरुक्तवदाङयमान)साधारणधर्मकल्पने श्रुतहास्यश्रुतकल्पनाभ्याम् आस्वादप्रतीतेर्वलम्बात्। तथा चौपम्यप्रतीतौ कालादेः एकमात्रन्वयित्वाद्, अन्यत्र भङ्गेन भग्नप्रक्रमत्वमस्त्येव। एवं सति युधिष्ठिर इवायं सत्यं वदति इत्यत्रपमा सदोषैवेति निष्कर्षः।

अलंकाराणां परस्परभेदकता —

१ पुनरुक्तवदाभास- यमकयोर्भेदः— पुनरुक्तवदाभासे – भुजङ्गकुण्डली – इत्यादौ भिन्नानुपूर्विकयोः समानर्थकत्वेन प्रतिभासयोः शब्दयोरुपादानम्। यमके तु नवपलाशपलाश-

इत्यादौ समानपूर्वीकयोरेव भिन्नार्थकयोरुपादानमिति भेदः।

२ वक्रोक्ति-द्वितीयापह्नुत्योर्भेदः— वक्रोक्तौ – वक्रोक्तौ नारीणामनुकुलमाचरसि इत्यादागोपनीयस्य वस्तुनः प्रथमं स्वयमविधानभावाद् अन्यक्तस्यैव वाक्यस्यान्यथाकरणम्। द्वितीयापह्नुतौ तु इह पुरनिलकम्पितविपग्रहा इत्यादौ स्वयं प्रकाशिताभप्रायस्य निजवचनस्यैवाथाकरणमिति भेदः।

३. लाटानुप्रास– पुनरुक्तवदाभासयोर्भेदः–लाटानुप्रासे समानाकारौ तात्पर्येण भिन्नौ शब्दौ भवतः। यथा– नयने तस्यैव नयने च इत्यादौ। पुनरुक्तवदाभासे तु भिन्नाकारौ शब्दौ भवतः, इति भेदः।

४. तुल्ययोगिता– शब्दश्लेषयोर्भेदः– तुल्ययोगितायाम् एकस्यैव धर्मस्यानेकधर्मतया प्रतीतिः। शब्दश्लेषे तु अनेकेषां धर्मिणां पृथक् पृथग् धर्मिसम्बन्धतया अवागमः, इत्यनयोर्भेदः।

५. शब्द्श्लेषार्थश्लेषयोर्भेदः-शब्दश्लेषेभ्धामात्रप्रतिपाद्यानेकार्थकशब्दष्वानेकार्थाभिधानम् अर्थश्लेषे तु अभ्धया स्वभावात् एकार्थबोध्द्कैरपि शब्दैरभ्धालक्षनाभ्यां वृत्तिभ्याम् अनेकार्थस्य प्रतिपादनमित्यनयोर्भेदः।

६.उपमारूपकयोर्भेदः- उपमायाम् उपमानोपमेयसाधर्म्यस्याभिधावृत्तिप्रतिपाद्यत्वम्। रूपके तु सादृश्यमूलत्वात् व्यञ्जनावृत्तिलभ्यत्वम्, इत्यन्योर्भेदः।

७.उपमानन्वयोर्भेदः- उपमायां द्वयोः धर्मिणोः उपमानोपमेयत्वाभिधानम्। अनन्वये तु राजीवमिव राजीवम् इत्यादौ एकस्मिन्नेव धर्मिणि उपमानोपमेत्वमित्यनयोर्भेदः।

८.रूपकपरिणामयोर्भेदः-रूपके आहार्या एव सकृद्भेदबुद्धिः, अनन्तरं साधर्म्यप्रतीतिरेव नतु अभेदबुद्धिः। परिणामे तु वस्तुनोरेककार्यकारित्वरूपसाधर्म्येण अभेदबुद्धिरिति भेदः।

९. अपह्नुतिरूपकयोर्भेदः- अपह्नुतौ उपमेयनिषेधपुरस्सरं उपमानतादात्म्यारोपणम्। रूपके तु प्रकृतस्य उपमेयस्य अप्रतिषेधेन तत्र तरोपमानतादात्म्याध्यासः, इत्यनयोर्भेदः।

१०. प्रथमापह्नुतिव्याजोक्त्योर्भेदः- प्रथमापह्नुतौ प्रकृतापकृतयोः साम्यम्, व्याजोक्तौ च तदभाव।

११.द्वितीयापह्नुतिव्याजोक्त्योर्भेदः-द्वितीयापह्नुतौ गोपनकृता गोपनीयोऽर्थः प्रथममुच्यते व्याजोक्त्यौ तु नोच्यते इति भेदः।

१२. अतिशयोक्तिसंदेहयोर्भेदः- अतिशयोक्तौ मध्यं तव सरोजाक्षि - इत्यादौ केवलं संशयमात्रम्। संदेहे तु उपमेये उपमानस्य संशयः अलंकारत्वव्यस्थापकः इत्यनयोर्भेदः।

१३.संदेहोत्प्रेक्षयोर्भेदः- संदेहे कोटिद्वयस्य एव समकक्षतसम्शयप्रयोजकयोः भावाभावकोट्योरेव तुल्यबलत्वम्। उत्प्रेक्षायां तु - अतुल्यबलतया उभयोरपि संशयकोट्योरेकस्यां कोटौ निवेह्सः, इत्यनयोर्भेदः।

१४.निश्चश्चयनिश्चयान्तसंदेहयोर्भेदः- निश्चये संदेहनिश्चययोः पृथगाश्रयवृत्तितया वैयधिकरण्यम्।निश्चयान्तसंदेहे तु यस्य प्रथमतः संदेहः तस्यैवान्ते निश्चयदर्शनात् संदेहनिश्चययोः साधर्म्यस्य वाच्यत्वम् , इत्यनयोर्भेदः।

१५.उपमोत्प्रेक्षयोर्भेदः- उपमायाम् उपमानोपमयोः साधर्म्यस्य वाच्यत्वम्, उत्प्रेक्षायां तु उपमेयस्य उपमानात्मना सम्भावानम् इत्यनयोर्भेदः।

१६.सन्देहभ्रान्तिमतोः भेदः- संदेहे उभयकोटिकं ज्ञानम् । भ्रन्तिमति तु एककोटिकं ज्ञानम्, इत्यनयर्भेदः।

१७.भ्रान्तिमदुत्प्रेक्षयोर्भेदः- भ्रान्तिमदलंकरे 'मुग्धा दुग्धधिया' इत्यादौ भ्रान्तानां वल्लवानां प्रकृतिविषयस्य चन्द्रिकादेः ज्ञानं न भवति। उत्प्रेक्षायां तु उत्प्रेक्षितुः पुरुषस्य सम्भावनाविषयस्य प्रक्ह्नितस्यापि ज्ञानं भवति, इत्यनयोर्भेदः।

१८.उत्प्रेक्षातिशयोक्त्योः भेदः- अतिशयोक्तौ प्रतीतपदार्थकस्य एव आरोप्यमाणस्य वाक्यार्थपर्यालोचनानन्तरमेव असत्यताप्रतीतिः। उत्प्रेक्षायां तु वाक्यार्थप्रतीतिकाले एव आरोप्यमाणस्य वस्तुनः असत्यतया प्रतीतिः, इत्यनयोर्भेदः।

१९.तुल्ययोगितादीपकयोर्भेदः- तुल्ययोगितायां द्वयोः प्रकृतयोः द्वयोर्वा अप्रक्ह्नितयोः पदार्थयोः पदार्थगुणक्रियान्यतररूपेण एकधर्मेण पर्स्परं संबन्धः, न तु प्रक्ह्नितावप्रक्ह्नितयोः।

दीपके तु प्रकृताप्रकृतयोः पदार्थगुणक्रियान्यतररूपेण एकधर्मेण पर्स्परं संबन्धः, इत्यनयोर्भेदः।

२०.उपमादीपकयोर्भेदः- उपमायां कमलमिव मुखं मनोज्ञमेतत् इति इत्यादौ साम्यबोधकानाम् इवादीनांम् नियमेन प्रयोगः। दीपके तु नियमेन इवादिपदानामप्रयोगः, इत्यनयोर्भेदः।।

२१.प्रतिवस्तूपमादीपकयोर्भेदः- प्रतिवस्तूपमयां प्रकृताप्रकृतन्वयिनः एव एकस्य धर्मस्य विभिन्नाकारेण निर्देशः। दीपके तु प्रकृताप्रकृतन्वयिनः एव एकस्य धर्मस्य एकाकारेण एव निर्देशः, इत्यनयोर्भेदः।

२२.प्रतिवस्तूपा-दृष्टान्तयोः भेदः- प्रणिधानगम्यसाम्यस्य उपमनोपमेयगतसामान्यधर्मस्य तुल्यत्व दृष्टान्ते। प्रतिवस्तूपमायां तु सामन्यधर्मस्य एकत्वम्, , इत्यनयोर्भेदः।

२३.निदर्शना-दृष्टान्तयोः भेदः- निदर्शनायां बिम्बप्रतिबिम्बभावापेक्षं विना वाक्यार्थस्य पर्यवसानम् दृष्टान्ते तु पर्यवसितेन वाक्यर्थेन सामर्थ्यात् बिम्बप्रतिबिम्बताप्रत्यायनमित्यनयोर्भेदः।

२४.अर्थापत्तिनिदर्शनयोर्भेदः- अर्थापत्तौ दण्डापूपन्यायात् अर्थान्तरप्रतीतिमात्रम्। निदर्शनायं तु वाक्यार्थस्य सादृश्ये पर्यवसानम्, , इत्यनयोर्भेदः।

२५.अप्रस्तुतप्रशंसादृष्टान्तयोः भेदः-अप्रस्तुतप्रशंसायां क्वचित् अप्रसिद्धस्यापि वस्तुनः बिम्बत्वेन उपादानम्। दृष्टान्ते तु सर्वत्र प्रख्यातस्यैव पदार्थस्य , इत्यनयोर्भेदः।

२६.अप्रस्तुतप्रशंसा-समासोक्त्योः भेदः-अप्रस्तुतप्रशंसायाः प्रस्तुतस्य गम्यत्वम्, समासोक्तौ अप्रस्तुतस्य गम्यत्वम् इत्यनयोर्भेदः।

२७.अप्रस्तुतप्रशंसा-पर्यायोक्तयोःभेदः-पर्यायोक्तौ कारणवत् कार्यस्यापि प्रस्तुतत्वम्, अप्रस्तुतप्रशंसायां कार्यस्य अप्रस्तुत्वम्, इत्यनयोर्भेदः।

२८.काव्यलिङ्गानुमानार्थान्तरन्यासानां भेदः- हेतुः त्रिधा भवति। ज्ञापकः, निष्पदकः, समर्थकश्च। तत्र ज्ञापको हेतुः अनुमानस्य विषयः। निष्पादको हेतुः काव्यलिङ्गस्य, समर्थकः हेतुः अर्थान्तरन्यासस्य इति एतेषां परस्परं भेदः।

२९..उत्प्रेक्षानुमनयोः भेदः-उत्पेक्षायां विषयिणः अनिश्चयतया प्रतीतिः, अनुमाने तु विषयिणः ज्ञानम्, इत्यनयोर्भेदः।

३०.भान्तिमद्भाविकयोः भेदः- भ्रान्तिमति अतस्मिन् तत्त्वेन बोधः। भाविके तु भूतस्य भाविनः वस्तुनः प्रत्यक्षवत् भासमानत्वमिति इत्यनयोर्भेदः।

३१.समाधिसमुच्चययोः भेदः- समाधौ एकस्मिन् कारणे फलसाधनाय अनुष्टियमाने काकतालीयन्यायेन समुपस्थितेन कारणान्तरेण फलस्य अउकरत्वम् । समुच्चये तु मिलितान्येव कारणानि कार्यत्वेन जनयन्ति,इत्यनयोर्भेदः।

३२.अर्थात्त्यनुनुमानयओः भेदः-अर्थापत्तौ ज्ञापज्ञापकयोः नियतसामान्यन्यायेन अर्थान्तरप्रतीतिः। अनुमाने तु साध्यसाधनयोः व्याप्तिरूपसम्बन्धेन साध्यज्ञानम् इत्यनयोर्भेदः।

३३.परिवृत्तिपर्यायोः भेदः- परिवृत्तौ एकवस्तुत्यागोपधिकापरवस्तूपादानरूपः विनिमयः। पर्याये तु अपरवस्तूपादानम् प्रति अन्यवस्तुत्यागस्य नियमभावः, इत्यनयोर्भेदः।

३५.कारणमाला-मालादीपकयोर्भेदः- कारणमालायां पूर्वपूर्ववस्तुनः परं परं प्रति हेतुत्वमात्रम्, मालादीपके तु पूर्वपूर्वस्य उत्तरोत्तरं प्रति हेतुत्वं सर्वेषामेकक्रियान्वयिनश्च, इत्यनयोर्भेदः।

३६.उत्तरप्रश्नपरिसंख्ययोर्भेदः-उत्तरालंकारे वाक्ये एव विश्रान्तिः। प्रश्नपरिसंख्यालंकारे तु अन्यनिषेधे एव तात्पर्यम् ।

३७. अनुमानोत्तर्योर्भेदः- अनुमाने एकपक्षगतत्वेन साध्यसाधन्योः निर्देशो भवति। उत्तरे तु न भवति।

३८. संसृष्टिसंकरयोर्भेदः - संसृष्टौ तिलतण्डूलन्यायेन गम्यमानालंकाराणां शब्दार्थलंकाराणां यथासंभवमेकत्रश्लोके सम्यगवस्थानाम्, संकरे तु नीरक्स्हीरन्यायेन अनासादितस्वतन्त्रभावानाम् अलंकाराणम् एकत्र आश्रये परस्परम् अनुग्राह्यानुग्राहकभावेन सम्मिषृणम् इत्यनयोर्भेदः ।